संस्कृत-विद्यापीठ-ग्रन्थमालाया एकसप्ततितमं पुष्पम्

शोधविद्याविज्ञानम्

प्रधानसम्पादकः
प्रो० वाचस्पति उपाध्यायः
कुलपतिः

सम्पादकः
प्रो० रमेशकुमारपाण्डेयः

सहसम्पादकः
डॉ. ज्ञानधरपाठकः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
नवदेहली

संस्कृत-विद्यापीठ-ग्रन्थमालाया एकसप्ततितमं पुष्पम्

शोधविद्याविज्ञानम्

प्रधानसम्पादकः

प्रो० वाचस्पति उपाध्यायः

सम्पादकः

प्रो० रमेशकुमारपाण्डेयः

सहसम्पादकः

डॉ० ज्ञानधरपाठकः

प्रकाशन-स्थलम्

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

नवदेहली-110016

प्रकाशकः
कुलपतिः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानित-विश्वविद्यालयः)
कुतुब इन्स्टीट्यूशनल एरिया,
नवदेहली-110016

आइ.एस.बी.एन : ८१-८७९८७-३१-१

वर्ष : 2011 ई०

मूल्यम् : 90/-

मुद्रकः
अमरप्रिंटिंगप्रैसः
दिल्ली
दूरभाषा : 9871699565, 8802451208

नैवेद्यम्

सम्प्रति एकतः आगामिपञ्चवर्षीययोजनायां भारतसर्वकारस्य दिशानिर्देशस्य परिपालनद्वारा सामाजिकसमरसतायै सामाजिकन्यायस्य च कृते अनुगुणप्रयासः क्रियते, अपरतः शास्त्राध्ययनस्य अक्षुण्णपरम्परापि संरक्षणीया विद्यते। संस्कृतस्य अध्ययनाध्यापनस्य परम्परायाः सुदृढीकरणम् अपेक्षितम्, यदर्थम् विद्यार्थिषु पारम्परिकेण शास्त्रज्ञानेन सह गवेषणाप्रवृत्तेः जागरणाय, शोधकर्मणि गुणवत्ताया आधानाय, कौशलस्य अभिवृद्धये च आचार्यकक्षायाः पाठ्यक्रमे अनुसन्धानप्रविधेः समावेशो विहितः, येन अधिगतज्ञानस्य परिशुद्धतायाः क्रमबद्धतायाः तर्कात्मकतायाः प्रामाणिकतायाश्च काचिदभिनवा दृष्टिरुन्मीलिता स्यात्। व्याख्या-भाष्य-वृत्तिप्रभृतिषु वितते आलोचनाक्षेत्रे तथ्यान्वेषणप्रवृत्त्या सह सर्जनात्मकप्रतिभायाः समधिक-विकासोऽपि स्यात्। तेषु विषयपरिशीलनेन सह प्रखरतर्कशक्तिः प्रतिष्ठापिता स्यात् परीक्षणक्षमता उद्बुद्धा स्यात्। अन्तेवासिनो न केवलं प्रगाढां प्राचीप्रवाहितां व्युत्पत्तिसम्पदमेव दध्युः अपितु समाजे तां प्रकामं वितरेयुः, ते न केवलं परिचयात्मकज्ञानेन तृप्येयुः अपितु तेषां सततवर्धमानजिज्ञासायाः उपशमार्थं संस्कृतसाहित्यस्य विविध-शास्त्रीयं मूलङ्कषमालोचनम् अन्तरङ्गपरिचयश्च स्यात्। अतो हेतोः युक्तिप्रमाणोपपादनदृष्टेः समुन्मेषोऽपि तथैव आवश्यकः। येन सारस्वतसम्पदः या चेतश्चमत्कारिणी परम्परा जागर्त्ति, तस्याः सुरक्षया भाविसन्ततिषु तस्याः सङ्क्रान्त्या च विद्यापीठस्य मूलमुद्देश्यं फलेग्रहितां भजेत्।

आतङ्कवादप्रभावितेऽस्मिन् संसारे तस्य मूले विद्यामानायाः दुर्विचारसन्ततेः निरसनं तावद् दर्शनेषूपदिष्टैः शिवसङ्कल्पैः सुविचारैश्च नूनं सम्भवतीति निश्चित्य विद्यापीठस्यास्य समृद्धेन दर्शनसङ्कायेन विविधाः

विश्वविद्यालयीया राष्ट्रियाश्च विचारपरिष्कारसंगोष्ठ्यः समायोजिताः, तत्र गदाधरभट्टाचार्यप्रणीतं शक्तिवादग्रन्थं पुरस्कृत्य मानवसंसाधनविकास-मन्त्रालयस्य आर्थिकानुदानेन समायोजिता न्यायशास्त्रसंसत् समुल्लेख्या विद्यते। यत्र न केवलं संवादः संस्थापितः प्रत्युत समागतानां विचारप्रवणानां निबन्धानाम् उच्चभावनासमन्वितानां विचारविनिमयानाञ्च याथातथ्येन प्रकाशनमपि लोकहितकामनया विश्वविद्यालयशासनसाहाय्येन विधीयते।

छात्रेषु शोधप्रवृत्तिं संवर्धयितुं विशेषतः पाण्डुग्रन्थानां सम्पादन-प्रकाशनादिकार्यं प्रति उन्मुखीकरणार्थं शोधप्रकाशनविभागतः शोधप्रविधि-प्रशिक्षणपाठ्यक्रमः प्रतिवर्षं समायोज्यते यस्मिन् नैके लब्धयशस्काः विद्वांसः व्याख्यानं कुर्वन्ति। विगतवर्षेभ्य आचार्यद्वितीयवर्षीयच्छात्राणां पञ्चमपत्ररूपेण शोधविधेः एवं पाण्डुलिपिविज्ञानस्य अध्यापनं छात्रेषु शोधमूलां दृष्टिं समुत्पादयितुमेव प्रारब्धम्। परिणामतः ऐषमोऽनेके छात्राः विद्यावारिधिपाठ्यक्रमे प्रविष्टाः जाताः। तेषां विद्यावारिधिपाठ्यक्रमोऽपि विश्वविद्यालयानुदानायोगस्य नवीनतमनिर्देशानुसारं प्रचाल्यते यत्र बहुविधं प्रशिक्षणं प्रकल्पिमस्ति। तेष्वन्यतमं शोधप्रविधिप्रशिक्षणमस्ति। सर्वेऽपि ते छात्राः प्रविधावस्यां यथा निपुणा भवेयुस्तथा पाठ्यक्रमाधीनमायोजनं शोधप्रकाशनविभागतो विधीयते। तस्मिन्नेव क्रमे 'शोधविद्याविज्ञानम्' इति नामकस्य ग्रन्थस्य प्रकाशनं विधीयते। एतदर्थमहं शोधप्रकाशनविभागस्याचार्याय रमेशकुमारपाण्डेयाय कोटिशः आशीर्वादं वितीर्य विस्तराद् विरमामि।

१०.६.२०११

प्रो. वाचस्पति उपाध्यायः

कुलपतिः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

सम्पादकीयम्

शोधविद्याविज्ञानम् इति संज्ञकोऽयं ग्रन्थो वस्तुतः शोधकार्यक्रमे प्रवृत्तानां जिज्ञासूनां कृते भूमिकानिर्माणदृष्ट्या सज्जीकृतोऽस्ति। शोधप्रविधौ हिन्दीभाषायां संस्कृतभाषायां च प्रकाशितानां इतस्ततः विकीर्णानां निबन्धानां संग्रहात्मकोऽयं ग्रन्थः शोधच्छात्रेभ्यः समीचीनां भूमिकां विधास्यतीति मदीया मतिः।

भवननिर्माणे शिलान्यास इव भूमिकाया भवति महती भूमिका कस्यापि नवीनस्य वस्तुनो निर्माणे, तस्य च प्रस्तुतीकरणे। अस्माद्धेतोः भूमिकेति शब्दं विवृण्वन्तोऽभिनवगुप्तपादाचार्याः भूमिरेव भूमिकेति व्याहरन्ति। अत एव प्रबन्धस्य पूर्वानुबन्धे भूमिकायाः स्थानं भवति। कोऽपि पाठकः ग्रन्थस्य भूमिकामाध्यमेनैव ग्रन्थहृदयं सुष्ठुतया परिचिनोति। भूमिकामनधीत्य प्रवृत्ताः पाठकाः ग्रन्थवीथिषु भ्रमन्तः कालं यापयन्तः काठिन्येन तत्त्वं विदन्ति। पाठकानां सहजतया ग्रन्थविषयप्रवेशायैवादौ भूमिका विधीयते, सैव प्रस्तावनेति व्यवह्रियते।

यद्यपि अद्यावधि न केनापि भूमिकाशास्त्रं प्रणीतं न वा किमपि विशिष्टं लक्षणं विहितं भूमिकायाः, तथापि लेखकः स्वानुभवेन तादृशीं प्रस्तावनां निबध्नाति यया खलु पाठकस्य हृदि ग्रन्थस्य मूलं प्रयोजनं, तस्य प्रतिपादनशैली, लेखनसाधनानि स्वीकृतपद्धतिरित्यादयो विषयाः सुष्ठुतया समुद्भासन्ते।

सम्पादनात्मकप्राचीनग्रन्थानां भूमिकानिर्माणे तदादर्शप्रतीनां विवरणं, पाण्डुग्रन्थानां निर्देशः, पाठचयनोपायः, पाठपूर्तेरन्यान्युपादानानि, अन्ये टीकाग्रन्थाः, अन्यान्युद्धरणानि, पाठान्तराणि, पूर्वसंस्करणानि, लिपिदोषाज्जातानि परिहेयानि पाठान्तराणि, व्याकरणलक्षणहीनाः पाठाः, अन्ये च आर्षप्रयोगाः यथावसरं छन्दोगतं वैशिष्ट्यञ्च अनिवार्योपादानानि सन्ति।

विषयावतारो विषयप्रवेशो विषयनिरूपणं निर्णयश्चेति मुख्यानि कार्याणि भूमिकाकर्त्तुर्भवन्ति। एतानि विषयजातानि समादाय विहितया भूमिकया

पाठकस्य मनः भूयो भूयः पठनाय परिशीलनाय च समाकृष्टं भवति। टीकाकाराः प्रायः पाठकस्य मनःप्रसादाय विशदां प्रसारवतीञ्च भूमिकां निर्मान्ति, विशेषतः साहित्यशास्त्रपरम्परायाम्। काव्यप्रकाशस्य विद्यमानासु बहुविधासु टीकासु श्रीवामनाचार्य-झलकीकरोपाह्वेन विरचिता बालबोधिनीतिनाम्ना सुप्रतिष्ठिता टीका विद्यते। अत्र हि टीकाकारः भूमिकायामेव समग्रालङ्कारस्य संक्षिप्तां प्रवृत्तिं, व्याख्याग्रन्थान्, व्याख्याकारांश्च सुष्ठु पर्यचाययत्। येन पाठकानां महानुपकारो जातः। इतरशास्त्रप्रणयिनोऽपि जिज्ञासवो भूमिकामधीत्य तच्छास्त्रप्रणयिनो भवन्ति, ग्रन्थगह्वरे च तेषां मनः व्याकुलं न भवति। इदमेव मूलं प्रयोजनं भूमिकायाः।

अस्मिन् संग्रहे १४ निबन्धाः सन्ति येषु अनेके निबन्धाः शोधप्रभायाः विविधेष्वङ्केषु हिन्दीभाषायां प्रकाशिता आसन्। अन्ये केचन अनुसन्धानप्रविधि-नामके लघुपुस्तके संस्कृते अनूद्य राष्ट्रियसंस्थानद्वारा प्रकाशिताः आसन् तेषां ततः सङ्कलनम्, अन्येषां हिन्दीभाषातः अनूद्य मूललेखकानुवादकयोर्नाम-निर्देशसहितमत्र छात्रकल्याणकामनया प्रकाशनमत्र विहितमस्ति। संग्रहान्ते श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठात् विद्यावारिधेः लब्धोपाधीनां छात्राणां सूची विषयनामनिर्देशपुरस्सरं शोधनिर्देशकनामसहितञ्च प्रदत्ताऽस्ति। शोधकार्ये प्रवृत्तानां शोधपाठ्यक्रमे प्रवेष्टुं यतमानानाञ्च छात्राणां कृते सर्वथोपादेयोऽयं ग्रन्थः।

अस्य ग्रन्थस्य प्रकाशनाय बहुधा प्रेरकाणां विद्वद्वर्याणां कुलपतिप्रमुखाणां प्रो॰ वाचस्पति उपाध्यायमहोदयानां चरणयोः सादरं कार्तज्ञ्यप्रसूनाञ्जलिं समर्पयामि। ये न केवलं नितरां शोधकर्मणि निरतास्तिष्ठन्ति अपितु शताधिकान् शोधच्छात्रान् स्वमार्गदर्शने निर्दिष्टवन्तः।

ग्रन्थस्यास्य प्रूफसंशोधनादिकार्ये शोधसहायकेन डॉ॰ ज्ञानधरपाठकेन बहुधा श्रमो विहितोऽतोऽहं तस्मैः हार्दिकं धन्यवादं वितीर्य मुद्रकेभ्यः अमरमुद्रणालयाधिकारिभ्यः श्रीहीरालालमहोदयेभ्यः साधुवादं वितनोमि।

०६. ०६. २०११ **रमेशकुमारपाण्डेयः**

विषय सूची

प्रस्तावना-पर्यालोचनम्

डॉ. रुद्रदेवत्रिपाठी

प्रस्तावना-सृष्टिः

अस्ति ग्रन्थकाराणां समीक्षकाणां प्रशस्तिपराणां प्राचामर्वाचां देयं सार्वत्रिकी परिपाटी शिष्टाचार आवश्यकं कर्म च यत् ते—"यस्य कस्यचिदपि लघीयसो महीयसो वा ग्रन्थस्य प्रकाशन-पदवीमारूढस्य महिमानं समुपबृंहयितुं गृहद्वार्येव गृहस्थं निखिलमपि विभूतिवैभव-परिस्फूर्ति-विशेषमभिलक्षयितुमिव ग्रन्थान्त:संस्थितं तत्त्वजातं प्रस्फोरयितुं तदन्तर्निहितविषय-विशेष-सम्पृक्त-विचार-सरणि-परिष्कार-पूर्वकं विविधैरूहापोहैरितर-वृत्त-पौर्वापर्यप्रवाह- प्रचार-तत्कृत-विचारादि- समुपस्थापनेन च पाठकजनरुचिं संवर्द्धयितुं किमपि नूत्नं तत्पूर्वाभासरूपं प्रास्तावकं पुरस्कुर्वन्तीति। तत्र हि तेषां धारणा कस्यापि भवनस्य स्थिरत्वाय पूर्वं सुनिर्मिताया अङ्गणवेदिकाया आधारभुवो निर्माणरूपा च भवति। "इत्येतां परम्परा-प्राप्तां प्रणालिकामनुसृत्य यत्र तत्र सर्वत्र ग्रन्थारम्भविभागे प्रस्तूयन्ते विपश्चिदपश्चिमैः प्रस्तावनाः। सम्मुखीक्रियन्ते पण्डितपुरन्दरैः आमुखानि। उदाह्रियन्ते विद्याविचारैक-प्रवणचेतोभिः उपोद्घाताः। सम्भूष्यन्ते भूरिभाषाभाव-विभावविशदैर्विद्वद्भि-र्भूमिकाः। विज्ञाप्यन्ते विविधविचारवीचीनिचिता विज्ञप्तयः। विनिवेद्यन्ते प्राचामर्वाचाञ्च चिन्तनसञ्चित-साहित्य-संवलितानि निवेदनानि। उपक्रम्यन्ते तर्ककर्कषाणां प्रश्नानां समाधानसौकर्येण साधिता उपक्रमाः। उपदी-क्रियन्ते द्वित्राः शब्दाः। पुरस्क्रियन्ते पुरावृत्तपरिपूरितानि पुरोवचनानि। प्रवेशक-विषय-प्रवेश-आरम्भिका-पीठिका-प्रभृतीन्यन्यापि च नानारूपाणि नितरां

मनांसि मोदयन्ति सहृदयानाम्।[१] अत्रैवैवमेवावेद्यन्ते ग्रन्थ-ग्रन्थकृद्-ग्रथन-कौशल-विषय-काल-स्थल-महत्त्वादिपेशला 'विमर्श-वेदिका:' प्रस्तावनापरपर्याया इति।"

प्रस्तावना-विमृष्टि:

सेयं बह्वभिधानाऽन्तरन्तरितज्ञाना ग्रन्थगत-स्वारस्य-विहितपिधा-नाऽलसाध्येतृभ्य: पुरस्कृतगुडधाना स्फुरदुरुविषयविमर्शनिधाना सर्वारम्भ-पूर्वारब्धप्रस्थाना ग्रन्थ-कर्तृश्रमानुशंसन-प्रधानाऽथवा ग्रन्थगौरवाभिवर्धनायैव धृतावधाना 'प्रस्तावना' किं स्वरूपा? किमस्य शास्त्रम्? का वा निर्माणपद्धति:? इत्यादय: प्रश्ना: सत्यमेव स्वाभाविक-प्रज्ञाप्रसादसमधिगता:। तदेवं विधायां विमर्शप्रवृत्तौ 'निरुक्त्या शब्दार्थ-ज्ञानं सुकर' मिति प्रस्तुतस्य प्रस्तावना-शब्दस्य 'प्र-उपसर्गक-स्तुत्यर्थक-स्तु-धातो: णिचि युच्प्रत्यये टाप्प्रत्यये' च (प्र+स्तु+णिच्-युच्+टाप्)=प्रस्तावना इति सिद्ध्यति। तथा च 'स्तवनं स्तव:, स्तव एव स्ताव:, प्रकृष्ट: स्ताव: प्रस्ताव:, प्रस्ताव एव प्रस्तावना'। अत्र प्र+स्तु धातो: घञ्प्रत्यय:।[२]

परिभाषा चास्या:-'तद् आरम्भिकं कथनं यस्मिन् कस्यापि प्रस्तुतस्य विषयस्य विस्तृतिपूर्वकं वर्णनात् प्राक् तत्सम्बन्धिन्य: काश्चन मुख्या वार्ता: प्रकटयितुं दीयमानो लेखांश: प्रस्तावनेति।[३]

पर्याय-प्रयुक्तानि पदानि-'आमुख-उपोद्घात-भूमिका-विज्ञप्ति-विनिवेदन-उपक्रम-द्वित्र शब्द-पुरोवाक्-प्रागौक्तिक-विमर्शवेदिका-आरम्भिका-वक्तव्य' प्रभृतीनि।

एवमस्या: सामान्यं स्वरूपं निरूप्य किमस्या: शास्त्रमिति विषयं विचारयाम:। शास्त्रशब्दोऽयं कस्यापि विषयस्य माहात्म्य-विस्फोरणाय प्राय:

---

१. आसां पङ्क्तीनां लेखकेन स्वस्या-हास्यरसात्मिकाया "विनोदिनी" नामिकाया: पुस्तिकाया भूमिका "गगनिका" ऽपि प्रस्तुताऽस्ति।

२. संस्कृतकोशकारा इमामेव निरुक्तिं प्रयोगसिद्धिं च स्वीकुर्वते।

३. तत्रैव कोशेषु।

प्रयुज्यते। 'शासनाद् शास्त्रम्' इति व्युत्पत्त्या शास्त्र-शब्दस्यार्थः कस्यापि मानवस्य कस्मिंश्चिदपि कार्ये प्रवर्तनं कस्मादपि कार्याद् निवर्तनं भवति। वेदस्मृति-धर्मशास्त्रादयो ग्रन्थाः मानवान् सत्कर्मसु प्रवर्तयन्ति, असत्कर्मभ्यश्च निवर्तयन्ति तस्मादेव ते शास्त्राणि कथ्यन्ते। मुख्यरूपेण शासनकर्तारः प्रवर्तका निवर्तका वा ग्रन्थाः शास्त्र-पदेन व्यवह्रियन्ते, वेदान्त-दर्शनेऽयमेव शास्त्रशब्दो विधि-निषेधार्थानां प्रतिपादनातिरिक्तं 'शंसनाद् शास्त्रम्' इत्यर्थे प्रयुज्यते। अस्यां व्युत्पत्तौ कस्यापि गूढतत्त्वस्य प्रतिपादको ग्रन्थः 'शास्त्र-रूपेण मन्यते। अत्र प्रस्तावनायामपि मुख्यरूपेण प्रस्तुताः केचन विषया ग्राह्या भवन्ति परे च त्याज्या भवन्ति। अथ च नानाविषयाणां विवेचनपूर्वकं ग्रन्थस्य हार्दमप्यत्र पुरस्क्रियत इति दृष्ट्या प्रस्तावनाया इदं शास्त्रं शासन-शंसनेत्यनयोरुभयोरप्यर्थं धारयति।'

सर्वस्यैव हि शास्त्रस्यारम्भे प्रयोजनं वाच्यमिति सामान्यो नियमः। उक्तं च-

सर्वस्यैव हि शास्त्रस्य, कर्मणो वाऽपि कस्यचित्।
यावत् प्रयोजनं नोक्तं, तावत् तत् केन गृह्यते?।।

इत्यनुसारं प्रस्तावनायाः प्रयोजनमनुसन्धित्सुजनप्रबोधः पद्धतिज्ञानं पूर्वापर-प्रस्तावनारचयितृगणादृतपद्धति-निदर्शनमित्यादि स्वीकर्तुं शक्यते। शास्त्रस्य यानि पञ्चाधिकरणानि -

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं विदुः।।

इत्यनुसारं १-विषयः, २-विषयस्य विषये विशयः=संशयः, ३-पूर्वपक्षः, ४-उत्तरपक्षस्तथा, ५-निर्णयोपलब्धिरिति सन्ति।

प्रस्तावनायाः शास्त्रस्यापि पूर्वं विषयस्तत्तद्ग्रन्थ-विषयानुरूप एव भवेत्। यादृशो ग्रन्थस्तादृशः प्रस्तावनाया विवेचन-विषयः। यादृशं विवेचनं

तत्रापेक्षते तदनुसारमेव तत्र विस्तारः संक्षेपो वा, विषयसम्बन्धिनी गभीरता सामान्यविचार-विमृष्टिर्वा भवेदिति।

प्रस्तावनायामेव विषयमधिकृत्य ये केचन संशयाः समुत्पन्नाः समुत्पत्स्यन्ते च तेषां क्रमशः सर्वेषामप्युपस्थापना कर्तव्या। तत्रैव ग्रन्थकर्त्रा तदितरैश्च विद्वद्भिस्तद्विषये या या विचाराः समुपस्थापिताः स्युस्तासां सर्वासामपि पूर्वपक्षोत्तरपक्षयोः स्थापनपुरस्सरं वैशद्यं प्रतिपादनीयम्। किञ्च प्रान्ते निर्णयरूपेण स्वयं मन्तव्यं प्रस्तोतव्यम्। एवमस्मिन् प्रस्तावनाशास्त्रेऽधि-करणपञ्चकस्याप्युपयोगः समुचितः स्यात्।

तदुत्तरं प्रस्तावनाया निर्माण-पद्धति-विषये विचारोऽप्यावश्यकः। एतद्विषये किञ्चिद्विशिष्याधस्तान्निवेद्यते। 'लक्ष्यानुसारीणि लक्षणानि भवन्तीति' न्यायेनानुपूर्वैर्विद्वद्भी रचितानां प्रस्तावनानामालोचनमेवास्ति शरणम्। तस्मात् संस्कृतसाहित्ये प्रकाशितानां प्रस्तावनानां कानिचिन्निदर्शनानि पुरस्क्रियन्ते।

वैदिकसंस्कृतवाङ्मये प्रस्तावनामूलम्

संस्कृतवाङ्मयस्य मुख्यरूपेण द्वौ भागौ प्रसिद्धौ। १–वैदिक-संस्कृतभाग-स्तथा, २–श्रेण्यसंस्कृतभागः। प्रथमे भागे वेदचतुष्टयी ब्राह्मणारण्यकोपनिषदां च गणना क्रियते। प्राचीने काले वेदानामध्ययनं श्रवणपरम्परयैव भवति स्म, तस्मादेव वेदानामभिधानं श्रुतिरित्यप्यस्ति। श्रवणपरम्परायां प्रस्तावनाया आवश्यकता त्वासीदेव परं सा शिष्याणां समक्षं मौखिकरूपेणैव गुरुवर्यैः प्रस्तुताऽभविष्यदिति तत्स्वरूपं न विज्ञायते। किन्तु निखिलानामपि वेदमन्त्राणामादौ तत्तन्मन्त्रस्य 'ऋषिच्छन्दो देवतादि-स्मारको विनियोगः[१]' पठ्यते। सोऽयं विनियोगः किल प्रस्तावनारूप एवेति। मन्ये अनया दृष्ट्या प्रस्तावनाया मूलं 'विनियोग' इत्यपि वक्तुं शक्यते।

---

१. यथा–पृथ्वीति मन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता आसने विनियोगः। इत्यादि तान्त्रिकमन्त्राणां विनियोगेषु तु–बीज-शक्ति-कीलकानां प्रयोगो विशिष्य समाद्रियते। तैर्विना मन्त्रस्य ऋष्यादिन्यास-साधना न भवति समीचीना। तत्रैव विनियोगे बीजमन्त्राणामपि निर्धारणं क्रियते। तच्च गुरु-गम्यमिति सम्प्रदायः।

वेदभाष्यादिरचनान्तर्गताः प्रस्तावनाः

एतदतिरिक्तं वेद-ब्राह्मणारण्यकोपनिषद्रूपात्मकेऽस्मिन् वाङ्मये वेदेषु काऽपि प्रस्तावना न विलोक्यते न वाऽन्येषु तदन्तर्गतेषु ग्रन्थेषु। यतो हि तेषां निर्माणे कस्यचिदपि पुरुषस्य नाभूत् प्रयत्नः ते त्वपौरुषेयाः परब्रह्मणो निःश्वासभूताः सन्तीति सुनिश्चितम्। परं वेदानां भाष्यकर्तृभिः स्वस्वभाष्यारम्भकाले भूमिकारूपेण कैश्चित् केचन श्लोकाः कैश्चिच्च गद्य-पद्योभयरूपेण कतिपयानि पृष्ठानि लिखितानि। अस्यां परम्परायां श्रीसायणेन क्रमशः १-तैत्तिरीयसंहिता-भाष्यभूमिका, २-ऋग्वेद-संहिताभाष्य-भूमिका, ३-सामवेद-संहिता-भाष्यभूमिका, ४-काण्वसंहिताभाष्य-भूमिका, ५-अथर्ववेदभाष्यभूमिका चेति पञ्च भूमिकास्तत्र तत्र भाष्यस्योपोद्घात-रूपेणाङ्कितास्ता एव च पृथग्रूपेण संगृह्य लोकानामवबोधाय 'वेदभाष्य-भूमिका-सङ्ग्रह' नाम्नाऽद्य प्रशस्तिं गता विद्यते। ईदृश्यो भूमिका रचनान्तर्गता विलोक्यन्ते। आसां भूमिकानां विवेच्या विषयाः क्रमशः इमे सन्ति-

(१)

तैत्तिरीयसंहिता-भाष्यभूमिकाया विषयानुक्रमणी

विषयः

वेदलक्षणविचारः, वेदाधिकारिणः

वेदप्रामाण्यम्, चतुर्विधानि कर्माणि

१-नित्यकर्मणो लक्षणम्, २-नैमित्तिकं कर्म,

३-काम्यं कर्म, ४-निषिद्धं कर्म।

मुक्तिद्वैविध्यम् १-सद्योमुक्तिः, २-क्रममुक्तिः।

पूर्वकाण्डस्यादौ दर्शपूर्णमासेष्टिप्रतिपादनस्यौचित्यम्,

प्रकृतेस्त्रैविध्यम्,

दर्शपूर्णमासेष्टिमन्त्राणां त्रैविध्यम्,

संक्षेपेण त्रयोदशानुवाकगतविषयाणां निर्देशः,

वत्सापाकरणस्य लक्षणं तत्प्राथम्यस्य कारणनिर्देशः।

(२)

ऋग्वेदसंहिताभाष्यभूमिकाया विषयानुक्रमणिका

व्याकरणस्य लक्षणनिर्देशमुखेन प्रयोजनविशेषाणां विस्तरशः प्रतिपादनम्, निरुक्त-प्रयोजनम्,

निरुक्तस्थविषयाणां कार्त्स्न्येन विवेचनम्,

छन्दसः प्रयोजनोपन्यासः

ज्योतिषस्य प्रयोजन-निर्देशः,

पुराणन्यायादिचतुर्दशविद्यास्थानानां वेदार्थज्ञानोपयोगित्वम्,

वेदविद्याग्रहणेऽधिकारिविशेषः।

(३)

सामवेदसंहिताभाष्यावतरणिकाया विषयानुक्रमणी

मङ्गलाचरणम्,

अध्वर्य्वादिकर्त्तव्यप्रतिपादकमन्त्रस्यार्थयोजनम्,

मन्त्रस्य लक्षणम्, ब्राह्मणस्य लक्षणम्,

मन्त्रविशेषाणां लक्षणानि, रथन्तरशब्दनिरूपणम्,

सामशब्दस्य गानमात्रवाचित्वप्रतिपादनम्,

अक्षरविकारादीनां सामनिष्पादकत्ववर्णनम्,

स्तोभस्य लक्षणनिर्देशः, गाने वर्णलोपादीनां विषयाणां विचारः,

इराशब्दस्य गानविधानम्, साम्नां देवतास्तुतिहेतुत्ववर्णनम्,

साम्नामृचं प्रति संस्कारकत्वव्यवस्था,

ऊहग्रन्थस्य पौरुषेयत्वापौरुषेयत्वविचारः,

एकं साम तृचे क्रियते स्तोत्रियमिति विधानमूलको विचारः तृके करण-प्रकारश्च,

शरलेशविषयको विचारः

छन्दःस्थयोरुत्तरास्थयोर्वा ऋचोरूहनमिति विचारः,

त्रैशोकसामूहनविचारः,

विषमच्छन्दस्कयोरुत्तरयोर्गानप्रकारः,

बृहतीविष्टारपङ्क्त्योः प्रग्रथनविशेषेण द्वयोर्बृहत्योः सम्पादनम्,

षड्भिर्गायत्रीभिस्तिसृणां जगतीनां सम्पादनादिकम्,

पादप्रग्रथने विचारः

यद्योन्यां तदुत्तरयोर्गायतीति विधानमूलको विचारस्तथाकरणप्रकारश्च,

उत्तरयोः स्तोभातिदेशकथनम्,

सामवेदिनां साम्नैवानुष्ठानकर्तव्यतानिरूपणम्,

बृहत्पृष्ठादिषु धर्मसाङ्कर्यचिन्तनम्,

बृहद्-रथन्तरयोर्धर्मसमुच्चयकथनम्।

पृष्ठशब्दस्य वैदिकनामधेयत्वकथनम्,

'त्रिवृत्' इति शब्दविषयको विचारः,

चित्राशब्दस्य नामधेयत्वनिर्णयः

बहिष्पवमानशब्दादीनां नामधेयत्वनिर्णयः,

त्रिवृदादिस्तोत्राणां स्वरूपनिरूपणम्,

पृष्ठादिस्तोत्राणां प्रधानकर्मत्वनिर्णयः

रेवतीषु ऋक्षुवारवन्तीयसामगानप्रकारबोधनम्,

निधनविशेषाणां काम्यत्वकथनम्, सौभरसामस्वरूपम्,

निधनलक्षणम्, सामगाने उच्चैस्त्वनीचैस्त्वधर्मविचारः,

आधाने वामदेव्यादीनामुपांशुगेयत्वनिर्णयः, एकविंशादिस्तोत्रविचारः,

बहिष्पवमानानां त्रैविध्यम्, आवापोद्वापविचारः,

आवापलक्षणम्, उद्वापलक्षणम्,

अन्यशब्दस्य सर्वविषयत्वकथनम्, सर्वपृष्ठातिदेशनिर्णयः,

स्वरसामविकारचिन्तनम्,

श्लोकादिसाम्ना आज्यपृष्ठादिस्तोत्रस्य समुच्चयनिर्णयः,

कौत्सादिसाम्नः प्राकृतबाधकत्वनिर्णयः, तत्रैव विशेषव्यवस्था,

स्तोत्रवृद्ध्योः प्राकृतबाधकत्वनिर्णयः, छन्दोविशेषत आवापकथनम्,

कण्वरथन्तरं स्वयोनावेवेति निर्धारणम्,

पञ्चविंशे तु विशेषव्यवस्था, एकत्रिकक्रतोर्वर्णनम्,

धूर्गानस्य एकस्यामृचि कर्तव्यमिति निर्णयः,

आगमात् स्तोमवर्धनप्रकारनिर्देशः,

बहिष्पवमानवृद्धौ ऋच आगमः, एकस्य साम्नस्तृचे नेयत्वनिर्णयः,

स्वर्दृक्शब्दस्य मीलनावधित्वकथनम्,

बृहद्रथन्तरयोर्विभेदेन प्रयोगनिर्णयः,

सर्वपृष्ठस्य यथोक्तदेशे विहितत्वनिर्णयः,

वैरूपवैराजयोरुक्थ्यषोडशिपृष्ठगतत्त्वनिर्णयः,

त्रिवृदग्निष्टुति त्रिवृत्शब्दस्य स्तोत्रत्वनिर्धारणम्,

संसवादेः पृष्ठत्वनिर्णयः, बृहद्यवखादिराणां नियतत्वकथनम्,

ब्रह्मासाम्नो विकल्पितत्वकथनम्,

पर्यग्निकरणे ब्रह्मसाम्न उत्कर्षविधानम्,

साम्नामृगाश्रयत्वाद् व्याख्यानयोग्यत्वप्रतिपादनम्,

मन्त्रैरर्थानुस्मरणत्वनिर्णयः,

मन्त्रैरर्थानुस्मरणत्वविषये गुरुमतविवेचनम्।

(४)

काण्वसंहिताभाष्यभूमिकाया विषयानुक्रमणी

मङ्गलाचरणम्, वंशब्राह्मणोपक्रमः,
शुक्लयजुर्वेदस्य शाखाविषयको विचारः,
काण्वसंहितेत्यभिधानस्यार्थनिरूपणम्,
स्वाध्यायोऽध्येतव्य इत्यस्यार्थविचारणायां प्रभाकरमतोपन्यासः,
पूर्वोक्तस्य प्रभाकरमतस्य समीक्षा,
स्वाध्यायाध्ययनस्य दृष्टार्थादृष्टार्थत्वे शाङ्करदर्शनानुसारि मतम्,
एतद्विषये भट्ट–गुरुमतयोरुपन्यासः,
वेदस्य विषयविभागनिरूपणम्,
कर्मकाण्डस्य व्याख्यानप्राथम्ये योग्यत्वविचारः,
यजुर्वेदस्याध्यायगता विषयाः,
संहितारम्भे दर्शपूर्णमासेष्टिनिरूपणस्य औचित्यविचारः,
मन्त्रस्य सामान्यलक्षणनिरूपणम्,
ऋगादीनां त्रिविधानां मन्त्राणां विशिष्टलक्षणनिर्देशः,
मन्त्राणामनुष्ठेयार्थस्मारकत्वप्रतिपादनम्,
मन्त्रार्थज्ञाने ऋषिच्छन्दोदेवताज्ञानस्यावश्यकत्वम्,
दर्शयागात् पूर्वं नियमेन विधेया अनुष्ठानविधयः।

(५)

अथर्ववेदभाष्यभूमिकाया विषयानुक्रमणी

मङ्गलाचरणम्,
क्रत्वपेक्षितस्य क्रियाकलापस्य ऋग्यजुःसामवेदैरेव सिद्धत्वात् अथर्ववेदस्य नास्त्येव आकांक्षेति पूर्वः पक्षः,

ब्रह्मकर्तव्यप्रतिपादनतात्पर्यतया भवत्येव आकांक्षा व्याख्यानयोग्यता चाथर्ववेदस्येत्युत्तरः पक्षः,

अथर्ववेदस्योपवेदनिरूपणम्, अथर्ववेदस्य पुराणादिषु प्रशंसावचनम्,

'स्वाध्यायोऽध्येतव्यः' इत्यत्र विश्वजिन्न्यायेन स्वर्ग एवाध्ययनविधेर्भाव्य इति पूर्वः पक्षः,

इष्टप्रयोजनोऽर्थावबोध एवाध्ययनविधेर्भाव्य इत्युत्तरपक्षः,

स्वाध्यायाध्यनविधौ प्रभाकरमतस्योपन्यासपुरःसरं खण्डनम्,

वेदस्य स्वतः प्रामाण्यमिति सिद्धान्तविषयेऽभियुक्तानां विविधा विप्रतिपत्तयः,

प्रामाण्याप्रामाण्यं चोभयं स्वत इति सांख्यानां मतोपन्यासः पूर्वोक्तस्य सांख्यमतस्य समीक्षा,

'अप्रामाण्यं स्वतः प्रामाण्यं परतः' इति सौगतमतनिरूपणम्, सौगतमतस्य निरासः,

अप्रामाण्यं प्रामाण्यं चोभयं परत इति तार्किकमतम्, प्रामाण्यं स्वतोऽप्रामाण्यं च परत इति मीमांसकानां सिद्धान्तः,

वेदानामपौरुषेयत्वप्रतिपादनम्,

विरुद्धमतखण्डनपूर्वकं शब्दस्य नित्यत्वसिद्धिप्रकारः,

स्फोट एव नित्यः शब्द इति शाब्दिकानां मतोपन्यासः,

शाब्दिकमतनिरासः,

अथर्ववेदस्य शाखाविषयको विचारः,

कौशिकसूत्रोदितानाम् अथर्ववेदप्रतिपाद्यानां कर्मणां क्रमेण नामोल्लेखः,

वैतानसूत्रविहितानि ब्रह्मादीनां कर्माणि,

नक्षत्रकल्पोक्तानि कर्माणि,

आङ्गिरसकल्पे गदितानां कर्मणां समाख्यानम्,

शान्तिकल्पोदितानि कर्माणि,

राज्याभिषेकोपयुक्ता अनुष्ठानविधयः,

नित्यनैमित्तिककाम्यभेदेन कर्मणां त्रैविध्यम्,

आथर्वणकर्मणामाज्यतन्त्रपाकतन्त्रेति भेदाद् द्वैविध्यप्रतिपादनम् इति।

एतेषां विषयाणां पर्यालोचनेनेदं स्पष्टं प्रतीयते यद् भूमिकायां न केवलं सामान्य एव विषयाश्चर्च्यन्तेऽपि तु गभीराः शास्त्रार्थपराः खण्डन-मण्डनात्मका विचारा अपि प्रस्तूयन्ते। सैषा भूमिका-पद्धतिरग्रेऽपि प्रसृतिं प्राप्ता। सायणस्यैतेषूपोद्घातेषु प्रारम्भे पद्यानि सन्ति ततः परं च गद्यम्। एवमेव श्रीदयानन्दमहर्षेः 'ऋग्वेदादिभाष्यभूमिका' यां महर्षिणा वेदविषयिण्यः समग्रा धारणा वैशद्येन निरूपिताः। तथैव श्रीकपालिशास्त्रिणाऽपि "वेदगुप्तार्थसिद्धञ्जन" स्य ऋक्संहिता-भाष्यस्य भूमिका'ऽपि सुदीर्घा निर्मिता। यस्याः प्रारम्भे चतुश्चत्वारिंशदुत्तरैकशत-श्लोकाः सङ्ग्रहरूपेण रचिताः। ईदृशीनां भूमिकानां परिगणना 'रचनान्तर्गता भूमिका' इति रूपेण कर्तुं शक्यते। एवमेवेतरेषु वैदिकग्रन्थेष्वपि भाष्य-वृत्ति-टीका-चूर्णिकारैः प्रस्तावनारूपेण लिखितमेवेति तत्तद्ग्रन्थपर्यालोचनेन ज्ञायतैव।

एवमेवाथवा किञ्चिद् न्यूनाधिकरूपेण 'रचना-बाह्या भूमिका' अप्यतीव प्राचीनकालाद् (प्रायो मुद्रणविधिप्रारम्भकालाद्) विरच्यन्ते। एतासु मुख्यरूपेण तु पूर्वोक्ता एव विषया आद्रियन्ते परं नवीन-प्रविधिगतज्ञानप्रचलनेन तथा सम्पादन-कर्मगत-नानाविधबाह्यान्तर्विषयविचारागमेन बहवो नवीना मार्गा उद्घाटिताः। एतेषु मार्गेषु विहरन्तो भूमिकाकारा अपि वैदिक-संस्कृत-वाङ्मयस्य प्रकाशितेषु ग्रन्थेषु भूमिकाः प्रास्तुवन् यत्र मुख्यरूपेण प्राप्तानां पाण्डुलिपीनां हस्तलेखानां पाठमेलन-पाठसंशोधन-मूलभाष्यादिसम्मिश्रितपाठानां पृथक्पृथक्करण-पाठान्तरण-पाठान्तरसङ्ग्रहण-तद्विषयकौचित्यानौचित्यविवेकपूर्वकं-वास्तविकपाठ-निर्धारणादिविषयानवलम्ब्य लिखति। वैदिकसाहित्यस्य सम्पादनं नितान्तं कठिनं विद्यते। यतो हि तत्साहित्यं नाना विधाभिः संश्लिष्टं सत् स्वरभेद-शाखाभेदोच्चारणभेदादिकारणैरतीव दुरूहमिव विद्यते।[1] अत्रैव प्रस्तावनायां सम्पादनकर्माणि सम्प्राप्तानां काठिन्यानामुदाराणां सहयोगानां च प्रकटनमपि कुर्वन्ति विद्वांसः।

आधुनिकदृष्ट्या सम्पादितस्य महर्षिदयानन्दरचितभाष्यस्य पण्डितब्रह्मदत्त-जिज्ञासुलिखिताया भूमिकाया[१] विषया अपि निदर्शनायात्र यथावद् हिन्द्यामेव प्रस्तूयन्ते।

(यजुर्वेदभाष्य-विवरण-भूमिका की विषय-सूची)

वेद का प्रादुर्भाव,

ईश्वर और वेद का सम्बन्ध,

ईश्वरीय ज्ञान की आवश्यकता,

(१) सृष्टि के आरम्भ में ज्ञान मिलना आवश्यक है

(२) बाह्यज्ञान के बिना नैसर्गिक ज्ञानमात्र से काम नहीं चल सकता

(३) उपर्युक्त विषय में अन्य रीति से विचार

(४) बिना ईश्वर के आदिज्ञान में अन्य काल्पनिक पक्ष और उनका निराकरण

वेदज्ञान का प्रकाश कैसे हुआ?

वेदज्ञान का स्वरूप

आदिभाषा का प्रकाश तथा उसका स्वरूप

वेद और प्राचीन ऋषि-मुनियों की परम्परा

(१) स्वयं वेद क्या कहता है?
(२) शतपथ और ऐतरेय ब्राह्मण
(३) निरुक्तकार यास्कमुनि
(४) पाणिनि तथा पतञ्जलि
(५) मानव धर्मशास्त्र
(६) महाभारत
(७) वैशेषिक
(८) न्यायशास्त्र
(९) सांख्य
(१०) योगशास्त्र
(११) वेदान्त
(१२) मीमांसा
(१३) शाङ्खायन श्रौतसूत्र भाष्य

---

१. अयं ग्रन्थः, अमृतसरीय-रामलालकपूरट्रस्टसंस्थया वाराणस्यां मुद्रयित्वा १९५९ तम ईसवीयवत्सरे प्रकाशितः।

उपर्युक्त विषय में भाष्यकारों का मत

अग्नि आदि शब्द मुख्यवृत्ति से परमेश्वर के वाचक

त्रिविध प्रक्रिया

(१) ब्राह्मण आरण्यक और त्रिविध प्रक्रिया

(२) यास्कादि ऋषि और त्रिविध प्रक्रिया

(३) निरुक्तसमुच्चयकार और त्रिविध प्रक्रिया

(४) भर्तृहरि और त्रिविधप्रक्रिया

(५) यास्क और स्कन्द का सिद्धान्त, स्कन्द के अन्य प्रमाण

(६) दुर्गाचार्य और त्रिविध प्रक्रिया

(७) सायणाचार्य से पूर्ववर्ती भाष्यकार और त्रिविध प्रक्रिया

(८) सायणाचार्य और त्रिविध प्रक्रिया

(९) ऋषि दयानन्द और त्रिविध प्रक्रिया

देवतावाद

पूर्वपक्ष—उत्तरपक्ष

यजुः सर्वानुक्रमणी   व्यत्यय और वेदार्थ

वेद में इतिहास   पदपाठ और वेदार्थ

वैदिक छन्दोवाद

छन्दोलक्षण   छन्दों के भेद

छन्दों निर्णय के दो प्रधान प्रकार गायत्र्यादि छन्दों के अवतार भेद

अतिजगत्यादि छन्दों की पादव्यवस्था में मतभेद

ऋङ्मन्त्रों के छन्दों के दो प्रधान भेद

क्या स्वामी दयानन्द के वेदभाष्य में छन्दों की सात हजार अशुद्धियाँ हैं?

अथ पूर्वपक्ष　　उपर्युक्त आक्षेपों के उत्तर

क्या दैवी आर्षी आदि विशेषण ऋग्वेद में नहीं हो सकते?

बृहत्सर्वानुक्रमणी का विशेष स्थल, छन्दोनिर्णय में अन्य दृष्टि से विचारव्यूह की कल्पना क्यों की जाती है?

क्या छन्द संज्ञा के बदल जाने से वेद अनित्य हो जायेगा?

छन्दोभेद के कारण

प्रथम कारण–छन्दोनिर्णय की प्रक्रिया भेद से छन्दोभेद

द्वितीय कारण–मन्त्रगणना के प्रकार भेद से छन्दोभेद

तृतीय कारण–पादव्यवस्था के भेद से छन्दोभेद

चतुर्थ कारण–आचार्यों के लक्षणभेद से छन्दोभेद

उपसंहार

विवरण की विशेषतायें

यजुर्वेदभाष्य के इस संस्करण की विशेषता

मूलमन्त्र तथा पदपाठ का संशोधन

वेदभाष्य का संशोधन

यजुर्वेदभाष्य के हस्तलेखों का परिचय

उपर्युक्त हस्तलेखों का फोटो

हमारे संशोधन के आधार तथा प्रकार, लेखकादि की भूलों के कुछ नमूने

(१) लेखकों की भूल　　(२) संशोधन की भूल

मुद्रणकाल में संशोधनादि,　　विशेष स्थल

ऋषिभाष्य की अध्ययन विधि

सम्पादक का अन्तिम निवेदन

कागज की कठिनाई से संस्कृत भाग रह गया

भूमिका का महत्त्व

भूमिका में छपने से रहे विषय

यजुर्वेदभाष्य का द्वितीय संस्करण

द्वितीय संस्करण की विशेषतायें

द्वितीय संस्करण सम्बन्धी विशेष निर्देश

द्वितीय संस्करण की बाधायें

सम्पादक का अन्तिम निवेदन

इत्थमत्रायं भूमिकाकारोऽनेकान् नवीनान् विषयान् सङ्गृह्य पाठकानां मानसे सन्तोषमेव न तनोति प्रत्युत वैदिकवाङ्मयमवलम्ब्य विहितानां विधीयमानानां च विचाराणां परिशीलनायापि तेषामुत्साहाभिवृद्धिं करोति।

एवमेव नानास्थलेभ्यः प्रकाशनं प्राप्तं ब्राह्मणारण्यकोपनिषद्गतं साहित्यं पुरस्कुर्वन्तो विचक्षणाः सम्पादकाः प्रस्तावना-निबद्धारश्चेयती-मनुशीलनसामग्रीं तत्र स्थापयन्ति यस्याः पर्यालोचनेनैव पाण्डित्य-प्रतिभा स्फूर्तिं गच्छति।

लौकिकसंस्कृतवाङ्मये प्रस्तावना

लौकिकसंस्कृतवाङ्मयारम्भः किल वाल्मीकिरामायणादेव मन्वत इतिहास-विदः। रामायणारम्भे 'मूलरामायण' नाम्ना शतश्लोकी' भागो विद्यते, यत्र समग्रस्य रामचरित्रस्याकलनं विहितं महर्षिणा। तदपि मन्ये प्रस्तावनारूपमेव। किञ्चैकतो गतेषु वर्षेषु रामायण-महाकाव्यस्यास्य सम्पादनं वटपुर (बड़ौदा) नगरात् सञ्जातम्। तस्य प्रकाशने कियान् श्रमः सम्पादकैः संशोधकवर्यैश्चाहित इत्यपि ज्ञातव्यमस्ति। विविधप्रान्तेभ्यो विदेशेभ्यश्चापि रामायणस्य हस्तलिपिग्रन्थान् संगृह्य तेषां प्रत्येकमक्षरं तुलनात्मकरूपेण परीक्षितम्। शुद्ध मूलं रूपं च तस्य निर्णीय तत्क्रमशः प्रकाशितम्। एवमेव परतः पुण्य (पूना)-नगरे महाभारतस्याष्टादशसु भागेषु प्रकाशनमपि

महत्कार्यमभूत्। अस्य सम्पादनकलामधिकृत्य श्रीयुत पी.एल. वैद्यादिभिर्बहु लिखितं मार्गदर्शनं विहितम्।

साहित्यशास्त्रग्रन्थेषु भरतप्रोक्तं 'नाट्यशास्त्रं' प्राथमिकतां भजते। अस्मिन् शास्त्रे 'प्रस्तावना' शब्दस्य नाट्ये किमर्थकः प्रयोग इति विशदीकृतम्। तदनुसारं लक्षणं चेत्थमस्ति–

'नटी विदूषको वाऽपि पारिपार्श्वक एव वा।
सूत्रधारेण सहिताः सँल्लापं यत्र कुर्वते।।

चित्रैर्वाक्यैः स्वकीयोत्थैर्वीथ्यङ्गैरन्यथापि वा।
आमुखं तद्धि विज्ञेयं नाम्ना प्रस्तावनाऽपि सा।।[१]

एवं प्रस्तावनायामत्र सूत्रधारः प्रस्तोष्यमाणस्य नाटकस्य कारणं कर्तारं नाटककथानकं च सँल्लापमाध्यमेन सूचयति तथा 'स्वकार्योत्थ-वीथ्यङ्गवाक्यानि चित्र-वाक्यान्यन्यानि वा' तत्साधकानि भवन्ति।

एवमामुखापरपर्याया चेयं प्रस्तावना साहित्यशास्त्रे नाट्यविधानान्तर्गता १–उद्घात्यक २–अवलगित ३–कथोद्घात ४–प्रयोगातिशय ५–प्रवर्तकादिपञ्चभिरङ्गैरञ्चिता दृश्यते। प्रत्येकमङ्गञ्च क्वचिदनवगतार्थानां पदानां प्रश्नैः समाधानं, क्वापि पात्रसंसूचनार्थमालापः, कुत्रचिद् वाक्यस्य वाक्यार्थस्य वा माध्यमेन पात्रप्रवेशः, कुत्रापि प्रयोगे प्रयोगसमावेशः, कुहचन च कालकृत्यसमाश्रय इत्यादयो विधय आद्रियन्ते।[२]

---

१. नाट्यशास्त्रम्, अ० ३१, पद्ये २८-२९ तमे।

२. प्रस्तावनाङ्गानि यथा–'अस्या अङ्गानि उद्धात्यावगलितके द्वे, 'वीथ्याः **कथोद्घात**–प्रयोगातिशय-प्रवर्तकाः। अस्यैवाङ्गानि त्रीणि। एवं पञ्चाङ्गानि।
उद्घात्यकम्–पदान्यनवगतार्थानि प्रश्नेनावगतार्थैः पदैः प्रतिपादयतीति यत्तदुच्यते।
अवलगितम्–पात्रसंसूचनार्थं यदालपनं तद् द्रष्टव्यम्।
कथोद्घातः–यत्र सूत्रधारस्य वाक्यं वाक्यार्थं वा गृहीत्वा पात्रं प्रविशति।
प्रयोगातिशयः–प्रयोगे तु प्रयोगं तु सूत्रधारः प्रयोजयेत्। ततश्च प्रविशेत् पात्रं प्रयोगातिशयो हि सः।।

एत एव विधयः संहृत्य कालान्तरे ग्रन्थप्रस्तावनादौ सामान्य-विशेषरूपेण वा प्रणयनपदवीमाढौकिताः। साम्प्रतं वैदेश्यविद्वत्प्रभावपारवश्याच्च मन्ये सैव नाटकीया प्रस्तावना बहुरूपिणी सती ग्रन्थानां परिचायनेन चित्रयति चेतांसि सचेतसाम्।

इमाः प्रस्तावनाः ग्रन्थविषयाननुसृत्य बहुप्रकारिका भवन्ति। यथा ग्रन्थविषयं च तत्तद्विषयाणां विवेचनं च पुरस्कुर्वन्तीति प्रागेवावोचाम।

साहित्यिकी प्रस्तावना

'लक्ष्यानुसारीणि लक्षणानि निर्मीयन्त' इति लौकिकीं प्रथितिमनुसृत्य साहित्यिक-प्रस्तावना-लक्षणाय वयं विचक्षणविनिर्मितप्रस्तावना लक्ष्यीकुर्मः। ता एताः प्रस्तावनाः प्रायेण ग्रन्थस्याकारं महत्त्वं व्यापकत्वं विषयं तद्गतगूढताञ्चवधार्य विलिख्यन्ते सुधीभिः। अत एव भवन्ति ताः क्वापि लघीयस्यः क्वचिच्च महीयस्यः। लेखका अपि तत्र हेतवः। यावती तस्य प्रज्ञा यादृशी तस्य चिन्तनशक्तिर्यादृशश्च तस्य स्वाध्यायः। मुद्रणस्थानसङ्कोचं विना प्रसृता प्रस्तावयितुर्भारत्या सत्यमेव नानात्वं भजते प्रस्तावना।

तत्र हि प्राधान्येन प्रस्तावयितारस्त्रिधा मिलन्ति १. लेखकाः २. सम्पादकाः ३. समालोचकाश्च।

तेषु चापि प्रत्येकं प्रस्तावनाकारो मनोव्यापारदृष्ट्या वस्तुज्ञान-(Cognition) चिन्तन (Thinking)–वस्तुलाभ (Aequisition) रूपाणां विचाराणां प्रकाशनाय यतमानः १–संशोधनात्मिकां २–सङ्कलनात्मिकां ३–रसग्रहणात्मिकां वा प्रस्तावनां प्रस्तौति। तत्रापि प्रत्येकं प्रस्तावना

प्रवर्तकः–कालकृत्यं यदाश्रित्य सूत्रधारः प्रवर्तते।
तदाश्रयस्य पात्रस्य प्रवेशस्तु प्रवर्तते:।।

नाटकलक्षणरत्नकोशः पृ० ११९–१२३

किञ्च प्रस्तावनालक्षणस्य मूल-पद्ययोर्वीथ्यङ्गसूचनानुसारं नालिकाया अप्यत्र समावेशो भवति, यस्यां प्रहेलिकारूपेण प्रश्नोत्तराणि सम्पाद्यन्ते। वर्तमानप्रस्तावनास्वपि प्रहेलिकाः प्रश्नोत्तराणि च क्रियन्त इति।

तार्किकदृष्टिशालिनी सती १-शास्त्रीया सौन्दर्य-दृष्टिशालिनी च सती २-कलात्मिकेति निगद्यते।

इमा अपि पुनः प्रत्येकम्-आत्मनिष्ठा वस्तुनिष्ठाश्च गदितुं शक्यन्ते। एवं द्वादश प्रकाराः सामान्येनाकलयितुं शक्ता अपि क्रिया-कारक-करणादिभिर्वैविध्यं भजमाना नानात्वं संश्रयन्ते, तत्र विवेचका एव प्रमाणम्।

भवन्ति चात्र प्रस्तावनालेखकस्य कार्याणि-१-विषयावतारः, २-विषयप्रवेशः, ३-विषयकथनं, ४-विषयविवरणञ्चेति। विषयसम्बन्धा-वान्तरज्ञप्ति-स्वरूपप्रकाश-गुणदोषविवेचन-व्यक्तिदर्शन- महत्त्वमापन- विभूति पूजा-प्रभृतीनि कर्माणि च तत्राऽन्तरङ्ग-बहिरङ्गपरीक्षाक्षमतामुत्पादयन्ति। किञ्च न्यायाधीश इव ताटस्थ्येन सत्यासत्ये विवेचयन्, बलाबले तुलयन्, नीरक्षीरमिवोचितानुचिते विमलयन्, विवादस्थलानि चिकित्सक इव विमर्शयन् प्रस्तावकः प्रस्तावनां सम्पादयति। ग्रन्थकर्तुर्व्यक्तित्वं यथा स्फुरत् तथा वर्तनमेव बीजं प्रस्तावनायाः।

अद्य यावन्न निर्मितं केनापि प्रस्तावनाशास्त्रम्। न वा कान्यपि लक्षणानि सन्ति सुतरां निर्धारितानीति लेखकाधीनतैव तत्र तत्र प्रतीतिपथमायाति। वैदिकादि-ग्रन्थानामिवैव साहित्यग्रन्थेष्वपि प्रस्तावनालेखकः स्वदृष्ट्या स्पष्टतां प्रदर्शयति, तत्र च विशिष्य रचनाया मनोभूमिमवतारयन् किं किं कथङ्कारं साधितं किञ्चाभिप्रेतं; के वाऽऽदर्शस्तस्मिन् स्वीकृता इत्यादि विस्पष्टयति। सम्पादकस्तु यदि नाम प्राचीनः कोऽपि ग्रन्थो भवति तदा तदादर्शप्रतीनां विवरणं, समीक्षापुरस्सरं पाठस्वीकारः, पाठपूर्तेरन्यान्युपादानानि, अन्ये ग्रन्थाः, इतरग्रन्थगतान्युद्धरणानि, समानाः पाठाः, पूर्वसम्पादितपाठानां योगः, प्रतिकूल-पाठांशानां त्यागः, लिपिदोषस्य कारणात् परिहेयाः पाठाः, व्याकरणस्यापप्रयोगाः आर्षप्रयोगाः, शब्दान्तराणि च यथायथं प्रस्तौति। समालोचकश्च पाठानुसन्धान-भाषान्तरणसमीक्षापूर्वकं गुणदोष-विवेचनं विधाय कर्त्तव्यनिर्देशं सूचयति।

एवं सकलस्याप्यस्य कर्त्तव्यजातस्य स्वारस्यं पाठकानामुपरि निर्धारितं तिष्ठति। पाठकाश्च त्रिविधा भवन्ति। यथोक्तं निशीथचूर्णौ-

पुरिसो तिविहो परिणामगो अपरिणामगो अतिपरिणामगो तो एत्थ।

अपरिणामग-अतिपरिणामगाणं पडिसेहो।

एतदनुसारं १-परिणामक: २-अपरिणामक: ३-अतिपरिणामकश्च सन् पुरुष: पाठकस्त्रैविध्यं भजति। परिणामक:=परिपक्वबुद्धिशाली पाठको विषयावगाहनपूर्वकं प्रस्तावनामाध्यमेन ग्रन्थान्तर्निहिततत्त्वं परिचिनोति। अपरिणामकोऽपरिपक्वबुद्धे: कारणात्, अतिपरिणामकश्च कुतर्कपूर्णाया बुद्धे: सत्त्वात् न भवतोऽधिकारिणौ। एतादृश्या प्रस्तावनया पाठकस्य मन आकृष्टं भवति भूयोभूय: पठनाय मननायात्मसात्-करणाय च तदन्तरहित इति स्पष्टमेव प्रस्तावनाया ऐनं युगीनं माहात्म्यम्।

साहित्यशास्त्रीयग्रन्थानां परिशीलनेन ज्ञायते यद् यथा साहित्यिक: स्वीय-रचनाविषये स्वतन्त्र: सन् सूत्रपद्धतिं परिवर्ज्य विशदप्रसारवतीं रचनां प्रस्तौति तथैव प्रस्तावनास्वपि सुदीर्घ: प्रसार: समादृतो दृश्यते। काव्यप्रकाशस्य टीकाकार: श्रीवामनाचार्यो झलकीकरोपाह्वस्तद्ग्रन्थस्य प्रस्तावनायां समग्रस्यालङ्कारस्य संक्षिप्तां प्रवृत्तिं ग्रन्थान् ग्रन्थकारांश्च विवृण्वानो मम्मटस्य काव्यप्रकाश-विवरण-व्याख्याकर्तॄणां परिचयं चापि प्रादात्। एवमेषा प्रस्तावनाऽतीवोपयोगिनी समभवत्।[१]

महामहोपाध्याय-पाण्डुरङ्गवामनकाणेमहोदयानां साहित्यदर्पणस्य भूमिकाऽपि काव्यशास्त्रस्येतिवृत्तं महताऽऽटोपेन पुरस्कृतवती। किञ्च सैवाग्रे 'संस्कृतकाव्यशास्त्रस्येतिहास' रूपं धृत्वा विदुषां मनांसि रञ्जयति। वामनीय-काव्यालङ्कारस्याचार्य-विश्वेश्वर-प्रणीतानुवादसहितस्य प्रकाशने डॉ॰ नगेन्द्रमहाभागेनापि तदीया प्रस्तावना सुदीर्घा प्रस्ताविता। आचार्यो

---

१. एवमेवास्माभिरपि श्रीमद्यशोविजयोपाध्यायविरचितटीकासहितस्य द्वितीय-तृतीयोल्लासात्मकस्य काव्यप्रकाशस्य सम्पादनप्रकाशनमधिकृत्य तत्र विशद-रूपेण 'उपोद्घात:' संरचित:। तस्मिन् प्राय: षण्णवतिपृष्ठात्मके विवरणे काव्यशास्त्र-विषयक-विवेचनेन सहैव 'जैनविद्वद्भि: प्रणीतानां काव्यशास्त्रीय-ग्रन्थानां परिचय: काव्यप्रकाशस्य चाद्य यावदुपदलब्धानां टीकाकृतां परिचयो विशिष्य प्रस्तुत:।

विश्वेश्वरश्चापि स्वीये काव्यप्रकाशीयहिन्द्यनुवादसंयुते ग्रन्थे काव्यशास्त्रेतिवृत्त-विच्छित्तिसंवलितां प्रस्तावनां प्राणैषीत्। इत्थं प्रस्तावना-परम्परायाः प्राधान्यमिव साम्प्रतिके काले प्रवृत्तं प्रतीयते। अद्य किलाध्येतृणां ज्ञानवर्धनाय यथा विविधाः शास्त्रकोशा ग्रन्थकोशाः पद-पादार्धपद्य-पद्यसूचीरूपाः कोशाः प्राप्यन्ते परं तथा 'प्रस्तावना-कोश' विषये केषामपि ध्यानं न गतमिति चिन्त्यमेव।

अपूर्वाः प्रस्तावनाकाराः

अस्यामेव शत्यामेके महान्तः प्रस्तावनाकारा अन्येऽप्यस्माकं पुरत आयान्ति। तेषां श्रुतोपासना-परिसरेऽस्ति प्रस्तावनानामतीव महत्त्वम्। अतस्तद्विषयेऽपि लेखनमत्रावश्यकं मन्ये।

'देवसूरतपागच्छ' संरक्षकैः शैलानानरेशप्रतिबोधकैरागममन्दि-रादिसंस्थापकैः श्रुतवाहकागमदिवाकरध्यानस्थस्वर्गतागमोद्धारकाचार्यवर्य-श्रीमदानन्दसागरसूरीश्वरैः स्वीयप्रतिभाबलेनानेकग्रन्थानां निर्मित्या, नैकग्रन्थ-रत्नानां सम्पादनसम्पत्त्या विविध-ग्रन्थेषु प्रस्तावनोपक्रमोपोद्घातादि-विरचनेन चातिमहती श्रुतोपासना विहितेति परमगौरवास्पदं साहितीसुधास्वादन-संसक्तसचेतसां कृते।

आगमोद्धाराकाणामितरत् साहित्यजातं बहुधा तद्विनेयैस्तत्कृपापारावार-तरङ्गितैश्च प्रकाशितं प्रकाश्यते च। सूरीश्वरैरेतैः त्रिसप्तत्युत्तरैकशतसंख्यकानां ग्रन्थानां सम्पादनमकारि। प्रकाशनसंस्थाश्च 'श्रीजैनधर्मप्रसारकसभा (भावनगरे), श्रेष्ठिदेवचन्द्रलालभाईपुस्तकोद्धारफण्डसंस्था (सुरते), श्रीआगमोदयसमितिः श्रेष्ठिश्रीऋषभदेवजीकेशरीमलजीत्याख्या पेढी च (रतलामनगरे), श्रीसिद्धचक्रसाहित्य-प्रचारकसमितिः (मोहमय्यां), श्रीजैनानन्दपुस्तकालयः (सुरतनगरे), श्रीजैनपुस्तक-प्रचारकसंस्था (सुरते), देवकरणमूलजीप्रकाशनं (नवसारीनगरे), नवपदाराधकसमाजः (मोहमय्यां), यशोविजयजैनपाठशाला (महेसाणा)" प्रभृतय आसन्। समग्रेऽपि भारत-भूमण्डले पादचारं विहृतवतां सूरीश्वराणां सम्पादनेषु प्रस्तावनानां संयोजना महत्त्वपूर्णाः सन्ति। तत्र तत्र

प्रस्तावनासु तेषामपूर्वश्रुतपारगामित्वं विवेचनगाम्भीर्यं समालोचनोदार्यं पाठसन्धानपाण्डित्यं भावाविष्करणवैचित्र्यं गीर्वाणवाणीवैदुष्यं च पुरः पुरः परिस्फुरल्लक्ष्यते।

मा स्म भूवन् वञ्चिताः साम्प्रतिकाः सुरसरस्वतीसमाराधनतत्परा अपि तेषा-ममोघप्रतिभा-प्रसूतसाहित्यादिति धिया तेषामेव विनेयपरम्परापथिकैः व्याकरण-न्याय-ज्योतिषाध्यात्म-प्राच्यार्वाच्य-विज्ञानविद्यानदीष्णैः, श्रीमदुपाध्यायधर्मसागरमहाराजानां चरणोपासकैः श्रीमदभयसागरगणिभिः प्राथम्येन 'आनन्दरत्नाकर' नामकः प्रस्तावना-सङ्ग्रहोऽपि ग्रथितः।

प्रथम-विभागाऽऽत्मके एतस्मिंश्च प्रकाशने सन्ति पञ्चदशसङ्ख्याकाः प्रस्तावनाः सङ्गृहीताः।

एतासु १-आगम-२-भक्ति ३-श्रावकधर्म ४-प्रकरणसिद्धान्त ५-योगशास्त्र ६-अध्यात्मचर्चा ७-न्याय ८-कर्मसाहित्य ९-साहित्य १०-पौराणिकसमीक्षाविषयकग्रन्थानां प्रकाशननिमित्तमाकलय्य सूरिपुरन्दरैरेतैः प्रस्तावना लिखिताः सन्ति। तत्रापि प्रस्तावना-उपक्रम-उपोद्घात इति त्रीणि नामानि स्वीकृतानि।

प्रस्तावना-लेखने श्रीजुषामेषां पद्धतिः प्रायेणैवंरूपा-

१. **आगमप्रस्तावनायां-** ग्रन्थवाचनप्राचीनत्वं, चूर्णि-टिप्पणादिपरिचयः, विवादस्थानानि, तत्समाधानानि विशेषावधेयञ्चेति।

२. **भक्तिसाहित्योपक्रमे-** आगमावश्यकता, महिमा, वाचना, धर्मजिघृक्षुता, मुनिप्रभावः, कोशनिर्माणं, तात्कालिकी स्थितिः, प्रकाशनव्यवस्था, ग्रन्थकारपरिचयः, समयादिनिर्णयः, ग्रन्थपरिचय आदर्शप्रतिसूचनञ्चेति।

३. **प्रकरणसिद्धान्तप्रस्तावनायां-** आगमाकर-प्रकरणकर्तृपरिचयः, ग्रन्थकारपरिचयः, विवरणकारसूचनं, ग्रन्थपरिचयः, प्रकाशनव्यवस्थासूचना चेति।

४. **योगशास्त्रीयोपोद्घाते–** ग्रन्थरचनाविषयकप्रश्न-कालनिर्धारण-परककथन-खण्डन-प्रमाण-स्वनिर्णय-ग्रन्थपरिचयादयः।

५. **अध्यात्ममतपरीक्षोपक्रमे–** श्वेताम्बर-दिगम्बर-द्वैधीभावं परिचाय्य विविधानन्यान् वादान् विविच्य, ग्रन्थनिर्माणकारणमुद्धृत्य, ग्रन्थकारकालः, ग्रन्थपरिचयः, विशेषसूचनाः प्रतिसूचनाश्च प्रतिपादिताः।

६. **स्याद्वादभाषाप्रस्तावनायां–** ग्रन्थमुद्रणप्रयास-मुद्रापणकारण-ग्रन्थकार-कालानुमान-ग्रन्थनामयाथार्थ्य-ग्रन्थकार-कृतान्यकृति-परिचयादयः।

७. **कर्मग्रन्थ-कर्मप्रकृत्योरुभयोः पोद्धत्योः–** इतरधर्मानुयायिनाम-दृष्टस्वीकारः, कर्मनिबन्धनं, मोक्षचर्चा, ग्रन्थप्रणयनौचित्यं, ग्रन्थावश्कता, प्रकरणानुसारी ग्रन्थपरिचयः आत्म-विचारः, परेषां मतखण्डनं, ग्रन्थकृत्परिचयस्तत्कृतयश्चेति।

८. **साहित्यग्रन्थचतुष्ट्य्याः प्रस्तावनासु–** ग्रन्थ-ग्रन्थकार-महिमा, गुरुपरम्परा, ग्रन्थपरिचयः, शब्द-लिङ्ग-काव्य-छन्दोऽनुशासनाना-मावश्यकता, आक्षेपनिरासः, प्रति-सूचना, उपक्रमपूर्तिः, छन्दोनाम्नां मत-मतान्तरविवेकश्चेति।

९. **पौराणिकसमीक्षारूपप्रस्तावनायां च–** धर्मविचारः ग्रन्थकार-परिचयः, ग्रन्थपरिचयादयश्च निपुणं प्रतीतिपदवीमानीताः।

यत्र तत्र वृत्तिकार-विवरणकार-ग्रन्थसम्बन्ध्यन्यसूचनानि पुरस्कृत्य सूरीश्वरैरेतैः प्रस्तावना-शब्दस्य सत्यमेव सार्थकता सम्पादिता।

शाब्दे ब्रह्मणि साधिकारवचसां लघीयस्यामपि रचनायां पदघटाटोपः, काव्य-बन्धुरो बन्धः, सुघटितव्युत्पत्तिशक्तिप्रभा च सावष्टम्भं मुखरीभवन्ति। अत एव तेषां प्रस्तावनानां भाषाऽपि मञ्जुलाऽस्ति। श्रूयते किल श्रीमदानन्दसागरसूरिपुरन्दराणां जिह्वाऽजिरे क्रियाकलापविपुलः सर्वोऽपि धातुगणो

विराजते स्म, सर्वास्तद्धितवृत्तयः कण्ठस्थिताः क्रीडन्ति स्म स्वान्तान्तरालाम्बरे च प्रत्ययघटाघटिताः कृत्संज्ञा विलसन्ति स्मेति।

अत एव प्रत्येकं प्रस्तावनायामत्र वयं सुपर्वसरस्वत्याः कमपि विरलं प्रवाहं विलोकयामः। भाषाप्रवाहेऽत्र सानुप्रासाः शब्दाः, यङ्लुगन्तसिद्धाः क्रियाः, समाससन्दृब्धानि वाक्यखण्डानि क्वचित् क्लिष्ट-प्रयोगाः, सम्प्रदायसिद्धान्तभूयिष्ठा पदावलिः शास्त्रकोटिमधिश्रितो वर्णविन्यासोऽनति-प्रसिद्धशब्दावलिप्रयोगाश्च परिलक्ष्यन्ते।

कवीनां निकषभूते गद्ये विद्याऽनवद्या द्योतते, हृद्या पद्यामाद्यति, यद्यप्यद्यावद्यं गद्यते दीर्घ-दीर्घतरसमासशालि गद्यं तथापि सुबन्धु-बाण-दण्डि-सोड्ढल-धनपालादीनां गद्यमिव कापि चित्रा गद्यगवी श्रीमदागमोद्धार-कलेखितासु प्रस्तावनासु निर्वर्ण्यते।

एकतश्चूर्णकाभिधं[१] गद्यं चमत्करोति चित्तं, परतश्चोत्कलिकाप्रायं[२] दीर्घ-समासाश्रयं गद्यं च सन्तानयति चेतःप्रह्लादनम्। मुक्तक-वृत्तगन्धिगद्य-

---

१-२. साहित्यदर्पणस्य षष्ठे परिच्छेदे गद्यलक्षणं यथा-
वृत्तबन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च।
भवेदुत्कलिकाप्रायं चूर्णकं च चतुर्विधम्।।३३०।।
आद्यं समासरहितं वृत्तभागयुतं परम्।
अन्यद् दीर्घसमासाढ्यं तुर्यं चाल्पसमासकम्।।३३१।।

चूर्णकादिगद्योदाहरणानि यथा 'वीतरागस्तोत्र'-प्रस्तावनायाम्-

"-तत्रापि निस्सत्त्वाद् देशस्य अतिह्रसीयस्त्वाद्धर्मबुद्धेः, परायणत्वान्मान-गिर्यारोहे अनवबुद्धत्वात्तत्त्वमार्गस्य, पलायितत्वाज्ज्ञानस्य, व्यापृतत्वादनार्यभाषारुचेः, तुन्दपरिमृजबहुल-त्वाल्लेखकस्य संस्कारहीनत्वान्मतेः, इत्यादि (मुक्तकाभिधं गद्यम्)।"

दीर्घसमासाश्रयमुत्कलिकाप्रायञ्च गद्यं यथा कर्मग्रन्थोपोद्घाते-

'आकलनीयमिदं कलावत्कलापाकलनीयाऽकल्पऽकलङ्किताविक-लापरिकलिताऽऽकल्पाविकलितकीर्तिकन्दकमनोऽनेकान्तप्रकटनकोविदकल्पान्तका-लविशकलिताकारकविकृतानेकाकान्तैकाकान्तर्क्षकान्तिकर्तनविकर्तनश्रीमदकल-ङ्ककलाकल्पिताकलनीयार्थकदम्बकल्पाकर्णकानन्तमकसंस्कारकलितैः, इत्यादि। चूर्णकाभिधं गद्यं च तत्रैव-

योरपि निपुणोपन्यासः 'कलिकेव'[१] कलयति कौतुककमनीयताम्। संयुक्तवर्णेषु 'मधुर-श्लिष्ट-विश्लिष्ट-शिथिल-ह्लादि-वर्णानां'[२] नृत्यत्पदप्रायताऽन्त्यानुप्रास-निबद्धो मधुराक्षरसन्निवेशः सङ्गीत-लयलहरीवर्णमैत्रीरूपा झङ्कृतिश्चेति पदे पदे प्रस्फुरन्ति। मध्ये मध्ये देदीप्यमानोऽलङ्कारयोगश्च सौवर्णाभरणे मणिगणानामिव किमप्यपूर्वं वैचित्र्यं पुष्णाति।

अनुसन्धानवैशिष्ट्यम्

'अब्धिर्लङ्घित एव वानरभटैः, किन्तु तद्गाम्भीर्यं तु मन्थाचल एव जानाति' सेयं किंवदन्ती प्रक्रान्ते प्रस्तावनासङ्ग्रहरूपे श्रीमद् आनन्दरत्नाकरेऽपि सार्थिका भवति।

यतो हि भिन्न-भिन्नविषयग्रन्थेषु निहितस्य गाम्भीर्यस्याऽमूलचूलं मन्थनं विधायैव श्रीमद्भिरागमोद्धारकैः प्रस्तावना आकलिताः।

तत्र तास्वनुसन्धानकलाया वास्तविकानि तत्त्वानि, सत्यस्यान्वेषणं, नवीना उद्धृतयः, नूत्नानि तथ्यानि, नवनवा विचाराः, पक्षपातविरहितानि मूल्याङ्कनानि चेति पूर्णरूपेण प्रतिफलितानि विलोक्यन्ते।

"भूतिभूषितविग्रहपरिचर्यापराणाम्, मतान्तराविष्टान्तरात्मना, यावतास्तु विवेकमतिवारिधरपवनाभूत्यम्बरं भूभूधरोद्भूति निबन्धनतया'-इति वाक्यखण्डानि।

एवमेव वृत्तगन्धीनि, कलिकारूपाणि, संयुक्तवर्णभूयिष्ठानि च गद्यखण्डानि तत्र तत्रोह्यानि भवन्ति।"

१. कलिकालक्षणं यथाह स्तवमालाभाष्ये जीवदेवः –
कला नाम भवेत्तालनियता पदसन्ततिः।
कलाभिः कलिका प्रोक्ता तद्भेदाः षट् समीरिताः।।
कलिका चण्डवृत्ताख्या दिगादिगणवृत्तका।
तथा त्रिभङ्गीवृत्ताख्या मध्या मिश्रा च केवला"।।इति।

२. तत्र संयुक्तवर्णानां नियमो दशधा ते च–
मधुर-श्लिष्ट-विश्लिष्ट-शिथिल-ह्लादिनस्त्वमी।
भिद्यन्ते ह्रस्वदीर्घाभ्यां ते दृश्यन्ते स्फुटं यथा।।
–इत्यादि। श्रीगोविन्दविरुदावलीभाष्ये

'ग्रन्थकर्तारं प्रति तटस्थदृष्ट्या न्यायदानं सत्प्रस्तावनाया लक्षणम्।' तत्तथा-भूतमत्रोपस्थापितमिव प्रतिभाति। श्रीमतामनुसन्धानप्रक्रिया चेयं 'क्रियात्मिका' परिलक्ष्यते।

यस्यां स्वोद्देश्यं प्रभावशालिन्या पद्धत्या ज्ञानपुरस्सरं समस्यानां, संस्थापना, तासां निदानं, समुचितं समाधानं, अन्वीक्षणात्मिकाः प्रवृत्तयः, परीक्षणात्मिका दृष्टयः, तुलनात्मक-विकासात्मक-इतिवृत्तात्मक विमर्शाणां सङ्कलनं भ्रमनिरासादयश्च विशिष्य सन्ति।

श्रीमच्चरणैस्सर्वास्वपि प्रस्तावनासु प्रायः संस्तुतिरूपेण ग्रन्थकृतां ग्रन्थानां च महत्त्वमुपस्थापितं तथा च भाषा-संयमश्च समादृतः। यत्र यत्राऽऽवश्यकताऽभूत् तत्रैवापेक्षितं विवेचनं विहितं, यत्र च सूचनामात्रेण पाठकानां जिज्ञासा पूर्तिमियात् तत्र 'ग्रन्थे द्रष्टव्यमिति' संसूच्यैव संक्षेपितम्। बहुत्र ग्रन्थस्य प्रतिप्रकरणं परिचायितं तत्तद्विषय-संक्षिप्तिका च परिदर्शिता। तुलनादृष्ट्या छन्दोऽनुशासनदर्शिता नाम्नामन्याचार्यसूचित-नाम्नां च तालिका प्रकाशिता।

'अनन्ता हि वाग्विकल्पाः' इति दृष्ट्या सर्वेऽपि वाग्व्यवहारा आनन्त्यं धारयन्ति विपश्चितश्च ताँस्तान् व्यवहारान् कौशलेन प्रकटयन्तो विविधान् मार्गानाश्रयन्ते। भवन्ति च ते निबन्ध-प्रबन्ध-मुक्तक-महाकाव्य-कथानिकाऽऽख्यानादिरूपाः, परं श्रीमदागमोद्धारकसूरिपुङ्गवैरेकोऽनुपम एव मार्गः स्वीकृतः। यस्मिन्- नानाग्रन्थरत्नानां वैकटिकरूपेण शाणपरीक्षण-मातन्वद्भिरनेकाः प्रस्तावनाः प्रस्ताविताः। आसँस्ते महान्तो भाग्यशालिनो येषां लेखिनीसंस्पर्शेण चिरं सुषुप्तिं संश्रिता भूयांसो ग्रन्थाश्चेतनाप्रकाशं लब्धवन्तस्तत्प्रकाशपुञ्जश्च 'आनन्दरत्नाकररूपेण' सङ्गृहीतो विद्यते।

सूरिवर्यैः प्रस्तावनानां माध्यमेनालोचनाया निकषेषु क्रमशः १-सिद्धान्त २-नियम ३-आदर्शाणां प्रामुख्यं बुद्धिसात् कृत्वा कृतीनां गुणदोष-विमर्शपूर्वकं विश्लेषणं च विधाय पाठकेभ्यो यो दायः पुरस्कृतः स हि "पाठकानां चेतनाजागरणं तेषां ज्ञानसम्पदोऽभिवर्धनं, साहित्यिकाभिरुचेरुद्बोधनं,

धार्मिक-सांस्कृतिकसुरुचीनां विकासः साहित्यस्य तत्कलायाश्च प्रोत्साहनम्, साहित्यसृष्टये प्रेरणाप्रदानं, कुत्सितायाः प्रवृत्तेरवरोध' इत्यादिरूपेण विश्राणितोऽद्यः महार्घनिधिरूपेण विद्योतते।"

अस्यैवानन्दरत्नाकरस्य सङ्कलनस्यैकं विशिष्टं स्थानं संस्कृतसाहित्ये विद्यते। मन्येऽद्य यावदेकमपि पुस्तकमीदृशं न प्रकाशितचरम्। साहित्यकोटौ या विविधा धारा वर्तन्ते, तासु धारासु विरलं स्थानं 'प्रस्तावनाधाराया' अस्ति।

किञ्च प्रस्तावनानामैवैको ग्रन्थः सङ्कलितः स्यात्, स चापि द्वि-त्रि-खण्डेषु प्रकाशितो भवेदिति तु सर्वथा विस्मयावह एव। विविधेषु प्रकाशितचरेषु ग्रन्थेषु प्रस्तावनारूपेण विकीर्णानामासां साहित्यसृष्टीनामेकत्र सङ्कलनं भविष्यतां विपश्चितां कृते महदुपयोगि स्यादिति कल्याणकामनया श्रीमद्धर्मसागरोपाध्यायचरणोपासक-श्रीमदभयसागरगणिभिरिदं प्रयतितम्। प्रथमखण्ड-रूपेण चात्र पञ्चदश प्रस्तावना आकलिताः।

प्रस्तावनानां 'आनन्दलहरी' नाम्न्यष्टिप्पण्यः

इदमपरमस्य ग्रन्थस्य वैशिष्ट्यं यदत्र प्रस्तावनासु वर्णितानां विषयाणां सम्यगवबोधनाय ग्रन्थसम्पादकैरेव 'आनन्दलहरी' नाम्ना टिप्पण्य आलिखिताः।

प्रायेण प्रस्तावनाकारः सारल्येन ग्रन्थगतस्वारस्यं पाठकानां पुरस्तात् पुरस्कर्तुमेव प्रयतते,

न तमां तत्र काठिन्याशङ्का भवति; परं शास्त्रपारावारपारीणा भावा अपि यस्यां भाषायामवतरन्ति तेषु सामान्यवाचकानां मनीषा कादाचित्कतया विशिष्टेषु स्थलेषु रूढासु पदावलीषु कुण्ठतां व्रजत्येव, सन्ति चात्रापि बहूनि स्थलानि व्याख्या-सापेक्षानि, इति सकलं सञ्चिन्त्यैव प्रस्तावयितृणां हार्दमविकलं सरलया सरण्या हृद्गतं कारयितुं टिप्पणी-विरचनमभूत्।

टिप्पण्यामस्यां परमया श्रद्धया, गभीरया धिया, सूक्ष्मेक्षिकया च सूचनानि कृतानि सन्ति यानि निश्चितमेव विदुषां तोषाय भविष्यन्तीति न प्रत्ययः।

टिप्पणी-गौवरम्

श्रीमदभयसागरगणिभिरत्र टिप्पण्यां प्रतिस्थलं सङ्ख्यानिर्देशपुरस्सरं सर्वविधसौविध्याय निम्नलिखिताः प्रक्रियाः स्वीकृताः –

१. सम्बन्धसूचनम्, २. प्रसङ्गनिर्देशः, ३. उद्धरणप्रसङ्ग-विषयादिसूचनम्, ४. पर्यायशब्दाः, ५. पदनिष्पत्तयः, ६. अर्थानुसारिण्य-न्वयसङ्गतिः ७. अन्वयनिरूपणम्, ८. समस्तपदानां विग्रहाः, ९. अर्थविवक्षाविवेकः, १०. विशिष्टाभिव्यक्तिः ११. सर्वनामपदावबोधनम्, १२. सन्धिविच्छेदाः, १३. पदसिद्धयः, १४. विशेषणनिर्देशः, १५. विविधार्थविवेकाः, १६. स्वसम्प्रदायानुसारिणी व्याख्या १७. सूचितोविभावनम् १८. ऐतिह्यविमर्शः, १९. उद्धरणपूर्तयः, २०. विविधपाठसूचनानि २१. भावार्थाः, २२. ध्वनितार्थाः, २३. मान्यतानिदर्शनमित्यादयः।

एवं सुवर्णे सौरभमिव टिप्पण्य इमा वैदुष्यपूर्वकेण विमर्शेणापूर्वगौरवं धारयन्तीति नात्र शङ्कापङ्कावकाशः।

उपसंहारः –

एवमस्ति समस्तेऽपि ग्रन्थजगति प्रस्तावनानां विपुलो विस्तारः। तासां प्रक्रिया अपि भूषस्य आविष्कृता लेखकैः सम्पादकैश्च। प्रत्येकं शोधकर्तुरिदमपि विशिष्टं ज्ञानमावश्यकं मन्ये यत् स प्रारम्भे स्वकीयस्य शोधप्रबन्धस्य वैशिष्ट्यावबोधाय तत्र प्रस्तावनामपि रचयेत्। किञ्च पठितस्य लेखकस्य शोधविद्यानिष्णातस्य चैतद् बलादापतितकर्मापि गणयितुं शक्यते यत् स प्रस्तावना-विषयकेन वैविध्येन कौशलेन च परिचितः स्यादिति। तत्र "यदि काचन ग्रन्थान्तर्गता प्रस्तावना स्यात्तर्हि सा तु लेखकेन स्वकीयग्रन्थरचनाया मूलाधाररूपेण लिखिता भवेत्, यदि च ग्रन्थबाह्या प्रस्तावना स्यात् तदा समालोचनादि-विषयसङ्कुलिता भवेदिति" निर्गलितोऽर्थः।

अनुसन्धानं नाम....

प्रो॰ रमेशकुमारपाण्डेयः

सम्प्रति विश्वविद्यालयेषु निर्धारिता ये पाठ्यक्रमाः तेषु अनुसन्धानात्मकः पाठ्यक्रमः मूर्ध्नि स्थितो दृश्यते। आङ्ग्लभाषायां रिसर्च-शब्देन व्यवहृतस्यास्य पाठ्यक्रमस्य कृते शोधः, गवेषणा, अन्वेषणा अनुसन्धान-प्रभृतयः शब्दाः प्रयुज्यन्ते। इमे सर्वेऽपि शब्दाः प्रायः आङ्ग्लभाषायाः रिसर्च इति शब्दमेव मनसि निधाय प्रचलिता भवन्ति। फलतः शोधस्य पाश्चात्यसरणिमेव सङ्केतयन्ति। भारतस्य प्राचीनाध्ययनपरम्परायां सूत्रग्रन्थेषु प्रच्छन्नरूपेण निबद्धानामर्थानां प्रकाशनाय सूक्ष्मविवेचनपुरस्सरमनुसन्धानं भाष्यं, वृत्ति- विवृत्ति- व्याख्या- टीका-टिप्पणीप्रभृतिभिः शब्दैः व्यवहृतं दृश्यते। भारतीयपरम्परायां विद्यायाः प्रवाहः गुरोः मुखाज्जायते इति सुतरां प्रसिद्धं तथ्यम्। अत एवोच्यते- वंशो द्विधा, विद्यया जन्मना च। विद्यावंश उत्कृष्टतरो भवति जन्मवंशात् मुखाज्जायमानत्वाच्च। गुरोः सकाशादधीतस्य विषयस्य अध्यापनं विधाय शिष्य ऋष्यृणान्मुक्तो भवति। गुरोः सकाशाद् विद्यां समधिगम्य शिष्यः तस्या विद्याया विकासाय निरन्तरं प्रयतते। विद्याऽपि यथाकालं फलवती भवति। अत एव महाभाष्ये मुनिना पतञ्जलिना प्रोक्तं यत्- चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति- आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेनेति।[१] नैषधमहाकाव्येऽपि विद्यायाः चातुर्विध्यं निर्दिष्टमस्ति। एवं सुस्पष्टमिदं यत् भारतीयपरम्परायां व्यवहारमुखा विद्या विद्यते।[२] व्यवहाररहितायाः विद्यायाः विद्यात्वं विप्रतिपन्नं

---

१. पस्पशाह्निकं महाभाष्यम्

२. अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः।
चतुर्दशत्वं कृतवान्कुतः स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम्।। नैषध.१.४

विद्यते। ऋषित्वमूला भारतीयविद्या नवनवोन्मेषशालिनीं प्रज्ञां विना नैव सम्भाव्यते। तस्याः सूत्रभाष्यात्मकोऽनुसन्धानगर्भनिर्भरः प्रवाहः पाश्चात्य-पद्धतिमतिशेते नितान्तम्।

संस्कृतवाङ्मये अनुसन्धानशब्दस्य प्रयोगः संयोगः, विचारः, गवेषणा, अनुसरणम्, इत्यादिषु बहुविधेष्वर्थेषु दृश्यते। मनुस्मृतौ प्रोक्तमस्ति यत्–

यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः ।[१] विचारार्थकोऽयमनु-सन्धानशब्दः। तेजोबिन्दूपनिषदि पुनः अनुसन्धानशब्दः प्रणिधानार्थकः प्राप्यते। तद्यथा–

समाधौ क्रियमाणे तु विघ्नान्यायान्ति वै बलात्।
अनुसन्धानराहित्यमालस्यं भोगलालसम्॥[२]

प्राकृतभाषायामपि विचारार्थकोऽयमनुसन्धानशब्दः अणुसंधानशब्देन लभ्यते। श्राद्धप्रतिक्रमणसूत्रवृत्तौ यथा– 'अत्राणुसंधानपरा सुसावगा एरिसा हुंति' इति। कुमारसम्भवस्य टीकायां मल्लिनाथो गवेषणार्थकम् अनुसन्धानशब्दं प्रयुनक्ति। तद्यथा– 'पुरा इतिवृत्तकथाऽनुसंधेया'[3]–काव्यप्रकाशे 'काव्यानु-सन्धानबलात्' इत्यत्र अनुसन्धानशब्दः सूक्ष्मनिरीक्षणार्थकः सूक्ष्मपरीक्षणार्थको वा प्रतीयते। नादबिन्दूपनिषदि पुनः ध्यानार्थकः शब्दोऽयं प्रतिभाति। तद्यथा–

सर्वचिन्तां समुत्सृज्य सर्वचेष्टाविवर्जितः।
नादमेवानुसंदध्यान्नादे चित्तं विलीयते॥[४]

अनुसन्धानशब्दोऽयम् अनुसमुपसर्गपूर्वकधाधातोः ल्युट्प्रत्यये विहिते सति निष्पद्यते। अतः अनुसन्धानशब्दार्थनिर्णयात् पूर्वं सन्धानशब्दस्य विर्मशो विधातव्यः। संधानशब्दस्य प्रयोगः बहुविधेष्वर्थेषु दृश्यते। तद्यथा–

---

१. मनुस्मृतिः १२.१०६
२. तेजोबिन्दू० 1.40
3. कुमारसम्भवम् 1.21
4. नादबिन्दू. 41

1. **स्थापना**–'सं वस्त्रा दधातन।'[१] (स्थापयत- सायणः) 'सं दधुरर्चन्ननु स्वराज्यम्'[२] (स्थापयाञ्चक्रुः-सायणः)

2. **परस्परानुकूलता**–'सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ।'[३] (आवयोः बुद्धीः परस्परानुकूलाः करोत्वित्यर्थः- सायणः)।

3. **सम्यग् धारणम्**–'ऋतायिनी मायिनी सं दधाते'[४] (सम्यग् धारयतः-सायणः)

4. **आभिमुख्येन स्थापनम्**–'संदधुर्मरुत्वन्तं सख्याय हवामहे।'[५] (आभिमुख्येन स्थापयन्ति-सायणः)

5. **संप्रयोगः**–'त्वे पूर्वाः संदधुः पृष्टबन्धो।'[६] (संप्रयुयुजिरे-सायणः)

6. **संश्लेषः**–'ब्रह्मा च गिरो दधिरे समस्मिन्।'[७] (संधीयन्ते, संश्लिष्यन्ते-सायणः)

7. **सन्निधानम्**–'सं सौभगानि दधिरे पावके'।[८] (सम्यक्, निहितवन्तः-सायणः)

8. **सम्यग् हवनम्**–'त्वे इषः सं दधुः।'[९] (संदधति, सम्यग् जुह्वति-सायणः)

9. **संयोजनम्**–'सं बलं दधुः।'[10] (समयोजयन्- सायणः) 'संधाता सन्धिं मघवा।'[11] (संधाता संयोजयिता-सायणः)

---

1. ऋ. 10.101.5
2. ऋ. 1.80.15
3. ऋ. 10.85.47
4. ऋ. 10.5.3
5. ऋ. 1.10.1.6
6. ऋ. 3.20.3
7. ऋ. 6.38.3
8. ऋ. 6.5.2
9. ऋ. 10.140.3
10. ऋ. 7.82.2
11. ऋ. 8.1.12

10. **सन्धिः**–'एवं कृते तु सन्धाने वृत्रः प्रमुदितोऽभवत्।'[1] (नीलकण्ठः)

11. **संघट्टनम्**–'सरोजसंधानमिवाकरोदयाम्।'[2] (मल्लिनाथः)

12. **धनुषि बाणयोजनम्**–'तदाशु कृतसंधानं प्रतिसंहर सायकम्।'[3]

13. **अभिषवः (मद्यसज्जाकरणम्)**–संधानं स्यादभिषवः।[4]

अनु=पश्चात् सन्धानं स्थापनं संयोजनं वा इत्यनुसन्धानम्। अर्थात् पश्चाल्लक्ष्यप्राप्तिः लक्ष्यानुगमनं वा कस्यचन वस्तुनः सूक्ष्मतत्त्व- निस्सारणं यथा सम्पाद्यते तथैव प्राप्तानां सामग्रीणां सूक्ष्मचिन्तनेन तत्त्वनिस्सारणं तस्य च वाचा समुपस्थापनं लेखनं टङ्कणं वा अनुसन्धानकार्यमुच्यते।

एवम् 1. अज्ञाततथ्यज्ञापनम्

2. ज्ञातस्य परीक्षणं पुनर्विवेचनं वा

3. समीचीना पद्धतिः।

4. ज्ञानसीमाविस्तारः

5. प्रामाणिको निष्कर्षः सत्त्वनिस्सारणं वा

एतानि पञ्चतत्त्वानि अनुसन्धानकार्येण द्योतितानि भवन्ति।

वस्तुतः अनुसन्धानकार्यस्य मूल्याङ्कने निम्नलिखितानामुपबन्धानां प्रावधानं विद्यते। अर्थात् शोधप्रबन्धस्य परीक्षणार्थं ध्यातव्या बिन्दवो भवन्ति यत्–

1. शोधप्रबन्धे नवीनानां तथ्यानामन्वेषणेन अथवा उपलब्धानां तथ्यानां सिद्धान्तानां वा नवीनतया व्याख्यानेन भवितव्यम्।

---

1. म.भा. 5.10.33
2. कु. 5/27
3. अभिज्ञानशाकुन्तलम् 1
4. अमरकोशः 2.10.42

2. शोधप्रबन्धः इदं द्योतयेद् यद् अनुसन्धानकर्तरि समीक्षणविचक्षणता विद्यते इति।

3. शोधप्रबन्धोऽयं विषयस्य अध्ययने योगदानं विदधाति अथवा विषयस्य ज्ञानक्षेत्रसीमां विस्तारयति।

4. विषयप्रतिपादनदृष्ट्या शोधप्रबन्धः उत्कृष्टा कृतिः वर्तते अर्थात् भाषा-शैलीदृष्ट्या तत्र सौष्ठवं विद्यते येन तस्य प्रकाशनार्हता विद्यते।

उपर्युक्तशोधसमीक्षणसूत्राणां विश्लेषणेनानुसन्धानस्य पञ्च मूलतत्त्वानि भवन्तीति ज्ञायते–

1. नवीनतथ्यानामन्वेषणम्।
2. समुपलब्धानां तथ्यानाम् अथवा सिद्धान्तानां नवीनतयाख्यानम्।
3. विषयविशेषस्य ज्ञानसीमाविस्तारः अथवा शोधकार्यस्य विषयविशेषे योगदानम्।
4. प्रतिपादनकौशलम्।
5. प्रामाणिको निष्कर्षः।

मूलतः एतानि पञ्च तत्त्वानि अनुसन्धानकर्मणि अनिवार्यतया अपेक्षितानि भवन्ति। मौलिकं यत् कार्यं भवति तदेव अनुसन्धानकर्त्तुः वैशिष्ट्यं द्योतयति अर्थात् तदेवावदानं स्वीकृत्य तस्मिन् क्षेत्रे अनुसन्धान-कर्त्तारो विषयविशेषज्ञास्तमुद्धरन्ति निर्दिशन्ति च तस्य सिद्धान्तं समीक्षणं वा। अतः मौलिकता योगदानं वा विषयस्य ज्ञानसीमाविस्तारो वा अनुसन्धानतत्त्वेषु मूर्ध्नि स्थितं तत्त्वम्। प्रतिपादनकौशलस्यापि भवति महत्त्वं विशिष्टम् अतीवप्रकृष्टतरमपि अनुसन्धानकार्यं यदि सुष्ठुतया न प्रतिपाद्यते तदा तस्य प्रभावः विलम्बेन भवति अथवा किञ्चिन्न्यूनो भवति। उदाहरणार्थम्– साहित्यस्य अध्यापको भवेद् वा गणितशास्त्रस्य, यदि तस्य

अध्यापनकौशलं नास्ति तदा साहित्ये सरसमपि वस्तु नीरसं भाति, छात्राश्च उद्विग्ना भवन्ति। यदि तस्य अध्यापनकौशलं विद्यते तर्हि गणितशास्त्रेऽपि नीरसमपि वस्तु सरसं भाति छात्राश्चानुरञ्जिता भवन्ति। अतः प्रतिपादनकौशलस्य महत्त्वं सर्वत्र स्वीकृतमस्ति किन्त्वेतन्महत्त्वं विषयसापेक्षं भवति इति समीक्षकाणां सिद्धान्तः।

एवमेव नवीनतथ्यानामन्वेषणमथवा समुपलब्धानां तथ्यानामथवा सिद्धान्तानां नवीनतयाख्यानमपि सापेक्षिकं महत्त्वं बिभर्ति। एतच्च महत्त्वं प्रायः अनुसन्धानविषयाश्रितं भवति। यथा वैज्ञानिकविषयाणामनुसन्धाने तथ्यस्य महत्त्वमधिकमस्ति तथैव साहित्यिकानुसन्धाने चिन्तनस्य। कतिपयविषयाः विज्ञानसाहित्ययोर्मध्यवर्त्तिनः सन्ति यथा– इतिहासः समाजशास्त्रम् पुरातत्त्व-शास्त्रम्, अर्थशास्त्रवाणिज्यशास्त्रराजनीतिशास्त्रादयः। एतेषु विषयेषु तथ्यचिन्तनस्यापि च महत्त्वं विद्यते। उपर्युक्तविवेचनेनेदं निष्कर्षतः वक्तुं शक्यते यद् एतानि पञ्च मूलतत्त्वानि सर्वत्र अनुसन्धानकार्ये किञ्चिन्न्यूना-धिक्येन प्रवृत्तानि भवन्ति।

अनुसन्धानकार्यस्य अर्थात् स्वीकृतविषये विहितानुसन्धानस्य सम्यक् प्रस्तुतीकरणं नितान्तमपेक्षितं भवति तच्च प्रविधिमपेक्षते। अयं प्रविधिः एव आङ्गलभाषया टेकनीक (Technique) पदेनोच्यते। एवमनुसन्धानप्रविधेः तात्पर्यमस्ति यद् विहितानुसन्धानस्य साधु प्रस्तुतीकरणम् इति। साहित्यिका-नुसन्धानकार्यस्य समुचितसमुपस्थापनार्थम् अधोलिखिताः केचन प्रकाराः भवन्ति–

1. अनुपलब्धानां नवीनतथ्यानां वा प्रकाशनं नूतनतयाख्यानं च।
2. समुपलब्धानां तथ्यानां सिद्धान्तानां वा पुनराख्यानं नूतनतयाख्यानं वा।
3. कस्यचिद् ग्रन्थस्य सिद्धान्तस्य वा समीक्षणम्।
4. कस्यचिद् ग्रन्थकारस्य केनचिद् ग्रन्थकारेण सह तुलनात्मकं समीक्षणम्।

5. कस्यचिद् ग्रन्थस्य केनचिद् ग्रन्थेन सह तुलनात्मकमध्ययनम्।
6. कस्यचिद् पाण्डुग्रन्थस्य पाठानुसन्धानपूर्वकं समीक्षात्मकं सम्पादनम्।
7. कस्यचिद् पाण्डुग्रन्थस्य एकलपाण्डुग्रन्थसम्पादनपद्धतिमाधृत्य सम्पादनं समीक्षात्मकमनुशीलनं वा।
8. कस्यचिद् ग्रन्थस्य ग्रन्थकारस्य वा अवदानमाधृत्य समीक्षणम्।
9. कस्यचिद् ग्रन्थस्य मानवजीवनसम्बद्धविषयदृष्ट्या समीक्षणम्।
10. प्रतिपादनपद्धतिः।

उपर्युक्तेषु दश प्रकारेषु निखिला अनुसन्धानसामग्री यथावश्यकं समुपस्थापनीया भवति। सङ्कलितानां सामग्रीणां समुचितमनुशीलनं विधाय सुव्यस्थिततया शोधप्रबन्धो निर्मातव्यः। सुव्यवस्थितशोधप्रबन्धस्य निर्माणे त्रिविधः बन्धो भवति–

1. पूर्वबन्धः–

शोधप्रबन्धस्य आरम्भे पूर्वबन्धो भवति। अस्मिन् बन्धे मुख्यतः निम्नलिखिताः विषया भवन्ति–

क. भूमिका
ख. विषयानुक्रमणिका
ग. सङ्केतसूची प्रभृतयः।

2. मुख्यबन्धः–

मुख्यबन्धे समग्रस्य अनुसन्धानकार्यस्य अध्यायानुसारिणी प्रस्तुतिः भवति। अस्मिन् बन्धे अन्ततः अनुसन्धानस्य उपसंहृतिः समुपनिबद्धा भवति।

3. पश्चबन्धः–

शोधप्रबन्धस्य अन्तिमो भागः पश्चबन्धो भवति। अस्मिन् बन्धे मुख्यतः निम्नलिखिताः विषया भवन्ति–

क. परिशिष्टानि,

ख. सन्दर्भग्रन्थाः

ग. सहायकग्रन्थाः

घ. नामानुक्रमणिकादयः

शोधप्रबन्धस्य पृष्ठाङ्कनं सावधनतया करणीयं भवति। विषयानुक्रमणिकायाञ्च तेषां यथाविषयं समुल्लेखो विधीयते। येन पाठकः स्वेच्छया स्वविषयविशेषं सहजतया प्राप्तुं समर्थो भवति।

शोधप्रबन्धस्याकारो नातिलघु नातिदीर्घो वा विधातव्यः। अतिविशालं शोधप्रबन्धं दृष्ट्वा परीक्षका अपि उन्मनायन्ते समग्रं शोधप्रबन्धं परीक्षितुम्। फलतः शोधकार्यस्य सम्यक् परीक्षणं न भवति। शोधप्रबन्धस्य विशालतायाः प्रायः निम्नलिखितानि कारणानि भवन्ति-

1. शोधप्रविधेरज्ञानम्।
2. संगृहीतसामग्रीणां विश्लेषणनिपुणताभावः।
3. अनुचितविषयविभाजनम्।
4. शोधकर्त्तुः त्वरा।
5. निर्देशकस्य उपेक्षा।

एवं तदेवानुसन्धानं वस्तुतः अनुसन्धानं भवति यत् सर्वतो भावेन यथाशक्ति निर्दुष्टं ज्ञानस्य समुन्नायकं भवति। इदानीं यावत् यत् किमपि ज्ञानं मानवेन समासादितं तत्सर्वम् अनुसन्धानस्यैव फलमस्ति। भौतिकजीवनेऽपि प्रतिदिनमुपयुज्यमानं निखिलमुपकरणम् अनुसन्धानस्यैव परिणामविशेषो विद्यते।

अनुसन्धान-प्रयोजनम्, अनुसन्धाता च

लेखकः - डॉ. रघुवीरशरणः
अनुवादकः - डॉ० रामसलाहीद्विवेदी

"अथातो ब्रह्मजिज्ञासा" इति वेदान्तवाक्यं न केवलम् भारतीयानुसन्धानस्य, अपितु विश्वस्याऽपि प्रस्थानवाक्यं वक्तुं शक्यते। प्राणिमात्रस्य विकासाय जिज्ञासैव पूर्णतया कार्यं करोति, एवञ्च सैवैका मूलवृत्तिः। परन्तु जिज्ञासा नाम शुद्ध-जिज्ञासा, यस्यां लाभस्य वैयक्तिकस्वार्थ-सन्तोषणदृष्ट्याश्चाभावो भवति, सा मनुष्येष्वेव परिदृश्यते। वस्तुतः "ब्रह्म-जिज्ञासैव शुद्धजिज्ञासा वर्तते यया यत्साहाय्येन वा मनुष्यो निरन्तरं क्लिष्टातिक्लिष्टानुसन्धानेषु गूढातिगूढ-वस्तु-स्वरूपाणामन्वेषणे च प्रवृत्तो वर्तते। जिज्ञासा-स्वरूपेण शैलीभेदेन वा विविधानि शास्त्राणि उद्भ्रियन्ते। भारतवर्षे पूर्वत एव अनुसन्धानं शास्त्रीय-पद्धतिरूपेण सर्वैं र्मतं वर्तते। अनया जिज्ञासयैवास्मभ्यं विकासशील-शास्त्राणि प्रदत्तानि। भगवता श्रीकृष्णेन गीतायामुक्तम् :—

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम्।। १६/२३

यः शास्त्रविधिम् उत्सृज्य स्वेच्छानुसारेण कर्म करोति, तेन न सिद्धिः, प्राप्यते न च परमा गतिः।

अतो भगवता पुनरुच्यतेऽग्रे—तस्माच्छास्त्रं प्रमाणान्ते कार्याकार्य-व्यवस्थितौ। त्वत्कृते "किं कर्तव्यं किमकर्तव्यं वा" इति व्यवस्थायां शास्त्रमेव प्रमाणमस्ति।

अन्यप्राणिनो न्यूनाधिकवर्तमाने जीवन्ति। तेषां दीर्घायमानोऽतीत एवञ्च तेषामभ्यास एव तेषु संस्काररूपेण दृढीभवति। यो हि तेभ्यो वंशानुक्रमे प्राप्यते। स एव संस्कास्तान् वशीकरोति, एवञ्च तेषां स्वतन्त्रतां प्रबाध्य तान् बद्धान् करोति।

परन्तु मनुष्यस्त्रैकालिको वर्तते। स भूत-भविष्य-वर्तमानेषु त्रिष्वपि कालेषु जीवति। तस्योद्देश्यमेतादृशमपि भवति, यदेकस्मिन् जन्मनि न समाप्यते। अनेकजन्मपर्यन्तं चलति।

एतन्नावश्यकं निश्चितं वा यत् – य आम्रवृक्षारोपणं करोति, तत्फलं तेनैव प्राप्येताथवा तस्य फलानि आरोपणकर्तुर्जीवनपर्यन्तमेव परिणमितानि स्युरिति अतः तथैवैतानि शास्त्राणि तद्विधीन् च निरन्तरं प्रयुज्य अर्थात्-तत्स्थानि यानि नूतनज्ञानानि, उपकरणानि तथा तज्जनिततन्त्राणि तेषां प्रयोगात् तानि शास्त्राणि सूक्ष्मातिसूक्ष्माणि क्षिप्रातिक्षिप्राणि कर्तव्यानि मनुष्यैः। अन्यथा शास्त्राणि जीर्णानि भूत्वा सर्वैरुपेक्षितानि भविष्यन्ति। मध्ययुगे कबीरेण भारतीयानामजागरूकतया ...पन्नैषा पुरातन-मोहग्रस्ता स्थितिः सम्यक्तया परिचिता ज्ञाता वासीत्। स शास्त्रविरोधि नासीत् अपितु जिज्ञासाहीनताविरोधीसः। सोऽजागरूकताविरोधीन आसीत एवञ्च स विरोधीनः आसीत् नूतनतथ्योपेक्षितानां जनानाम्। अर्थात् सोऽनुसन्धानरहित-जीवनस्य विरोधे प्राक्तन तथ्यानुमोदितकुटीरस्य नवीनप्रकाशरूपां लत्ताम् उन्नमय्य जागरुकीभूतान् निर्गतमोहान् स्वाग्रहोपेक्षायै सुसज्जितान् जनान् आकारयन्नासीत् तस्य मनः शास्त्र-परिशोधनाक्रियमाणैर्जनै सह एकीभवितुं कथमपि न शक्नोति स्म। तथाहि स प्रत्यक्षान् प्रकटान् च सत्यान्, जीवनजटिलतां कृन्ततः सत्यान् प्रमाणीभूतेन=प्रमाणरूपेण उपस्थापयितुकामोऽभूत्। शास्त्रपरिशोधिनं सऽतिपण्डितं मन्यते स्म। किमर्थमिति चेत् शोधी निरन्तरं जागर्ति परन्तु पण्डितः शास्त्राणि कण्ठस्थानि कृत्वा पुनः शेते। सः शास्त्राणि न शुध्यति। कबीरः कथयति–

पाण्डे! मेरा तेरा मनवा कैसे एकै होइ रे।

तू कहता कागद की लेखी मैं कहता आँखिन की देखी।

मैं कहता सुरझावनहारी तू राखत उरझाई रे।

मैं कहता हूँ जागत रहियो तू जाता है सोइ रे। पाण्डे . . .

पण्डितानुसन्धात्रोर्भेदो वर्तते। भेदोऽयं तथैव यथा व्याख्यातृ-वैज्ञानिकयोः। उभयोस्तेजासि अपि भिन्नानि। अनुसन्धातृतेजोऽवलोक्य बृहतो धर्माचार्या अपि आश्चर्यचकिता भवन्ति।

सम्भवतः भारते "ब्रह्म-जिज्ञासायाः पारम्परिक-प्रशिक्षाकारणात् एवञ्च तस्यानुशासकनियमानामभ्यासात् एतद् देशं विहायान्येषु देशेषु नवीनशोधकैः प्राणदानमपि दत्तम् आत्महत्याकृताग्निदाहेन। अथवा पण्डित-निर्मिताभिः राजनैतिक-सामाजिक-धार्मिक मान्यताभिः। तथापि वस्तुतो याथार्थ्यमिदमेव यत् एतैरेव शोधकैर्जीवनगतिः परिवृत्यते। यदा समे प्राणिनः स्वपन्ति तदा इमे शोधकाः आदिवसं जाग्रति तथा यदा विश्वं जागर्ति न केवलं कायेन अपितु आत्मना विचारेण वा तदा शोधिनो ब्रह्मजिज्ञासायां सुप्ता इव निमग्ना भवन्ति। कबीरेण यत्र "सतगुरु समान को सगा" इति पङ्क्त्या सद्गुरु-महत्त्वं ज्ञापितं तत्रैवैतदपि उक्तं यत् "सोधी की सी दाति" न भवति।

शोधिनो व्यक्तित्वं तस्य शोधि-स्वभावप्रभावेणैव हि तादृग् प्रखरं भवति यत् दीर्घकाले जायमाने व्यतीतेऽपि वा स आधुनिक इव पृथक् परिदृश्यते सर्वैः।

यथा काव्य-प्रयोजनानि भवन्ति तथैव तादृशानि एवानुसन्धान-प्रयोजनान्यपि भवन्ति। तानि च निम्न-लिखितवर्गेषु विभाजयितुं शक्यन्ते–

१. ज्ञानक्षेत्रस्य सीम्नो विस्तारः। २. वैज्ञानिक-पद्धत्याः निर्धारणं प्रशिक्षणञ्च। ३. अर्थप्राप्तिः। ४. कीर्तिकामना। ५. शुद्धसत्यान्वेषणस्यादम्य-नायास्तृप्तिः।

एतेषु विषयेष्वस्माभिः पृथक्-पृथग् विचाराः प्रस्तूयन्ते। –

१. ज्ञानक्षेत्रस्य सीम्नो विस्तारः –

शोधस्याधुनिकविज्ञानं वार्तामेतां स्वीकरोति यत् कस्यापि ज्ञानस्य चरमोपलब्धिः सकृद्=युगपद् भवितुं न शक्नोति। सामर्थ्यम् उपायसाधनाभ्यां सम्बद्धमस्ति। पुनश्चायमपि नावश्यको यत् एक एव जनः, एक एव युगो यस्मिन् कस्मिन्नपि विषये ज्ञानस्यान्तिमस्वरूपस्य निराकरणं कुर्यात्। ज्ञानम् एका विकासात्मिका विधाऽस्ति सा च ज्ञात्रा तथा तस्य युगसाधनैर्बद्धा भवति। प्रायशः उपलब्धं ज्ञानं विस्मृत्या अन्धकोष्ठे लीनं भवति। वयं स्वस्याभिमानेन आधुनिकतायाः वा मन्यामहे यदस्माभिर्नवीनन्तथ्यमवगतम्। स्वस्य जातिश्रेष्ठताया अभिमानेन मन्यामहे यत् अन्या जातय अस्मत् निम्नतराः। अस्योदाहरणानि प्रचुरमात्रायां सम्प्रति सर्वैरस्माभिः द्रष्टुं शक्यन्ते। यथा –

यदा यूरोपदेशवासिभिः एषा वार्ता प्रचारिता यत् "पृथ्वी सूर्यस्य परिक्रमां करोति एवञ्च तस्या अन्वेष्टा "कोपरनिसः" अस्ति" इति तदास्माभिरपि तदेवानुसृतं परं यदास्माभिः संस्कृतस्य ज्ञान-विज्ञानग्रन्थाः परिलोकिताः अन्वेष्टाः एवञ्च तत्र शोधः कृतस्तदा ज्ञातो यत् "पृथ्वी सूर्य-परिक्रमां करोति" इत्यस्यादिरुपदेष्टा "आर्यभट्टः" आसीत्।

अनेनैव प्रकारेण आयुर्वेदिक-ओषधीनामन्वेषणेन तद्गतानुशीलनेन "अतिरक्तचाप" नाम्नः रुजायाः "सर्व-गन्धा"-दयः ओषधयः पाश्चात्त्यभिषग्भिः प्राप्ताः एवमेतदपि सिद्धं यत् तद्व्यतिरिक्ताः अन्या ओषधयस्तस्या रुजः न सन्तीति। तथैव काम-कलासम्बन्धे स्वातिरिक्तान् अन्यान् हीनान् वन्याञ्च मन्यमानाः यूरोपदेशीयाः स्वयमेवैतत् स्वीकृतवन्तो यदस्मिन् विषये वन्यजातयः चीनदेशीया भारतीयाश्च तेषामपेक्षया अधिकाः सन्ति। कथनस्य तात्पर्यमिदं यत् ज्ञाने कस्यापि जातिविशेषस्य युगविशेषस्य समाजविशेषस्य चैकाधिकारो न भवति। समानपरिस्थितिषु सतीसु एवं समान-तर्कणायां विद्यमानायां प्रत्येकस्मिन् क्षेत्रे मनुष्याः समानमेव ज्ञानं

प्राप्तुं शक्नुवन्ति। ज्ञान-प्राप्त्यर्थं मार्गा उपायास्त वा भिन्ना भवन्ति। ज्ञानोपलब्धेः कामना ब्रह्मजिज्ञासाया इव स्वगन्तव्यप्राप्तेरनन्तरमेव भवति।

ज्ञानविस्तारस्याभिप्रायोऽयमपि वर्तते यत् विषयाध्ययनाय नवीन-तथ्यान्वेषणम्, प्राचीनमान्यतासु परिशोधः एवञ्च तस्य सुव्यवस्थितीकरणं करणीयम्। हिन्द्याम् अनेकानि शोध-कार्याणि "एक पुनर्मूल्याङ्कन", "एक पुनर्विवेचन" इत्यादि-शीर्षकान्तर्गते प्रस्तुतानि सन्ति।

२. वैज्ञानिकपद्धत्या निर्धारणं प्रशिक्षणञ्च-

मानवो ज्ञानार्जनं कृत्वा जीवनपथे अग्रायते=अग्रो भवति, परन्तु स वाञ्छति यत् तेनार्जितं ज्ञानं परम्परानुसारेण तस्यापत्यान्यपि अर्जयेः, अतः स तादृशीमेवशिक्षां तेभ्यो ददाति। यदि ज्ञानप्रदान-पद्धतिः श्रमकारिका स्यात् यदि तां नूतनः तां ग्रहीतुं नेच्छति। वयं सर्वेऽपि सम्प्रति पश्यामः पठामश्च समाचारपत्रेषु यत् अंग्रेजी-शिक्षायाः स्तरं प्रतिदिनं न्यूनायते, सा च वैज्ञानिकशैल्या श्रेष्ठतया=पाठनीया। एतदर्थं भारतसर्वकारेण अंग्रेजीम् अन्यबैदेशिकीभाषाश्च प्रशिक्षयितुम् एकं संस्थानं निर्मितम्। फ्रेंच-भाषायां प्रशिक्षणं संशोधनकार्यञ्च तत्रस्था अकादमी अन्वेषणपूर्वकं सम्पदयति। एतादृशः प्रयासः अस्माकम् नगरेष्वपि निरन्तरं जातः आसीत्, येन वैज्ञानिक-विकासो जातः। नीतिशास्त्रे, अध्यात्मदिशायां शिल्प-विद्यायाञ्च तादृशाः प्रयासाः सिद्धा एव, परं तैः सह भाषाक्षेत्रेऽपि प्रयासोऽयं जातः। पाणिनेः "अष्टाध्यायी" अपि संस्कृतशिक्षायाः कृते पूर्वचर्चिताया एव वैज्ञानिकपद्धत्याः निर्धारण-शिक्षयोः परिणामरूपाऽस्ति। यां दृष्ट्वा जगत् अद्याऽपि विस्मितं भवति यया च ऐन्द्रं व्याकरणं शिक्षाक्षेत्रात् पृथक् कृतम्।

३. अर्थप्राप्तिः –

शोधस्यैकं प्रयोजनमर्थ-प्राप्तिरपि विद्यते। यथा काव्यम् अर्थकृते भवति तथैव शोधोऽपि। आधुनिकयुगे व्याख्यातृ-पदप्राप्त्यर्थं शोधकार्यानुभवः अनिवार्यः कृतः सर्वकारेण। इतः पूर्वं प्रान्तीयसर्वकारः शोध-उपाधिप्राप्ता-ध्यापकेभ्यः वेतनवृद्धिद्वयं ददाति स्म, येन जनाः शोधकार्यार्थम् अग्रेसरा

अभवन्। व्यावसायिक-क्षेत्रे अनेकं शोधकार्यं कारयित्वा स्वनिर्मितानि वस्तूनि एवञ्च बहुधनलाभं कुर्वन्ति।

कदाचित् वैयक्तिक-शोधकार्याण्यपि भवन्ति, यानि ते शोधका एव निश्चितशुल्कं गृहीत्वा बृहद्-व्यावसायिकेभ्यो विकृणते। अथवा तं स्वयमुपयुज्य तच्छोधबलेन वस्तुनिर्माय धनानि लभन्ते। अनेन प्रकारेण मानवसुविधा-विकासे शोधः सहायतां करोति।

४. कीर्तिकामनाः –

शोधकार्यं यशः प्राप्त्यर्थमपि क्रियते यथा काव्यम्। स्वयोग्यतां प्रदर्शयितुं गौरवं स्थापयितुञ्च शोधकार्यं क्रियते जनैः। हिन्द्यां रीति-साहित्ये केशवदासेन कीर्ति-कामनया प्रेरितो भूत्वा "साहित्यालोचनपद्धत्याः" स्थापना कृता। यस्यां कीर्तिकामिनामाचार्याणां समुदायो निरन्तरं राजगृहे रीतिशास्त्रस्य नायिकाभेदादि-ऊहापोहे तर्कवितर्के संलग्न आसीत्। सम्प्रति "हरि औधस्य" "रस कलश" एतदर्थमेव स्मर्यते यत् तेन कविना नायिकाभेदे स्वयं-सेविका-सदृश-गांधीवादिनायिकानां समावेशं कृत्वा क्षेत्रमिदं विस्तृतम्-विस्तारीकृतम्। इतः पूर्वं केशवेन "बीभत्से" "शृंगारस्य" तथा "भयानके" वीरादिरसानां परिपाकः "रसिकप्रिया" नामको ग्रन्थः कृतः आसीत्। एतादृशेषु शोध-प्रयोजनेषु नवीनतथ्यानाम्, अन्यस्य त्रुटीनाञ्च चोद्घाटनस्याग्रहः अधिको भवति। लोक-हितभावनामाश्रित्य एतादृशं शोधकार्यं महिम-मण्डितं भवति। यथा लुई पाश्चरस्य "कुत्ते के काटे का टीका" अथवा विजयकामनया कृतं भारतीय-नभः सेनाया "नेट" नामकं युद्धकं वायुयानम्।

५. शुद्धसत्यान्वेषणस्यादम्यलालसायास्तृप्तिः –

मानवो निरन्तरं स्वकामनां पूरयितुं रतो वर्तते। यः तस्यात्मनः एकः प्राकृतिकगुणो ऽस्ति। यथा भावनाः सर्वेषु विद्यन्ते परं तत्प्रकाशनसामर्थ्यं केषुचिदेव भवति एवं ते सर्वत्र कवित्वेन समाद्रियन्ते। तथैव अन्वेषणस्य, ज्ञानस्य बोधनस्य च वाञ्छा सर्वेषु भवति परन्तु शुद्धसत्यदर्शनस्येच्छां

गृहीत्वाग्रे वर्धमाना केचन एव भवन्ति एवञ्च त एव उच्चकोटिस्थाः शोधिनो भवन्ति। यथा कविता– रचना कवेः मुख्यं अननावश्यक क्रियमाणं च कर्म भवति किमर्थमिति चेत् तां क्रियां विना स जीवितुमपि न शक्नोति तथैव अनुसन्धानमपि अनुसन्धातुस्तादृशमेव कर्म। सत्यान्वेषणे सः शोधी तादृशमेवानन्दमनुभवति यादृशं रसानुभवक्रियमाणाः केचन प्रमातारः अनुभवन्ति। लालसेयं स्वयमेव तृप्ता वर्तते, अस्यां लाभेच्छा, उद्देश्यं, लक्ष्यञ्च अथवा अन्यत् किमपि न भवति। लालसैषा शुद्धानुसन्धान-प्रेमत्वेन उच्यते ज्ञायते चेत्तदपि समीचीनमेव। अस्मिन् विषये सफलतेच्छा गौणी भवति।

एषोऽभिलाषः तमनुसन्धातारं "विविधदेश-सेवित्वेन" जगति प्रतिष्ठापयति। अर्थात् इयं शोध-लालसा तं सर्वत्र विचारणार्थं बाध्यं करोति। यत्र कस्यापि ध्यानं न गतम्, यत्र केनापि दृष्टिपातो न कृतः-तत्र एतत् कर्तुं बाध्यं करोति। अध्यात्मज्ञानम्, तत्त्वज्ञानार्थदर्शनं च उभेऽपि लालसायाः विचरणक्षेत्रे स्तः। एषा अदम्यलालसा सद्गुरुम् अन्वेष्टि न तु "गाइड"–चन्द्रिकाम्। एवञ्च स एव सद्गुरुः अस्या भवति। स एव सद्गुरुः प्रायशः तस्याम् अथवा तस्मिन् अनुसन्धातरि जागर्ति एवञ्च तस्य स्वार्थिस्वभावमपहृत्य तं दातारं करोति। इममेव विषयमनुभूय कबीरेणोक्तम्–"सतगुरु सवाँन को सगा, सोधी सई न दाति।" वस्तुतः शुद्धं शोधं विहाय अन्यत् किमपि दानं दातव्यं वा नास्ति। शोधस्येनया-दम्यलालसया ज्ञानक्षेत्रे अनेके उपकाराः कृताः। अस्यास्तृप्तेः प्राप्यमाना शान्तिः "अथातो ब्रह्मजिज्ञासायाः" शान्तिरस्ति। लालसैषा अनुसन्धानरतायै व्यक्तये नाट्यशास्त्रस्य "रसनिष्पत्तिः" एवञ्च सामाजिक स्तरे "प्रत्यभिज्ञा-दर्शन"स्यानुभूतिरूपमानन्दं प्रददाति। इमाम् अनुसन्धातुः "सद्यः परनिर्वृत्तेः" प्रयोजिकां वक्तुं शक्नुमः।

अनुसन्धान-प्रयोजनानि विचार्य, तत्पश्चात् तद्धेतूनां विचारोऽपि आवश्यकः। अस्य मूले वस्तुतः प्रतिभाया एव नृत्यमस्ति परं तया सह निपुणताया अपि आवश्यकता भवति।

अनुसन्धानस्य प्रतिभा वस्तुतो जन्मत एव भवति सर्वेषु, परं येषु सा प्रस्फुटिता न भवति तेषु अभ्यासैः जागर्यते। यथा लेखान् लेखयित्वा काव्यनि् रचयित्वा कविं निर्मातुं शक्यते तथैवाभ्यासैः प्रतिभा जागरयितुं शक्यते।

(रीतिकाले केशवेन "कवि-प्रियां" विरचय्य नवलेखकानां कृते एवञ्च ततः पूर्वं ज्योतिरीश्वर-ठक्कुरेण "वर्णरत्नाकरं" लिखित्वा गद्यकाव्य-लेखकानां कृते सारल्यं कृतं मार्गप्राशस्त्यञ्च कृतम्। केशवेन तु "रसिक-प्रियां" लिखित्वा रसिकाः निर्मिताः।) तथैव अनुसन्धातारोऽपि उत्पाद्यन्ते=निर्मीयन्ते। अंग्रेजीभाषायां कवीनां कृते उक्तं वर्तते—पोयट्स आर वॉर्न एजबैल मेड? परन्तु पूर्वसंस्कारैर्निसर्गेनाऽपि च आनुसन्धानिकप्रतिभा लभ्यते। "नैपुण्यं" च अनेक-शोधप्रक्रियाणां विधीनाञ्चाध्ययनेन एवञ्च चिन्तनमननाभ्यां प्राप्तं भवति, यत् चाधुनिक-विश्वविद्यालयीयविभागा संस्थानानि च निश्चित-स्तरस्य परीक्षणानन्तरं प्रशिक्ष्य तेभ्योऽनुसन्धातृभ्यो ददति। तस्य नैपुणस्य प्रायोगिकरूपं पाठबोधेऽनुवादे सम्पादने विषयानुसारेण शब्दावली-चयने पादटिप्पणीनां संयोजने संशोधनादौ च दृष्टिगतं भवति।

अत्रास्माभिः अनुसन्धातृणां विशिष्टगुणानाम् आलेखनं कर्तव्यम्। ते च—

१. प्रबल-जिज्ञासा, २. अनुकूलमनोवृत्तिः अभिरुचिश्च, ३. समुन्नतबौद्धिकस्तरम्, ४. प्रतिभा, ५. लगनं तत्परता सहिष्णुता च।

एतेषां संक्षेपेण परिचयदानमुपयुक्तं भविष्यति।

१. प्रबल-जिज्ञासा –

अस्य निबन्धस्य प्रारम्भ एव उक्तम्—अनुसन्धानं जिज्ञासावृत्तेः उत्पद्यते। एतच्च किमर्थम्, कथम्, कस्यां जातिपरम्परायां क्षेत्रे वा, कस्मात्, कुतः इत्यादि-प्रश्नाः वस्तुस्वरूपम् उद्घाटयन्ति। जिज्ञासा स्वस्य गुरुं प्रत्यपि भवति स्वं प्रति अपि भवितुं शक्नोति। परन्तु जिज्ञासैषा चाञ्चल्ययुक्ता धैर्यहीना च न भवेत्। अर्थात् जिज्ञासाशान्तये पूर्ण-परीक्षण-साधन-चयनस्य

धैर्ययुक्ता जिज्ञासा आवश्यकी। प्राचीनशब्दावल्यामेतद् वक्तुं शक्यते यत् अनुसन्धाता विनययुक्तो जिज्ञासुश्च भवेत्। संस्कृतपण्डितैस्तु अविनयिने शिष्याय ज्ञानदानं नरककारकमुक्तम्। वेदे तु विद्या स्वयमेव ऋषीन् प्रति कथयति यत् अविनयिनो मां रक्ष।

२. अनुकूला मनोवृत्तिः अभिरुचिश्च –

अनुसन्धाता चैतद्युक्तो भवेत्। अनुसन्धात्रा स्वजिज्ञासा-शान्तये स एव विषयश्चयनीयः, यस्तस्य मनोवृत्त्यनुकूलः स्यादेवञ्च यस्मिन् तस्य सहजाभिरुचिः स्यात्। इदञ्च समीचीनमेव सत्यमेवास्ति यत् अभ्यास-वैराग्याभ्यां मनो रोधयितुं शक्यते तथा च तत् मनः प्रस्तुतविषयाय बद्धं कर्तुं शक्यते परन्तु कार्यमेतत्तु अत्यन्तविकसितानुसन्धानाभ्यास्येव कर्तुं शक्नोति। यदि अनुसन्धाता यत्र तन्मनो रमते, तमेव विषयं चेष्यति चेत् तत्कार्यं सहजं भविष्यति। प्रायो दृश्यते यत् अनुसन्धातॄ रुचिस्तु कथा-साहित्येऽस्ति परन्तस्मै कवितासम्बन्धि, नाटक-सम्बन्धि वा कार्यं दीयते।

३. समुन्नतबौद्धिकस्तरम् –

अयं गुणोऽनुसन्धातरि परमावश्यकः। अन्यथा सः स्वविषये न्यायं कर्तुं न शक्ष्यति अथवा यदि गुरुकृपया सः पारं कुर्यात् तथापि दीन-हीन एव भविष्यति तथा च शोधगौरवं तद्गरिमाणञ्च वोढुमसमर्थ एव भविष्यति। अधुना प्रायः उपाधिप्राप्ताः निस्तेजसः "डॉक्टराः" दृष्टिगता भवन्ति, येषां विषये सामान्यजनाः "डॉक्टराः" दृष्टिगता भवन्ति, येषां विषये सामान्यजनाः "अयं रुग्णरहितो डॉक्टरः=वैद्यः" इत्युक्त्वा परिहसन्ति। एतदपि नास्ति यत् बौद्धिकस्तरं समुन्नतं कर्तुं न शक्यते। शक्यते, तच्च सद्गुरुभिः सह विनयपूर्वकम् अद्यतनग्रन्थानां दुर्लभग्रन्थानाञ्चाध्ययनेन। अस्मिन् कार्ये समयस्तु अधिक एव अपेक्ष्यते परन्तु एतस्मिन् क्रियमाणे सति अनुसन्धातरि आत्मबलं दृढी भवति। ज्ञानमेव स्वयं शक्तिरूपम्" इत्युक्तं वर्तते। समुन्नतबौद्धिकस्तरनिर्माणम् अनुसन्धान-विषयकपूर्वसाहित्यानां तदवलम्बितग्रन्थानां चाध्ययनेन, तस्य व्याप्तिं हृदयंगमां कृत्वा एवञ्च तत्साहित्यसंस्काराणां स्मृतिपटले दृढीकरणेन

भवति। एतेन सह शोधिनाऽपि स्वबोधनतीव्रताऽपि वर्धि-तव्या। तस्यां च मतौ नवोन्मेषकारिणी कल्पना कल्लोलं कुर्यात्, सा विवेकसंयमाभ्यामनुशासिता स्यात्, तस्यां स्वप्नशीलता अर्थात् अनुमानतर्काधारिता स्वयं मानसिकनिर्माणशक्तिः स्यात् एवञ्चानुसन्धाता तस्याः युक्तियुक्ततया परीक्षणं कुर्यात्।

अनेन प्रकारेण युक्तियुक्ता सा निर्ममा भावावेशहीना च भवेत्। तेन यदि तस्याः पूर्वधारणाः मान्यताश्च कदाचित् अपतिष्यन् तदा ताः निर्व्याजा निर्गतमोहा च भूत्वा पतन्त्यस्ताः दृष्ट्वा पुलकिता भवेत्। एवञ्च स्वबुद्धिं सर्वदैव पूर्वोक्तधर्म-युक्तां करणार्थं अनुसन्धात्रा मानसिक-सन्तुलनं कर्तव्यम्। पूर्वमान्यताकारणेन च यदि बुद्धिः कदाचित् पक्षे विपक्षे वा गच्छेत् तदा तामवरोद्धुं समर्थः स्यादनुसन्धाता। किमर्थमिति चेत्-बुद्धिर्यत्र मार्गमवलोकयति, यदि तत्रैव मनोरागयुक्ता भविष्यति चेत् तद्वदेवाचरणं करोति सम्पूर्णं विश्वन्तस्यैव रंगे रंगायमाणं प्रतिभाति।

यदा-कदा मनः एकस्मिन् पक्षे चेतति तदा तत् अन्यपक्षेषु पथिषु वा दृष्टिपातं न करोति। षड्दर्शनानामुपहासे षड् अन्धानां या कथा सत्यान्वेषणविषये, अनुसन्धाता तस्याः स्मरणं कुर्यात्। जैनदर्शने गूढ-तत्त्वान्वेषणाय "स्याद्वादस्य" सप्तभंगिनो मानसिक-सन्तुलनविषये बृहदेवाग्रहो वर्तते। कथनस्य तात्पर्यमेतदस्ति यत् अनुसन्धात्रा अनेकान्त-वादित्वेन, अनेकदृष्टिवादित्वेन च भाव्यं न तु एकान्तवादित्वेन हठवादित्वेन च।

४. प्रतिभा –

अनुसन्धाता प्रतिभावान् भवेत्। प्रतिभायाः विषयेऽस्माभिः पूर्वमुक्तमेव। सा द्विविधा भवति-कारयित्री ग्राहयित्री च। कारयित्री कवीनाम्, रचयितृणाञ्च सहायतां करोति तथा ग्राहयित्री समालोचकानां व्याख्यातृणां च। अनुसन्धाता तु द्विविधामेव प्रतिभामुपयुनक्ति। अनेकत्र त्रुटिताः चित्रांशा भवन्ति तान् सः स्वस्य ग्राहयित्रीप्रतिभया सह कारयित्रीप्रतिभामुपयुज्य पूर्णान् करोति। एवं पुनः अनुसन्धाने प्रवृत्तो भवति। कदाचित् रचनां

नवीनतथ्यानि च दृष्ट्वा हृदयङ्गमं करोति। अनुसन्धात्रास्वहृदयं कलाकारत्वेन समालोचकत्वेन सामाजिकत्वेन च परिणमनीयम्। इदञ्चात्यन्तावश्यकम्।

५. लगनं तत्परता सहिष्णुता च –

विविधासु बाधासु समस्यासु च सतीष्वपि निरन्तरम् अग्रेसरो भवितुम् अनुसन्धातुः कृते एते गुणाः परमावश्यकाः। पूर्वोक्तगुणानां समुच्चय एव श्रीमद्भगवद्गीताया अव्यभिचारिणी भक्तिः। तुलसीदासकविना एतमेव "अनपायिनी-भक्तिमुक्त्वा सर्वत्र अस्य वाञ्छा कृता अस्ति।

लगनमेवानुसन्धातारं मनोविचलनात् अवरुणद्धि। तेन सः स्वकार्ये रतो भवति। आरम्भशूरो भूत्वा पुनर्न शेते। लगनमेव तस्य हृदि कार्यसमाप्तिपर्यन्तम् आशा-विश्वासरूपकं दीपकं प्रज्वालयति।

तत्परता तस्मै अनुसन्धात्रे सन्नद्धता, योजनाबद्धकार्यकरणस्य क्षमताः, स्वविषयान्वेषणक्षमतां समयोचितकार्यकरणस्य क्षमता च ददाति। प्रायशः अनुसन्धात्रा स्वसाधनानि स्वविषयञ्च स्वसुविधां त्यक्त्वाऽपि ज्ञातारं प्रति प्रापणीयानि भवन्ति।

सहिष्णुतायां कष्ट-सहनक्षमता प्राप्यते। धैर्यस्य परीक्षा भवति। ये अनुसन्धातॄन् स्वलक्ष्यात् विचालयन्ति, तादृशानां गाइडानां साक्षात्कारे सति यदा अनुसन्धाता विचलति तदा सहिष्णुता तस्य सहायतां करोति।

अनुसन्धानप्रक्रिया पद्धतिश्च

लेखकः - डॉ. कृष्णलालः

अनुवादकः - डॉ. रामचन्द्रशर्मा

संस्कृते ये शोधकार्यं कर्त्तुं प्रवृत्ता भवन्ति, ते विद्याया एतादृशे क्षेत्रे प्रविशन्ति यस्य सम्बन्धः प्राचीनार्वाचीनाभ्यामुभाभ्यामप्यस्ति। केवलमर्वाचीनेनास्मात्कारणान्नहि यत्संस्कृतेऽद्यापि प्रभूतवाङ्मयस्य रचना भवति, प्रत्युत अस्मात्कारणादपि यत्-यत्किञ्चित् प्राचीनमस्ति तदर्वाचीनात्पृथक्कर्त्तुं न शक्यते। प्राचीनस्याधारेणास्माभिरेकमुज्ज्वलमर्वाचीनं निर्मेयमस्ति।

विषयनिर्धारणानन्तरं शोधच्छात्रैः सर्वप्रथमं स्वविषयसम्बद्धस्य वाङ्मयस्याध्ययनं करणीयम्। अनेनेदं ज्ञानं भविष्यति यत्- तस्मिन् क्षेत्रे कियत्कीदृशञ्च कार्यं सञ्जातम्! तस्य का दिगासीत्! अग्रे च कियत् कीदृशञ्च कार्यमपेक्षितमस्ति! यदि शोधार्थी कस्मिंश्चित् एकस्मिन्, अधिकेषु ग्रन्थेषु, ग्रन्थांशेषु वा कार्यं कुर्वन्नस्ति तदा कदापि प्रथमतः साक्षात् तस्य ग्रन्थस्य, ग्रन्थांशस्य, ग्रन्थानां ग्रन्थांशानां वा अध्ययने त्वरा न करणीया अपितु तत्सम्बद्धमन्यवाङ्मयं सर्वप्रथममध्येयं, येन विषयं प्रति दृष्टिः सुस्पष्टा भवेत्। विषयसम्बद्धैः पूर्ववर्त्तिविद्वद्भिः मान्या आलोच्या वा ये केऽपि सिद्धान्ताः प्रतिपादिताः स्युः, तेषामुद्धरणं सारांशो वा स्वसमीपेऽङ्कितः करणीयः। इदमवश्यमवधातव्यं यत्-यत्किमपि पुस्तकमध्ययनविषयं स्यात्तस्य पुस्तकसूचीनिर्माणाय पृथक्-पत्रेषु तस्य पूर्णं विवरणं,-यथा-लेखक-पुस्तक-प्रकाशक-प्रकाशनस्थल-वर्षनामादिकमङ्कितङ्करणीयम्। अनेन शोधान्ते पुस्तकसूचीनिर्माणकाले काठिन्यं न भविष्यति। बहुबारं तेषां पुस्तकानां

पुनः प्राप्तिः असम्भवा न स्यात् किन्तु कठिना अवश्यं भवति। विषयसम्बद्धानां विभिन्नपुस्तकानां प्राप्त्यर्थं प्रमुखपुस्तकालयानां ज्ञानमप्यत्यावश्यकं यत्र तानि प्राप्तानि स्युः।[१]

कतिपयावश्यकग्रन्थानां शोधस्थलेऽनुपलब्धौ तेषामुपलब्ध्यर्थं बहिस्तः कुतोऽपि प्रयत्नः करणीयः। प्रायः एकः पुस्तकालयोऽन्यपुस्तकालयाय ऋणविधिना पुस्तकानि ददाति। विभिन्नशोधपत्रिकाणां पुरातनेष्वङ्केष्वपि विषयसम्बद्धा प्रचुरसामग्री समुपलब्धा भवितुमर्हति। अतः पत्रिकाणामन्वेषणे समवलोकने च पर्याप्तः समयो देयः। याः पत्रिकाः शोध-संस्था-पुस्तकालये प्राप्ताः स्युः, तासामेकैकं पुरातनमङ्कं परिगृह्य तद्विषयसूच्यवलोकनेनेदं ज्ञातं भविष्यति यत्सम्बद्धविषयसामग्र्यत्रोपलब्धाऽस्ति नवा? यदि एतादृशी सामग्री मिलति तदा तत्काल एवोपविश्य सा पठनीया, आवश्यकसङ्केतग्रहणञ्च करणीयम्। पुस्तकानामिव पत्रिकाणामपि पूर्णसङ्केतो ग्राह्यः। यथा-"पत्रिकाणाम्, अङ्कसंख्या, वर्षसंख्या, प्रकाशनवर्षं, प्रकाशनस्थलम्"-इत्यादि सर्वमङ्कितङ्करणीयम्।[२]

---

१. उदाहरणम्-"लालबहादुरशास्त्री राष्ट्रिय-संस्कृत-विद्यापीठ-पुस्तकालयः, अखिल-भारतीय-संस्कृत-साहित्य-सम्मेलन-राजेन्द्रप्रसाद-पुस्तकालयः, दिल्ली-विश्वविद्यालय-पुस्तकालयः, भारतीय-विद्या-संस्थान-पुस्तकालयः, राष्ट्रियाभिलेखागारः, पुरातत्त्वविभाग-पुस्तकालयः, राष्ट्रिय-संग्रहालय-पुस्तकालयः, हंसराज-महाविद्यालय-पुस्तकालयः, केन्द्रीय-सचिवालय-पुस्तकालयः, हरदयाल (हार्डिंग) पुस्तकालयः, मारवाड़ी-पुस्तकालयः, जैन-पुस्तकालयः"-इत्यादयो देहल्याः केचित्प्रमुखपुस्तकालयाः सन्ति। देहली तो बहिरपि केचित्प्रमुखपुस्तकालयाः सन्ति। तद्यथा-कलकत्तानगरस्य-राष्ट्रिय-पुस्तकालयः, वाराणस्याः सरस्वती-भवनपुस्तकालयः, पूनानगरस्य भण्डारकर-प्राचीनानुसन्धानस्य (ओरियेण्टल-रिसर्च-इंस्टीट्यूट) पुस्तकालयः, काशी-हिन्दू-विश्व-विद्यालयस्य पुस्तकालयः-इत्यादि।

२. भारतीयविद्यासम्बद्धानां महत्त्वपूर्णशोधपत्रिकाणां सूची निम्नलिखिता-"
"विमर्शः, जर्नल आफ गंगानाथझा केन्द्रीय-संस्कृत-विद्यापीठ, सारस्वती सुषमा, संस्कृत-रत्नाकरः, सागरिका, विश्वसंस्कृतम्, शोधभारती, ऋतम्भरा, कल्याण, विश्वज्योति, भारती शोध-सार-संग्रहः, इण्डियन एण्टिक्वेरी, जर्नल आफ द एशियाटिक-सोसाइटी आफ बंगाल, इण्डियन हिस्टोरिकल क्वार्टर्ली, जर्नल आफ बाम्बे ब्राञ्च आफ द रायल एशियाटिक-सोसाइटी, जर्नल आफ द बाम्बे हिस्टोरिकल-सोसाइटी, एनाल्स आफ द भण्डारकर ओरिएण्टल-

विभिन्नवर्षेषु- "अखिल-भारतीय-प्राचीन-विषय-विचार-संगोष्ठ्याः (आल-इण्डिया-ओरिएण्टल-कान्फ्रेंस) अधिवेशनानां कार्यविवरणिका अपि समवलोकनीयाः। विविध-विषयाणां ग्रन्थसूच्यः, लेखसूच्यश्चावलोकनीयाः। यथा-"वैदिक-बिब्लियोग्राफी" (वैदिक ग्रन्थसूची) इत्यादि।

रूपरेखानिर्माणम्-

शोधकार्यस्य पूर्णयोजनाया एका अस्थायियोजना निर्मातुं शक्यते। शोधनिरीक्षकस्य सम्पर्के इदं सुनिश्चितं करणीयं यत्-केन क्रमेण कार्यं करणीयमस्ति। अस्थायिरूपेण कियत्सु केषु केषु चाध्यायेषु शोध-प्रबन्धो विभाजितो भविष्यतीति क्रमबद्ध-रूपेण समुट्टङ्कनीयम्। अत्यन्तसंक्षेपेण प्रत्येकस्याध्यायस्याधोभागे लेखनीयं यदस्मिन् अध्याये को विषयो विवेच्यो भविष्यतीति। अध्यायाः परस्परसम्बद्धाः स्युः, क्रमबद्धरूपेण विषयविवेचनाया अग्रेसारकाश्च स्युः। कार्यारम्भात्पूर्वं रूपरेखानिर्माणस्य व्यावहारिकताया उपयोगितायाश्च विषये विदुषां वैमत्यमस्ति। त एवमङ्गीकुर्वन्ति यत्पूर्णाध्ययनं विना काल्पनिकरूपरेखानिर्माणं शोधसिद्धान्तप्रतिकूलमस्ति। परन्त्वस्मिन् विषये इदं स्मरणीयं यद्-रूपरेखा केवलं प्रस्ताविता अस्थायिनी च भवति, अर्थात् अस्यामन्तिमसमयं यावत् परिवर्तनं, सम्वर्द्धनं, परिसीमनं वा भवितुमर्हति। अन्यत्तथ्यमिदमप्यस्ति यत्प्रारम्भिकरूपरेखाया अभिप्रायः केवलं कार्यविधेर्बाह्यस्वरूपनिर्माणेन विद्यते, तस्यां शोधानन्तरं समक्षमागतानां परिणामानां दानं न त्वपेक्षितं, न वा दातुं शक्यम्। रूपरेखानिर्माणस्य महत्त्वपूर्णं सौविध्यमिदं भवति यद्-अस्याधारेण शोधकर्त्ता स्पष्टविभाजनान्तर्गतसङ्केतग्रहे महत्सौविध्यं समवाप्नोति। यावद्रूपरेखानिर्माणस्य व्यावहारिकतायाः प्रश्नः समुदेति तावत्सा विषयानुसारं पूर्ववर्त्तिशोधग्रन्थानामाधारेण विवेकेन निर्मातुं शक्यते। सामान्यतया शोधकर्त्तुः मस्तिष्के सम्बद्धसामग्र्यध्ययनानन्तरमेकं

-रिसर्च इंस्टीट्यूट पूना, एनाल्स आफ द वेंकटेश्वर ओरियेण्टल इंस्टीट्यूट, तिरुपति, न्यू इण्डियन एण्टिक्वेरी, विश्वेश्वरानन्द इण्डालोजिकल जर्नल, इण्डोलॉजिकल स्टडीज (दिल्ली-विश्वविद्यालय शोधपत्रिका) आदि।

सुस्पष्टं चित्रमालोक्यते यदत्र किं किं विधेयमस्ति। अत्र सन्देहो नास्ति यत्प्रवेशावेदनसमये रूपरेखाया आशा अव्यावहारिकी अवैज्ञानिकी च विद्यते। परन्तु कस्याश्चित् सामग्र्या अध्ययनान्तरमस्थायिरूपरेखानिर्माणं न केवलं व्यावहारिकमपितु परमावश्यकमप्यस्ति। उदाहरणाय–कस्यचिदेकस्य ग्रन्थस्याध्ययने यदा वयं संलग्नास्तदा तस्य–" रचयिता, तस्य कालः, वर्ण्यविषयः, तत्सदृशैरन्यग्रन्थैस्तस्य तुलना, तत्रोपवर्णितानां सिद्धान्तानां विकासः, यदि स ग्रन्थः 'काव्यम्', तदा तस्य काव्यगतविशेषताः, तत्र प्रतिबिम्बितः संस्कृति–समाजः, तस्य भाषा च–" इत्यादिविषयेषु दृष्टिरवश्यं गच्छति। स्वीक्रियतां यद्–वयं कस्यचिद् ग्रन्थस्य ग्रन्थसमूहस्य वा सांस्कृतिकाध्ययने संलग्नाश्चेत्पूर्वमस्थायिरूपेणेदं निश्चेतव्यं यत्–संस्कृत्य–न्तर्गतानि कानि कानि तत्त्वानि गृह्यन्ताम्, येषामाधारेण सामग्रीसंकलनं सुकरं स्यात्। एवमेव भाषावैज्ञानिकाध्ययने भाषाविज्ञानस्य मूलतत्त्वानां वर्गीकरणस्य रूपरेखानिर्माणमत्यन्तमावश्यकम्। ग्रन्थसम्पादनरूपशोधकार्यस्य समस्या नितान्तं भिन्ना भवति। तस्य काचिद् विस्तृतरूपरेखा नैव भविष्यति। तस्य प्रमुखं कार्यं विविधपाण्डुलिपीनां तुलनात्मकमध्ययनं विधाय यथासम्भवं वास्तविकपाठावधारणमेवास्ति। टिप्पणीभिः सह पाठभेदो दीयते, एवं स्वीकृतपाठस्याधारः स्पष्टीक्रियते। आम्! एवं भवितुमर्हति यद्–ग्रन्थसम्पादनेन सहैव तस्य आलोचनात्मिका भूमिका देया भवति, (या प्रायः एतादृश–शोधस्यावश्यकमङ्गं भवति) तदा पूर्णसम्पादनान्तरं भूमिकायाः प्रमुखविषयाणां,–यथा–"पाण्डुलिपीनां विवरणं, तासां विशेषतः, ग्रन्थ–परिचयः, तस्य रचयिता, तस्य काल–निर्धारणं, सम्पादनस्योपयोगिता"–इत्यादि–विषयाणां रूपरेखानिर्माणं विधाय तदाधारेण सङ्केतग्रहः करणीयः।

सङ्केतग्रहः–

ग्रन्थस्य रूपरेखायां परिकल्पितेष्वध्यायेषु समागतानां विषयाणां तदङ्गोपाङ्गानाञ्चाधारेण प्रत्येकविषयसम्बद्धसङ्केताः पृथक्–पृथक् पत्रेषु समुट्टङ्कनीयाः। सङ्केता अनेकप्रकारका भवितुमर्हन्ति। तद्यथा–

१. यथोक्तविषये यैः पूर्ववर्त्तिविद्वद्भिः कार्यं कृतमस्ति, विषयसम्बद्धं

तेषामभिमतम्–केवलं तद्ग्रन्थानां साररूपमुद्धरणं, विषयाङ्गोपाङ्गसम्बद्धपत्रेष्व–ङ्कितङ्करणीयम्। उद्धरणेन सह– 'लेखकनाम, पुस्तकनाम, प्रकाशनवर्षम्, प्रकाशनस्थलञ्च समङ्कितं करणीयम्। एषामुद्धरणानां प्रयोजनद्वयम्–एकन्तावत्–तैः स्वाभिमतस्य पुष्टिः, द्वितीयञ्च–तेषां समालोचना।

२. यदि तेषां विदुषामभिमतस्य भवान् समालोचनां कर्तुमिच्छति तदा यथा–यथा अध्ययनं स्यात्! स्पष्टीकरणं स्यात्! नूतनविचारोदयो भवेत्! तथा–तथा तत्र कोऽपि समालोचनासम्बन्धिसङ्केतो देयः, येन शोधप्रबन्ध–लेखन–समये सः परित्यक्तो न स्यात्! अत्र सन्देहो नास्ति यल्लेखनसमयं यावत्केचिद्विचारा आगन्तुं शक्नुवन्ति, पूर्वविचारेषु परिवर्तनमपि भवितुमर्हति। तदर्थं पार्यन्तिकरूपनिर्माणं यावदवकाशो भविष्यति।

३. प्रतिपाद्यविषयस्य प्रमाणरूपेण विवेचनार्थं वा संस्कृतस्य मूलोद्धरणानि, पूर्णरूपेणपूर्णसङ्केतसहितानि, पुस्तकलेखकनामादिसहितानि च समुट्टङ्कनीयानि।

४. एतदतिरिक्तं समये–समये ये स्वतन्त्रविचाराः प्रस्फुरिताः स्युस्ते तत्कालं सम्बद्धपत्रेषु समुल्लेखनीयाः।

एतानि पत्राणि विषयक्रमानुसारं सुविधानुसारं वा 'अकारादिक्रमेण' समुल्लेखनीयानि, अनेन यदि कस्मिँश्चिद् विषये सन्दर्भोऽवलोकनीयो भविष्यति तदा सुविधा भविष्यति। इदं स्मरणीयं यदनेन पत्रनिर्धारणेन कार्यं सुव्यवस्थितं सरलञ्च भविष्यति। एक एव सन्दर्भो यदि स्थलद्वयेऽपेक्ष्यते तदा उभयत्र समुट्टङ्कनीयः। अथवा एकत्र पूर्णरूपेण प्रदायान्यत्र तत्सङ्केतो विधेयः।

कलेवरम्–

अनावश्यकरूपेण शोधप्रबन्धकलेवरसम्वर्द्धनप्रयासो न विधेयः। प्रमुखमुद्देश्यमिदमेव स्याद् यत्–सिद्धान्तप्रतिपादनं भवेत्। तदर्थमपेक्षितं सङ्गतञ्चोदाहरणं प्रदाय समालोचनात्मकरीत्या तत्पुष्टिश्च स्यात्।

पुस्तकानामुद्धरणानि केवलम् आवश्यकपरिस्थितौ प्रत्यक्षोपयोगितायामेव देयानि, तेषां प्रयोगः प्रबन्धकलेवरबृंहणाय कदापि न करणीयं।

प्रत्येकशोधप्रबन्धस्य मुख्यरूपेण निम्नलिखितानि विभाजनानि भवितुमर्हन्ति।

१. मुखपृष्ठम्।

२. प्राक्कथनं भूमिका वा।

३. उपक्रमाध्यायः प्रारम्भिकोऽध्यायो वा।

४. सङ्केतसूची संक्षेपसूची वा।

५. विषयसूची।

६. मुख्यविषयवस्तुसम्बन्ध्यध्यायः।

७. उपसंहारसम्बन्धी, निष्कर्षसम्बन्धी वाऽध्यायः।

८. अनुक्रमणिका अथवा अनुक्रमणिकाः (आवश्यक-शब्दानां विषयाणामुद्धरणानां वा)।

९. ग्रन्थसूची शोधपत्रिका सूची च।

मुखपृष्ठे केवलं विषयस्य नाम, शोधकर्त्तुर्नाम, वर्षसंख्या, एवं-'अमुकविश्वविद्यालयस्य अमुकोपाधये प्रस्तुतः शोधप्रबन्धः-इति कथनमङ्कितं स्यात्। प्राक्कथनं किञ्चिद्वक्तिगतं भवति। अत्र विषयप्रेरणा, तत्र प्रवृत्तिः, शोधस्यावश्यकता, सहायताप्राप्त्युल्लेखः, धन्यवादप्रकाशनम्"-इत्येते विषयाः समायान्ति। इदं सर्वं सक्षिप्तं स्यात्। उपक्रमाध्यायः शोधप्रबन्धस्य पर्याप्तमहत्त्वपूर्णमङ्गं भवति। अतएव अस्य लेखनं सम्पूर्णसामग्र्यां सत्यां शोधप्रबन्धस्य प्रमुखभागलेखनसमये करणीयम्। अयं 'विषय-प्रवेश'-इत्युच्यते। अस्मिन् सर्वप्रथमं शोधार्थिचितविषयस्याभिप्रायो विस्तारश्च विज्ञाप्यो भवति, सहैव विषयमहत्त्वमपि प्रकाशयितुं शक्यते। इदमपि तत्र विज्ञापनीयं यत्-कथमुक्तविषये भवतां शोधः ज्ञानप्रसारे साहाय्यं विधास्यति।

ततश्चोक्तविषयेऽद्यावधि जातस्य शोधकार्यस्य समीक्षात्मकं विवरणं प्रस्तोतव्यम्। अत्रेदं सुस्पष्टं करणीयं यदुक्तकार्ये जातेऽपि भवत्कृतस्य शोधकार्यस्य का उपादेयता? यदि भवदनुसन्धानस्य फलरूपेण कानि-चिन्नूतनतथ्यानि समक्षमागतानि तदा तेषां संक्षिप्तोल्लेखोऽपि तत्रैव करणीयः। यदि भवतां पूर्वमुक्तविषयो विद्वद्भिरस्पृष्टस्स्यात्तदाऽस्य तथ्यस्यापि प्रामाणिकोल्लेखो विधेयः। शोधप्रबन्धस्यायमंशः भवत्समस्तकार्यस्य सूचको भवति। अतोऽत्र यथाशक्यमधिकाधिकं परिश्रमं विधाय सम्परिमार्जितसंक्षिप्त-रूपेणेदं प्रस्तोतव्यम्। विशद्विवेचनन्तु मुख्यकलेवरे भविष्यत्येव।

सङ्केतसूच्यां संक्षेपसूच्यां वा यदि आवश्यकं स्यात्तदा भवद्गृहीत-लिप्यन्तरप्रणालिसङ्केताः शब्द-विषय-पुस्तकसंक्षेपसङ्केताश्च वर्णानुक्रमेण संयोज्याः।

विषयसूच्यां प्रत्येकाध्यायस्य मुख्यविषयस्य, सत्यावश्यकत्वे सम्भवे च तदन्तर्गतोपशीर्षकाणामुल्लेखोऽपि विधेयः। मुख्यविषयवस्तुसम्बन्ध्यध्यायेषु विषयोऽनेन प्रकारेण विभाजितो भवेद्येन स्थूलतः सूक्ष्मं प्रति-प्राचीनतोऽर्वाचीनं प्रति च गमने, तथ्यानामैतिहासिकपरिप्रेक्ष्ये दर्शने, तेषां स्वाभाविकविकासस्य आकलने च सुविधा स्यात्।

उपसंहारे शोधस्य प्रमुखोपलब्धीनां निष्कर्षाणाञ्च संक्षिप्तः किन्तु सारगर्भित उल्लेखो विधेयः। कतिपयेषु शोधप्रबन्धेष्वेतेषां निष्कर्षाणां प्रत्येकाध्यायस्यान्त एव निवेशनपद्धतिर्दृश्यते, किन्त्वस्माकं दृष्ट्या तस्य काप्यावश्यकता नास्ति।

अनुक्रमणिका अथवा अनुक्रमणिकास्तेषां शब्दानां, विषयाणामुद्धरणानां वा स्युर्येषां भवद्भिः स्वशोधप्रबन्धे विशिष्टविवेचनं कृतमस्ति। येषाञ्च भवदनुसन्धानेन सह विशिष्टसम्बन्धो विद्यते। सन्दर्भग्रन्थरूपेण भवच्छोध-प्रबन्धस्योपयोगित्वमाभिरनुक्रमणिकाभिर्वृद्धिं प्राप्नोति।

अन्ते आधारग्रन्थानां, सहायकग्रन्थानां, आलोच्यग्रन्थानां, विषयसम्बद्धग्रन्थानां शोधपत्रिकाणाञ्च वर्णानुक्रमपूर्विका सूची समुपस्थापनीया।

अस्यां तत्तद्ग्रन्थविषये लेखक-पुस्तक-प्रकाशनस्थलादिनामानि, प्रकाशनवर्ष-संख्यादिकञ्च क्रमेण विलिखेत्। आधारभूतमूलसंस्कृतग्रन्थविषयेऽपि- "ग्रन्थनाम, मूललेखकनाम, कोष्ठके आवश्यकतानुसारं" "सम्पादक" इति "अनुवादक" इति वा विलिख्य तस्य-तस्य नाम, प्रकाशनस्थलम्, वर्षसंख्यादि विलेखनीयम्। यदि ग्रन्थोऽप्रकाशितो भवेत्तदा प्रकाशनस्थलस्थाने 'उपलब्धिस्थलम्', पाण्डुलिपिसंख्यादिकञ्च विनियोजनीयम्। शोधपत्रिकाणामपि यथावर्णानुक्रमं- "नाम-प्रकाशक-प्रकाशनस्थानवर्षसंख्यादिकञ्च सँल्लेखनीयम्।

लेखनं संशोधनञ्च-

यद्यपि शोधप्रबन्धसम्बन्धिसङ्केतग्रहानन्तरं तल्लेखनं लिखितपृष्ठ-संशोधनञ्च शोधकर्त्तुर्निर्देशकस्य च सुविधानिर्भरमस्ति, तथापि अस्मदनुभवानुसारं यदापि शोधप्रबन्धलेखनमारभेत तदैव मुख्यविषयवस्तुसम्बन्धिप्रथमोऽध्याय, १५-२० पृष्ठानि वा विलिख्य पूर्वं स्वनिर्देशकाय निदर्शनरूपेण दर्शनीयानि, येन भाविलेखनस्यैकं रूपं निश्चितं भवेत्। एवमग्रिमलेखनकार्यमपि तदाधारेण स्यात्।

शोधप्रबन्धस्य भाषायाः काव्यात्मकत्वं तादृशमावश्यकन्नास्ति, यादृशं तद्विचाराणां वैशद्येन प्रस्तुतीकरणक्षमत्वम्। पाठकसमक्षं शोधकर्तृविचाराः सुस्पष्टमागच्छेयुः, भाषासौन्दर्यमोहेन तेषु जाटिल्यन्नागच्छेत्। यदि शब्दानां न्यूनताऽधिकता परिवर्तनीयता वा आवश्यकी स्यात्तदा साऽनुष्ठेया, यतो हि अस्पष्टताया निराकरणं परमावश्यकमस्ति। पाठकस्य समीपं (तस्य मनोभावं यावद्) गमनस्य माध्यममेकमात्रं भाषैवास्ति। अनेन सहैव संक्षेपोऽपि समीचीनस्पष्टभाषाया आवश्यकगुणोऽस्ति। शब्दाडम्बरं परित्यजन् भावानाम-नावश्यकपुनरावृत्तिं परित्यजेत्। यत्र कुत्रापि शब्दविषयेऽर्थविषये वा सन्देहो स्यात्तत्र सद्यः व्याकरणसाहाय्यं कोषसाहाय्यं वा ग्राह्यं, सङ्कोचः परित्याज्यः, विलम्बो नैवोचितः! अस्मिन् सन्दर्भे-"शब्दकल्पद्रुमः, वाचस्पत्यम्, आप्टेकोषः, पं. चारुदेवशास्त्रिणः शब्दापशब्दविवेकः, व्याकरणचन्द्रोदयः" इत्यादिग्रन्थाः समुल्लेखनीयाः। इदमपि ध्येयं यद्-विशेषभावानाङ्कृते विशेषशब्द एव प्रयोज्यः न तु पर्यायवाचिशब्दः। कयोश्चिदद्द्वयोः शब्दयो नैकोऽर्थो भवितुमर्हति,

प्रवृत्तिनिमित्तभेदात् तत्र भेदोऽवश्यमङ्गीकरणीयः। शोधप्रबन्धे व्यक्तीनां नामतः पूर्वं विशेषसम्मानसूचकपदाभिनिवेशो नौचित्यमावहति। उदाहरणार्थं–"पदवाक्य–प्रमाणज्ञो वैयाकरणशिरोमणिर्महामुनिः पाणिनिः"–इत्यस्य स्थाने "पाणिनिः" इत्येव लेखनं शोधपद्धत्यनुकूलं भविष्यति। सहैव ग्राम्या गौरवप्रतिकूला च भाषा परिवर्जनीया। यदि कस्यचिद् विदुषः समालोचनाऽपरिहार्या तदाऽपशब्दपरिवर्जनं कुर्वता सभ्यभाषयैव सा विधेया। उदाहरणार्थं स्वीक्रियताम् यद्–कस्यचिद्विदुषः कस्मिँश्चिद् विषयेऽनभिज्ञता द्योतनीया स्यात्तदा–"तस्यास्मिन् विषये सम्यग्बोधो नास्ति"–इत्यस्य वाक्यप्रयोगस्य स्थाने–" सम्भाव्यते यदसौ विषयः तद्दृष्टौ नागतः"–इत्याकारकप्रयोग एव ग्राह्यः। परन्तु स्वकथनस्पष्टतार्थं पुष्ट्यर्थञ्च व्यङ्ग्यवचनानां पश्चात्तापकथनानाम्, उदात्तवचनानाञ्च प्रयोगे यथास्थानं सङ्कोचोऽपि न करणीयः।

यावदकाट्यप्रमाणैस्तथ्यस्य शतप्रतिशतं निश्चयो न स्यात्तावत्तद्विषये निश्चितकथनमप्रदाय–"सम्भवतया प्रतीतं भवति, कदाचित्"–इत्यादिशब्दानां प्रयोगं विधाय स्वकथनमुपस्थापनीयम्। नेदमावश्यकं यदेकशोधकर्त्तुः शोधानन्तरं सर्वेषां तथ्यानां पूर्णनिर्णयः स्यादेव, तद्विषये विपरीतं प्रमाणं न मिलेत्, येन तत्र परिवर्तनं न सम्भाव्येत्। किन्तु यत्र गणितीयसिद्धान्तसदृशं विपरीततथ्यान्तरं न सम्भाव्येत तत्र निश्चितं कथनं दातुं शक्यते।

यन्माध्यमेन शोधार्थी शोधप्रबन्धं लिखन्नस्ति तदतिरिक्ताया भाषायाः केवलमत्यन्तप्रसिद्धानां सर्वविदितानां बोधगम्यानाञ्च शब्दानां, वाक्यांशानां प्रयोगः करणीयः। अस्मिन् प्रसङ्गे संस्कृत–लोकोक्तीनामन्योक्तीनां न्यायानाञ्च स्थितिर्भिन्ना, सङ्गत्यां सत्यां स्वच्छन्दतया तत्प्रयोगे नास्ति काचिदापत्तिः। शोधकर्त्तुरिदमुद्देश्यं भवेद् यदध्ययनकाल एव विषयः पाठकहृदयङ्गमो भवेत्। आवश्यकतायां सत्यामेवं भवद्भाषायां तत्समकक्षाभिव्यक्तिविरहे च सति एव तदितरभाषा समाश्रयितुं शक्यते।

कस्मिन्नपि शोधप्रबन्धे उद्धरणबाहुल्यं तस्य गुणत्वेन नाङ्गीकर्त्तुं शक्यते, अनिवार्यतायामेवोद्धरणानि देयानि। तत्रापीदमवधेयं यत्तानि लघुतो लघुतराणि स्युः, यत्रावश्यककथनमागच्छेत्। इदमपि ध्येयं यदुद्धरणानि

पूर्णरूपेण शुद्धानि स्युः। उद्धरणाशुद्ध्या उद्धरणस्रोतः प्रत्यन्यायो भवति। परन्तु उद्धरणसङ्कोचवृत्तेरयमभिप्रायो नास्ति यत्-शोधकर्त्तुः कथनमप्रामाणिकतां गच्छेत्। इदमपि ध्येयं यदनुसन्धाने कापि वार्त्ता प्रमाणं विना नैव कथनीया। प्रमाणार्थञ्च मूलस्रोतो यावद्गमनमावश्यकमस्ति। टीकाकर्त्तुर्मतं द्वितीयश्रेण्याः प्रमाणमस्ति। टीकाकर्त्तृषु परस्परं, तैश्चास्माकमपि मतभेदो भवितुमर्हति। प्रत्येकस्योद्धरणस्य मूलेन सम्यक्प्रकारेण मेलनं नितान्तमावश्यकं भवति। मूलवैदिकोद्धरणेषु स्वरचिह्नाङ्कनमपि न विस्मर्त्तव्यम्।

अनुपातबुद्धिर्लेखनकलायाः प्राणमस्ति, स्वरूपे महत्त्वपूर्णे सत्यपि स्वशोधप्रबन्धविषयानुपाताद्बहिर्गत्वा कस्मिन्नपि विषये आवश्यकतातोऽधिकं बलं नैव देयम्। अप्रासङ्गिकविषयाणां परिहरणमत्यन्तमावश्यकम्। सर्वेषां तथ्यानां, विचाराणाम्, अभिमतानां, वर्णनानां, विवेचनानां, व्याख्यानानाञ्च परस्परपरिग्रथनं मुख्यविषयसम्बद्धत्वञ्च अपरिहार्यम्, येन सर्वे मिलित्वा एकलक्ष्यं प्रति गच्छेयुः, सूक्ष्मदृष्टेश्च कुशलतापूर्वकं प्रदर्शनं कुर्युः। अत्रैव प्रारम्भेऽस्थायिरूपेण निर्मितायाः रूपरेखाया महत्त्वमभिव्यज्यते, यतो हि तदाधारेणैव एकैकस्मिन् विषये समुचितध्यानदाने सौविध्यं भवति, तथा बहूनामनावश्यकविषयाणां परिहारोऽपि भवति।

शोधप्रबन्धस्य अध्याया उपशीर्षकेषु एवं विभाजिता भवेयुर्येन पाठकाय मुख्यविवेचितविषयाणां तत्कालं ज्ञानं भवेत्, तथा एवमवधारणे काठिन्यं न स्यात् यत्-कस्मिन्नध्याये केषां प्रमुखविषयाणां विवेचना विद्यते। अतो यथोचिताधारेणैव उपशीर्षकेषु विषयाणां विभाजनं विधेयम्। अत्रेदमवश्यमवधेयं यद्-यावद् विवेच्यविषयेषु स्पष्टभेदो न स्यात्तावदनावश्यकरूपेण तेषामुपशीर्षकनिर्माणं नैव कार्यम्।

शोधप्रबन्धस्य परीक्षार्थं निक्षेपात्पूर्वं तस्य विवेकपूर्वकमावर्तनमत्यन्तमपेक्षितं भवति। एतदावर्तनं यावद् बारं स्यात् तावत्सुष्ठु विद्यते, यतोऽन्तिमसमयं यावदशुद्धयः स्खलितयश्च दृष्टिपथमायान्ति। अन्तिमलेखनात्पूर्वं यदि सम्पूर्णशोधप्रबन्धः मार्गनिर्देशकदृष्ट्या बारद्वयं निस्सरेत्तदा तत्परिणामाः

सन्तोषजनका भवन्ति। निर्देशकः शोधप्रबन्धस्य पृष्ठानि दृष्ट्वा तेषु याः टिप्पणीः दद्यात्, तासु पूर्णविचारविमर्शान्तरं तदनुसारं संशोधनं करणीयम्। निर्देशकटिप्पण्यर्थं पृष्ठेषु पर्याप्तसीमान्तनिक्षेप आवश्यकः।

टिप्पण्यः –

टिप्पणीरूपेण समुचितसन्दर्भाः कस्यापि शोधप्रबन्धस्य वैज्ञानिकतायाः प्रामाणिकतायाश्च प्रमुखा आधारा भवन्ति। टिप्पणीनां प्रमुखान्यायोजनानि निम्नलिखितानि –

१. शोधप्रबन्धमुख्यकलेवरस्य प्रत्येकसाक्षादुद्धरणस्य स्रोतसो निर्देशकरणम्।

२. मुख्यकलवेरतथ्यानां तस्य प्रत्येककथनस्य प्रमाणप्रदर्शनम्।

३. कस्माचिदन्यलेखकाद् गृहीतस्य प्रत्येकस्य निष्कर्षस्य, अनुमितेः, प्रमाणस्य च स्वीकृतेः समङ्कनम्।

४. मुख्यकलेवरे वस्तुप्रतिपादनं जटिलं खण्डितञ्चाकुर्वन् येषां विवेचनं न कर्तुं शक्यम् एतादृशविषयाणां विवेचनं स्पष्टीकरणञ्च।

५. मुख्यकलेवरात्तस्याः सर्वस्याः सामग्र्याः परिहारकरणं या मुख्यविषय-प्रस्तुतीकरणे यथाकथञ्चिद् बाधिका भवेत्, अथवा तस्य रोचकतायाः तारतम्यस्य च न्यूनतामुपस्थापयेत्।

टिप्पणीनां प्रसङ्गेऽपि एकरूपता सरलता च परमावश्यकी। एकपृष्ठसम्बद्धटिप्पण्यः क्रमशः तस्मिन्नेव पृष्ठेऽधो देयाः। टिप्पण्यः '१, २, ३' - इत्यादिभिरङ्कैः सङ्केतिताः भवेयुः। एते अङ्काः प्रत्येकपृष्ठस्य पृथक्-पृथक्-रूपेणापि भवितुमर्हन्ति। टङ्कनसुविधार्थमेते अङ्का एकैकस्मिन्नध्याये सातत्येनापि चलितुं शक्नुवन्ति। उभेऽपि पद्धती प्रचलिते स्तः। मुख्यकलेवरस्य येन वाक्येन शब्देन वा कापि टिप्पणी सम्बद्धा स्यात् तस्यान्ते पङ्क्त्या उपरि टिप्पण्यङ्कः प्रदेयः। एष्वङ्केषु अधो दीयमानेष्वङ्केषु च पूर्णतया सारूप्यमत्यन्तमावश्यकम्।

यदि कस्यापि पुस्तकस्य सन्दर्भः टिप्पणीषु बारम्बारं देयो भवेत्तदा

तस्य पुस्तकस्य नाम्नः संक्षेपं प्रदाय, पृष्ठाध्यायखण्डसंख्या निदर्शनीया। एकबारं बारद्वयं वा सन्दर्भनिर्देशस्थितौ-"पुस्तकनाम-रचयितृनाम-संस्करणादीनामुल्लेखः करणीयः। यदि टिप्पण्यां कस्यचित्पुस्तकस्योद्धरणं देयमस्ति तदा पूर्वं मूललिप्यां भाषायाञ्च (असम्भवे सति शोधप्रबन्धभाषायाम्) तदुद्धरणं प्रदाय ततः पुस्तकनामादीनां विधिवन्निर्देशः करणीयः। पुस्तक-नामादीनां निर्देशः निर्विकल्परूपेण शोधप्रबन्धस्य मुख्यलिप्यामेव स्यात्। यदि टिप्पणी केनचित् शोधलेखेन सम्बद्धा स्यात्तदा पत्रिकायाः पूर्णं नाम, प्रकाशनस्थलं, प्रकाशनवर्षाङ्कं विलिख्य शोधलेखकनाम्नः, लेखशीर्षकस्य, पृष्ठसंख्यायाश्च (इतः एतावत्-पर्यन्तं, यावत्सु पृष्ठेषु स लेखः स्यात्) लेखनं विधेयम्। यदि टिप्पण्याः सम्बन्धः केनचिद् प्रकाशितेन शोध-प्रबन्धेन भवेत् तदा शोधप्रबन्धलेखकपूर्णनाम्नः, शोधप्रबन्धपूर्णशीर्षकस्य, विश्व-विद्यालयस्य, स्थानस्य, वर्षस्य च पूर्णतया निर्देशः कार्यः। इदमवधेयं यत्-पुस्तकानां संख्यात्मकसन्दर्भाः मुख्यकलेवरेऽनागत्य टिप्पणीष्वेवागच्छेयुः। यद्येकस्यैव पुस्तकस्य टिप्पण्यः सातत्येन आगच्छन्ति तदा तस्य पुस्तकस्य प्रथमटिप्पण्यनन्तरं तदग्रिमासु टिप्पणीषु पुस्तकनामोल्लेखो न क्रियते, केवलं "तदेव"-इत्येव लिख्यते। यत्पुस्तकमेकाधिकखण्डेषु विद्यते तस्य सन्दर्भे खण्डनिर्देश आवश्यकः। संस्कृतग्रन्थसन्दर्भसङ्केतः -अध्याय खण्ड-श्लोक-सूत्राद्यनुसारं क्रियते। प्रत्येकसंख्याया अग्रे पूर्णविरामदानस्य पद्धतिराधिक्येन प्रचलिता विद्यते। यथा-"ऋ० ४।६।१०।" इत्यस्याभिप्रायो विद्यते-"ऋग्वेदचतुर्थमण्डलं, षष्ठसूक्तं, दशम-मन्त्र"-इति। यद्येतदग्रे विद्यमानानां मन्त्राणामपि निर्देशः करणीयः स्यात्तदा १० संख्याया अग्रेऽल्पविरामं प्रदाय तेषां मन्त्राणामपि संख्या लेखनीया भवति। यदि तस्यामेव टिप्पण्यां ऋग्वेदस्यान्यसन्दर्भा देयाः स्युस्तदा ऋग्वेदस्य पुनरुल्लेखमकृत्वा केवलमर्धविरामं संयोज्य अन्यसंख्या विलिख्यन्ते। यदि कश्चिदनुवादः समुद्ध्रियते तदा तस्य अनुवादतायाः स्पष्टसङ्केतः देयः। सन्दर्भे पुस्तकस्य शोधलेखस्य वा संख्या तेष्वेवाङ्केषु तथैव देया यथा मूलपुस्तके शोधपत्रिकायां वा दत्ता भवेत्। कतिपयेषु पुस्तकेषु भूमिकाया पृष्ठसंख्या पृथग्भवति। एतादृश्यां स्थितौ सन्दर्भेऽपि पुस्तकनाम्नोऽनन्तरं "भूमिका" इत्युल्लेखं विधाय तस्य पृष्ठसंख्या प्रदर्शनीया। यथोक्तमपि-

"नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते॥" इति।

शोधस्यायतयः

लेखकः - डॉ. हरवंशलालशर्मा
अनुवादकः - डॉ० भागीरथिनन्दः

शोधः (शोधनम्) आयुर्वेदप्रयुक्तः शब्दो वर्तते यः 'शुध्' धातोर्निष्पन्नः। सामान्यतः धातोः परिशोधने शब्दस्यास्य प्रयोगस्तत्रास्ति। सामान्यरूपेणास्य परिष्करणम्, प्रमाणीकरणम्, दोषनिवारणञ्चेत्यादयोऽर्थाः। परन्तु साहित्यिक-शोधदृष्ट्या सर्वेष्वेष्वर्थेष्वव्याप्तिदोषः सङ्गच्छते। अस्मादेव कारणात्, प्रायेण 'रिसर्च' इति आङ्ग्लशब्दस्य गवेषणा, अनुसन्धानम्, आविष्कारः, अनुशीलनमित्याद्यर्थान् वदन्ति विद्वांसः। गवेषणेति लाक्षणिकः प्रयोगः यः आविष्कारस्य (खोज) निकटस्थः, परन्तु अनुसन्धानमिति लक्ष्यबन्धस्य प्रक्रिया। पूर्वं यदि व्युत्पत्तिदृष्ट्या समीक्षते तर्हि ज्ञायते यत् एतेषु न कोऽपि शब्दः 'रिसर्च' इति पदस्य पर्यायभूतो वर्तते। परन्तु, अनुसन्धान-शोधशब्दयोर्धात्वर्थौ परस्परं भिन्नावपि एकमेवार्थं सङ्केतयतः। अस्याविष्कारस्यानुसन्धानस्य वा प्रक्रियायां दृष्टिः वस्तुपरा भवति, न त्वात्मपरा 'व्यक्तिपराया दृष्टेः समावेश आलोचनायां सम्भवेत्, न तु शोधे। अनुसन्धानस्यापराऽऽवश्यकता वैज्ञानिको दृष्टिनिवेशोऽपि भवति, यस्मिन् परिप्रेक्ष्ये साहित्यमितिहासबोधसन्दर्भे समीक्षणीयतां व्रजति। अध्ययनं साहित्यशास्त्रीयं, समाजशास्त्रीयं, दर्शनपरकं, भाषाविषयकं वा भवतु तत्रास्माभिर्युगीनः प्रभाव उपेक्षितुं न शक्यते कथञ्चित्। अनुसन्धाने शोधे वा तथ्यान्यन्विष्यन्ते, तानि चैतावद्भिरावेष्टनैरावृत्तानि भवन्ति यत्तेषां निकटे समागमो नैव क्वापि सरलः।

सत्यस्यान्वेषणपूर्विकोपलब्धिरतीव जटिला। उक्तं हि यथार्थतः –

'हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।'

अथवा

'धर्मस्य तत्त्वं निहितं गुहायाम्।'

तस्यैव सत्यस्य तथ्यस्य वाऽन्वेषणायानुसन्धानाय च शोधप्रविधिरेवाविष्कृतः। शोधप्रविधिप्रक्रियाणां नैकानि पुस्तकान्यपि प्रकाशितानि। नात्राहं तान् प्रविधीन् व्याख्यातुं वाञ्छामि यतोहि शोधप्रविधिस्तथाभूतो विषयोऽस्ति यः स्वप्रयोगात्मकताकारणात् पृथक् पृथक् रूपैः प्रतिपाद्यते। अन्यच्चाद्यत्वे तुलनात्मिका साहित्यिकशोधप्रवृत्तिर्वर्धते आलोचनमपि शोधसमकक्षतया गृह्यते। पाण्डुलिपीनां सम्पादनमपि शोधान्तर्गततया गण्यते। तुलनात्मकाध्ययनस्य न काऽपि सीमाऽस्ति यतोहि एवम्प्रकारकमध्ययनं शोधक्षेत्रे समालोचनक्षेत्रे च सम्भवति। एतदर्थं प्रायेण पाश्चात्यभूमौ ग्रन्था अनेकेऽनुसन्धानप्रक्रियामाधृत्य विरचिताः, येषु शोधस्य प्रत्येकमङ्गमादायात्यन्तं सूक्ष्मं विश्लेषणं विहितम्। परन्तु एषु ग्रन्थेषु अनेकेषां सम्बन्धः सामाजिकविज्ञानेन भौतिक-विज्ञानेन च साकं वर्तते। साहित्यिकशोधाय न तेषां साक्षादुपयोगः कर्त्तुं शक्यते। सामान्यतः पाश्चात्यविद्वद्भिः शोधस्य प्रमुखमुद्देश्यं ज्ञानप्राप्तिः, जीवनसमृद्धिः, मानवोत्कर्षाय योगदानं वेत्यभिहितम्। विज्ञानविषयेषु शोधस्योद्देश्यानि तु स्पष्टानि, परन्तु साहित्यिकविषयेषु अनुसन्धानस्योद्देश्यं चिन्तनं, मननं, चेतनाया विस्तारो वा भवितुमर्हति। पाश्चात्यदेशेषु नैकानि शोधसंस्थानानि वर्तन्ते यत्र शोधप्रविधीनामुपरि विशिष्टं गुरुत्वमाधीयते, परन्तु एषु संस्थानेषु अधिकांशतः शोधविषयाः सामाजिकविज्ञानसम्बद्धा अथवा शुद्धविज्ञानपरका भवन्ति। तथापि विज्ञानसाहित्ययोः बाह्यपक्षः प्रायेण समाजो भवति। अस्य बाह्यपक्षस्य सामग्रीसङ्कलनम्, परीक्षणम्, सन्दर्भीकरणञ्चेत्यादीनि रूपाणि सन्ति। पाश्चात्यदेशेषु विशेषतोऽमेरिकादेशे शोधविज्ञानं स्वतन्त्रविज्ञानरूपेण प्रवर्धमानं वर्तते।

विश्वविद्यालयेषु शोधस्य कतिपयनियमाः निश्चितीकृताः सन्ति। प्रायेण सर्वेषु विश्वविद्यालयेषु तेषां नियमानां शब्दावली समानप्रकारेव। तेषां नियमानामयं सारांशः –

(१) अनुपलब्धतत्त्वानामन्वेषणम्

(२) उपलब्धानां तथ्यानां सिद्धान्तानां वा पुनराख्यानम्

(३) ज्ञानक्षेत्रस्य सीमाविस्तारः।

(४) साहित्यिकी शैली

(५) मौलिकं विवेचनम्

अस्माकं विश्वविद्यालयेषु ई. १९१८ तः अद्यावधि यावदनुसन्धानं समभवत् तावत् सर्वं पाश्चात्यादर्शेनैव जातम्। यद्यपि भारतीयसंस्कृतसाहित्ये शिक्षा-व्याकरण-निरुक्तादिग्रन्थेषु अनुसन्धानस्य स्वकीयः शिल्पविधिरुपलभ्यते, किन्तु अद्यतना अनुसन्धित्सवो न तं जानन्ति, न च ज्ञातुमुत्सहन्ते। यास्क-पाणिनि-पतञ्जलिप्रमुखाः पुरतोऽस्माकं यं मार्गं दर्शितवन्तः, तस्य लाभः स्वीकर्तव्यो शोधार्थिभिः। शोधप्रबन्धेष्वनेके एवं सन्ति येषु विषया व्यर्थमेव पाञ्चालीवसनीकृताः। कतिपयेषु तु प्रतिपाद्य-शीर्षकयोर्महान् भेदोऽवलोक्यते। संस्कृते मूलविषयमाधारीकृत्य अविकलरूपेण लिखिताः शोधप्रबन्धा अत्यन्तं न्यूनाः। अधिकांशतः शोधप्रबन्धा आलोचनात्मकपुस्तक-रूपेण विरचिताः। समपर्कता, परिश्रमश्च अनुसन्धानस्य प्राणाः। अनयोरभावेनाद्यानेके शोधप्रबन्धा निर्जीवा निष्प्राणाः प्रतीयन्ते। वस्तुतोऽनुसन्धा-नमेकं शास्त्रमस्ति, तस्य चैकं निश्चितमुद्देश्यं वर्तते। सत्यान्वेषणं हि तस्योद्देश्यम्। अनुसन्धानस्य साध्यमिदमित्यस्माभिरभिधातुं शक्यते। प्रक्रिया-प्रविधि-तथ्यानि तस्य साधनानि। सत्यस्यास्यान्वेषणायाधिकारवतोऽन्वेषक-स्यानिवार्यता वर्तते। अनिवार्यता च तस्य पात्रताया अनुसन्धानपूर्णयोग्यतायाश्च। अद्यत्वे विश्वविद्यालयेषु अन्वेषकस्य प्राथमिकी योग्यता नैव परीक्ष्यते। अनुसन्धात्रा सहैव निर्देशकस्य, पथप्रदर्शकस्य वा योग्यता परीक्षणीया भवति। अद्यत्वे त्विदं विलोक्यते यत् प्रत्येकमध्यापकः प्रत्येकं विषये पथप्रदर्शनाय योग्योऽधिकारी वर्तते, प्रत्येकं स्नातकश्च योग्योऽन्वेषकः। शोधक्षेत्रेऽयं हि महान् स्वच्छन्दाचारः। अनुसन्धानक्षेत्रे बौद्धिकसमर्पणस्य

नितान्तमावश्यकता विद्यते। प्रश्नो ह्येकोऽयं समुदेति यत्–एको निर्देशकः कति शोधार्थिनां पथप्रदर्शनं वोढुं शक्ष्यति? इति।

यथोक्तं मया पूर्वं यत् अनुसन्धानस्य मूलमुद्देश्यं सत्यस्यान्वेषणमिति। प्रायेणाद्य दृश्यते यत् शोधप्रबन्धः पुराणरूपतां धत्ते अथवाऽधिकतया यान्त्रिक–प्राविधिकयोगकारणात् तथ्यपरकस्तिष्ठति। अनेन प्रबन्धस्य बाह्यपक्षः स्थूलो जायते, अन्तरङ्गपक्षस्तु न्यूनः। अतः शोधप्रबन्धे बाह्यान्तरपक्षयोः सापेक्षं महत्त्वं विशिष्य विचारणीयम्। अनुसन्धित्सवे आवश्यकीयेषु प्रमुखबिन्दुषु प्रमुखत एते बिन्दव उल्लेखनीयाः –

(१) विषयनिर्वाचनम्

(२) विषयविश्लेषणम्

(३) शिल्पविधिः

(४) पुस्तकालयः

(५) निर्देशनव्यवस्था, निर्देशकश्च

(६) प्रशिक्षणकेन्द्रम्

विषयनिर्वाचनकार्यमत्यन्तं जटिलं वर्तते। अतः विषयनिर्वाचने विविधसरणीनां निर्वाहो वर्तते। विषयनिर्वाचनप्रसङ्गेऽनेकबिन्दुषु विचार आवश्यकः। त एते बिन्दवो यथा – विषयस्योपयुक्तता, अन्वेषकस्य रुचिः, अन्वेषकज्ञानस्य परिधिः क्षमता च, सामग्रीणां सुलभता, निर्देशकस्य योग्यता, विषयस्योपयोगिता च। विषयनिर्वाचनमिव विषयविश्लेषणमपि शोधस्य महत्त्वपूर्णमङ्गमस्ति। जातेऽपि शोधप्रबन्धे प्रस्तुतस्य विषयस्य स्पष्टीकरणं नैव भवति। क्वचिद् पुनः पुनः प्रतिपादनकान्तारे तथ्यनिगूहनाद्यनेकसमस्या उत्थापयद् विषयगुम्फनादेः विषयविश्लेषणस्य च सीमातो दूरीभवति।

वैज्ञानिकता, लाघवम्, पूर्णता च शोधप्रविधेः प्रमुखाः गुणाः सन्ति। दौर्भाग्यात् साहित्यशोधार्थिनामुर्वरा कल्पना सर्वतन्त्रस्वतन्त्रा सती

उन्मुक्तक्षेत्रे विचरति, वैज्ञानिकतायाः प्रतिरूपं तेषां कृतिषूपलभ्यते च। वस्तुतस्तु अनुसन्धाने कलाविज्ञानयोः सुन्दर उपयोगी सुखदश्च मणिकाञ्चनसंयोगः सम्भवति, सोऽन्यत्र दुर्लभः। प्रक्रियाविषये सम्प्रदायद्वयं वर्तते। तत्रैकः कलात्मकः, वैज्ञानिकस्त्वपरः। कलात्मकप्रक्रियायां चित्रवत् मूर्त्तिवद् वाऽऽदौ विषयस्य स्वरूपाङ्कनं मानसे भवति, अनन्तरं तस्य संयोजनं क्रियते। परन्तु वैज्ञानिकप्रक्रियायां तथ्यसङ्ग्रहसंयोजनाभ्यां रूपसर्जनं भवति। वस्तुतः सम्प्रदायावुभौ विषयानुसारेणोपयोगिनौ। विषयरूपरेखा शोधप्रविधेः प्रारम्भिकश्चरणोऽस्ति। यतो ह्यनया सामग्रीसङ्कलनस्य सीमा निर्धारिता भवति। प्राप्तसामग्री-तथ्यानामालोकेन तत्रावश्यकतानुसारेण परिवर्तनमपि कर्त्तुं शक्यते। साम्प्रतमियमेका प्रक्रियाऽपि प्रचलति यत् प्रारम्भिकरूपरेखाया आवश्यकता नास्ति, क्वचित्तत्र पूर्वाग्रहः सम्भवेदिति धिया। यत्किमपि भवतु नाम, प्राथमिकी रूपरेखा तु प्रस्तोतव्याऽवश्यम्। रूपरेखायां शोधयोजनाऽपि सम्मिलिता भवति यत्र अनुसन्धानस्य विविधानां स्तराणां श्रेणीनां च नियोजनं भवति। शोधसीमाया निश्चिततया स्थूला रूपरेखाऽपि आवश्यकी वर्तते। रूपरेखया सहापि ग्रन्थसूची प्रस्तोतव्या। इयं ग्रन्थसूची रूपरेखेव प्राथमिकी भवति न त्वन्तिमा। अस्यां च आवश्यकतानुसारेण परिवर्तन-संशोधन-परिवर्धनादिन्यपि परस्ताद् भवितुमर्हन्ति। शोधकार्यारम्भात् पूर्वं सामग्रीसङ्कलनमावश्यकं, यदर्थं पुस्तकालयसङ्ग्रहालयादय उपयुज्यन्ते। पुस्तकालय-सङ्ग्रहालयेषु सामग्रीसङ्ग्रहः टिप्पणीसङ्ग्रहश्च सहैव स्याताम् अर्थात् प्रत्येकं सङ्गृहीतसामग्र्याः टिप्पणी आवश्यकी वर्तते। सामग्रीसङ्कलनावसरे या उद्भावना क्रियते सा शोधोपयोगिनी सम्भवति। सामग्रीसङ्कलनाय सम्प्रति या 'पत्रपद्धतिः' अङ्गीक्रियते, आङ्ग्लभाषया सा 'कार्डसिस्टम' इति कथ्यते। वर्गीकरणेन सह सामग्रीसङ्कलनमपि पृथक् पत्रेषु भवेत्। एतानि पत्राणि समानाकाराणि दृढानि च स्युः। पत्राणां वामभागे छेदः स्यात् येन पृथक् विषयाणां पत्राणि पृथक् बद्धुं शक्यन्ते। पत्रोपरि विषय-शीर्षकोपशीर्षक-ग्रन्थसन्दर्भाऽवतरण-टिप्पणीप्रभृतीनां समुल्लेखः स्यात्। प्रतिपादने तुलना-समीक्षा-निष्कर्षाः

आवश्यका:, परन्तु एतेषां त्रयाणां कृते समुचितं सन्तुलितं च स्थानं स्यात्। प्रत्येकं प्रबन्धस्यान्ते उपसंहारोऽप्यावश्यक: यत्र प्रबन्धस्योपलब्धे:, विषयसम्भावनायाश्च पुनरेकवारं निरीक्षणं समीक्षणं च भवेताम्।

शोधप्रबन्धस्य भाषाऽपि विषयानुसारिणी भवेत्। प्रबन्धस्य भाषा सुबोधा, प्राञ्जला च तु स्यादेव; शास्त्रीया, लाक्षणिकी, सन्तुलिता, वैज्ञानिकी अपि स्यात्। भाषा व्याकरणदृष्ट्या शुद्धा परिमार्जिता च भवेत्। भाषया सहापि प्रबन्धस्य शैली अपि पृथग् भवति यतोहि प्रबन्धलेखनं वस्तुगतमधिकं भवति, व्यक्तिगतं तु स्वल्पम्। अत: प्रबन्ध: व्यक्तिनिरपेक्ष इति वक्तुं शक्यते।

शोधप्रबन्धस्य विषयनियोजनमत्यन्तं महत्त्वपूर्णं भवति। तत्र विशिष्टस्य सन्तुलनस्य विशिष्टायश्च व्यवस्थाया अपेक्षा भवति। अन्यथा अनुसन्धानतथ्यानि इतस्तत इव दृश्यन्ते। तथ्यानां सङ्कलने उपयोगे च निष्ठाया आवश्यकताऽपेक्ष्यते। प्रायेणेदं दृश्यते यत् लेखक: स्वशोधप्रबन्धे तथ्यानां वास्तविकं रूपं प्रस्तोतुं नैव शक्नोति। तत्र प्रस्तुतिकरणे पूर्वाग्रह: प्रतिफलति अथवा तथ्यानामाकलनं मूलस्रोतसो नैव क्रियते।

तथ्यप्रतिपादनात् पश्चात् उपस्थापिते निष्कर्षे युक्तियुक्तता तर्कसङ्गतता च स्याताम्। न कोऽप्येवं निष्कर्ष: स्यात् यस्य पर्याप्तं प्रमाणं न भवेत्, स पुन: विशिष्य सन्दर्भमपेक्षताम्। निबन्धे स्रोतसां सन्दर्भग्रन्थानां चोल्लेख: वारं वारं भवति। एतदर्थं नवीनाया विकसिताया: सङ्केतसारिण्या उपयोग आवश्यक:। अपरिमिदं ध्यातव्यं यत् मूलं स्रोत: सन्दर्भो वा, कापि सूचना वा पादटिप्पणीरूपेण निबन्धे लेखनीया। निबन्धस्य मध्ये तत्संनिवेशेन भाषाप्रवाहो रुध्यते, प्रबन्धान्ते संनिवेशेन तु स्पष्टता नैव जायते। अन्यदपि ध्येयं यत् प्रबन्धलेखक: भाषान्तरध्वनीनां ध्वनिचिह्नानि कतिपयै: सङ्केतै: निर्माति। एवंप्रकारेण कतिपयग्रन्थानां सङ्केतोऽपि दीयते। पुनश्च कतिपये पारिभाषिका: लाक्षणिकाश्च शब्दा भवन्ति येषां प्रयोग: प्रबन्धे क्रियते। तेषां परिभाषा: परिशिष्टरूपेण प्रदेया:। परिशिष्टे सा सामग्री योज्यते या स्थानाभावात् कारणान्तराद्वा प्रबन्धे नैव योजिता पूर्वम्। आधारग्रन्थसूची–अनुक्रमणिकासम्बद्धं

कार्यं चापरमपि अवधेयम्। आधारग्रन्थसूची अनुक्रमणिका चोभे साभिप्राये वैज्ञानिक्यौ च स्याताम्। तत्र केवलं पृष्ठपूर्त्यै ग्रन्था नैव परिगणनीयाः। संस्करणं तेषां युक्तं स्यात्, तेषामुपादेयताऽपि स्पष्टा भवेत्।

निर्देशनव्यवस्थां निर्देशकं चादाय शोधार्थिनामेका कठिनता विद्यते। वस्तुतः समस्येयं भृशं जटिला। अस्य समाधानमन्वेष्टव्यम्। शोधकार्याय प्रशिक्षणकेन्द्राणां व्यवस्थाऽनिवार्या। देशे एवम्भूतानां प्रशिक्षणकेन्द्राणां व्यवस्था स्यात्, यत्र प्रतिवर्षं मासात्मिका अनुसन्धानस्य विविधाः शाखा आधृत्य सङ्गोष्ठीद्वयी प्रभवेत्। अनया चानुसन्धानस्योपयुक्तं वातावरणं निर्मीयेत, उपयोगि अनुसन्धानकार्यं च सम्भवेत्। विषयाणां पुनरावृत्तिरेषां केन्द्राणां माध्यमेन नियन्त्रयितुं शक्यते।

अनुसन्धानसूत्रम्

लेखकः - श्रीमद् अमीरचन्द्रशास्त्री
अनुवादक : डॉ. आरावमुदन्

सर्वासां समस्यानां समाधानं श्रीमद्भगवद्गीतायां दरीदृश्यते इति कथने न काऽपि अतिशयोक्तिः। अपि च शोधच्छात्राणां कृते कथम् अनुसन्धान-सूत्रप्रधानम् इति प्रश्नस्यैव समाधानं नितरां दृश्यते भगवद्गीतायाम् सर्वप्रथमम्—

ततः पदं तत्परिमार्गितव्यम् ।।१५.४।।

इत्युक्तदिशा 'परमपदम्' इत्यस्य गवेषकः प्राग्वेषणे प्रेरणां प्राप्य शोधकार्यस्य कृते स एव अग्रेसरः इति व्यपदिशति। तथैव छात्रः सुयोग्यानां निर्देशकानां अध्वदर्शने सरितुं सूचनां प्राप्नोति। स च निर्देशकः विद्यावयोवृद्धः सन् गवेषकेन स्पष्टं कार्यं कारयितुं समर्थो भवेत्।

उक्तं च - आद्यं पुरुषं प्रपद्येत् यतः पुराणी प्रवृत्तिः प्रसृता इति। तथैव —

निर्मानमोहा जितसङ्गदोषाः।।१५.५।।

इत्युक्तिवत्–शोधछात्रः मानमोहेन रहितो भूत्वा दुःसङ्गेन मुक्तोभूत्वा लौकिकसुखदुःखादिना विमुखस्सन् कामवासनां विना अध्यात्मविद्यां प्राप्तुं उपदिष्टो भवति। उक्तप्रकारेण प्रबुद्धाः जनाः यदा परमपदस्य अनुष्ठानं प्रकुर्वन्ति तेनैव अनुसन्धानतां प्राप्नुवन्ति। तदा अनुसन्धानान्तरेषु तेषां कीदृशं काठिन्यं सम्भवेत्?

तदेव–

विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ।।१५.२०।।

एवं–

यतन्ते योगिनश्चैनं पाश्यन्त्यात्मन्यवस्थितम्।
यतन्तोऽप्यकृतान्मानो नैनं पाश्यन्त्यचेतसः।। १५.११।।

इत्यभिप्रायानुसारेण विमूडः शोधकार्ये अनधिकारी अपि च ज्ञानवान् एव अत्र अधिकारीति ज्ञायते। न केवलं इत्थं, प्रयत्नशीलाः एकाग्रचित्ताः सहृदयीव्यक्तयः एव शोधतत्त्वं प्राप्नुवन्ति। एवं प्रयत्नहीनेभ्यः प्राप्तिः न भवति। इति विचारस्य निर्देशः कृतः अस्ति। यथा उपर्युक्तश्लोके।।१५. ५।। निरूपितार्थस्य–

समदुःखसुखःस्वस्थः समलोष्टाश्मकाञ्चनः (१४.२४.२५)

इति श्लोकमुखेन स्पष्टीकरणं दत्तमस्ति। सुखदुःखेषु मृत्तिका पाषाणखण्डः सुवर्णं च लोके विद्यमानप्रियाप्रियविषयेषु च समभावं यः स्थापयति स आरोग्यवान् बुद्धिमान् एवं शोधकार्ये अधिकारी भवति। स सर्वदा मानापमानयोः सर्वदा समानबुद्धिं स्थापयति। मित्रत्वे शत्रुत्वे च रागद्वेषं न स्थापयति। एवं शोधकार्येण विना अन्यत् सर्वं संरम्भसाध्यकार्याणां परित्यागः चिकीर्षति। अस्मिन् अध्याये ११.१६.१७.१८ श्लोकेषु रजोगुण तमोगुणानां त्यागः एवं सत्वगुणानां वृध्यर्थं शास्त्रविहितपवित्रकर्मकरणस्य फलं सात्विकम् अर्थात्– निर्मलं भवति। एवं सात्विकगुणेन एव यथार्थज्ञानस्य प्राप्तिर्भवति इति सङ्केतरूपेण उक्तं वर्तते। अनेन सात्विकपुरुषस्य ऊर्ध्वगतिद्वारा शोधकार्यपरीक्षणे उत्तीर्णताया अपि निर्देशः कृतः वर्तते। शोधछात्राणां कृते केषाञ्च व्रतनियमानां वर्णनम्–

अमानित्वमदम्भित्वमहिंसाक्षान्तिरार्जवान्।।१३.७.९.११।।

इति श्लोके। शोधछात्रैः मानम्, कार्पण्यं हिंसायाः त्यागः क्षमा, सरलता शुचित्वम्, स्थिरता एवं आत्मसंयमेन च मार्गदर्शकानां अन्ते

उषित्वा स्वस्त्रीगृहादिविषयेषु एवं ममकारस्य मितमेव आदरं दत्वा इहानिष्टप्राप्तिविषये समचित्तं हत्वा आध्यात्मज्ञाननिष्टोभूत्वा तत्त्वज्ञानेनैव पदार्थदर्शनं भवति इति मन्तव्यम् अवगन्तव्यञ्च। अतः एतानि सर्वाणि जिज्ञासूनां ज्ञानप्राप्तेः साधनं भवति इति हेतोः शोधछात्रेण एतानि सर्वाणि स्वनिहितधर्मत्वेन अनुष्ठेयानि। अस्मिन् अध्याये २४.२५ श्लोकयोः ध्यान–योगः ज्ञानयोगः कर्मयोगः एवं श्रवणयोगद्वारा शोध्यतत्त्वानां प्राप्तिः कथं? इत्यपि निरूपितं वर्तते।

द्वादशाध्यायस्य प्रथमे श्लोके युक्ततमशोधकार्ये संलग्न अर्थात् नियुक्तां व्यक्तिं उद्दिश्य अर्जुनेन पृष्टप्रश्नस्य उत्तरं भगवान् इत्थं सञ्चयक्षे।

मय्यावेश्यमनोयेमां नित्ययुक्ता उपासते।
श्रद्धया परयोपेताः ते मे युक्ततमा मताः।। गीता १२.०२।।

अर्थात् यः शोधछात्रः स्वशोध्यविषये मन आविष्टस्सन् नित्यतत्परोभूत्वा परमश्रद्धया सह शोधकार्यं अनुतिष्ठति सः एव युक्ततमः इति मे मतिः। तत्रैव ७.८.१३. एवं १४. श्लोके अनन्यभावेन स्वशोध्यविषयस्य अनुसन्धीयमानेभ्यः शोधकर्तृभ्यः तत्रैव स्वाविष्टस्य चित्तस्य पुरोगतिः जायते। अतः तत्रैव सुमनयोक्तो भूत्वा स्वबुध्या कार्यं समनुतिष्ठेत्। एवं उपदेशं ददत् सः प्राणिषु द्वेषं न स्थापयित्वा सुस्नेहयुक्तो दयापूरितो भवेत् इति आदेशं दत्तवान्। एवं निर्ममनिरहङ्कारः समदुःखसुखक्षमाशीलः सदा सन्तुष्टः संयमी, दृढनिश्चयी एवं स्वविषयेषु मनः बुद्धिं च आर्प्यमाणः भवेत् इत्येवं रूपेण शिक्षणं प्रदत्तवान्नस्ति।

अत्र गीतायां भगवता मार्गनिर्देशकस्य निर्देशानुसारं काले काले शोधकार्यस्य गतिं तस्य विधिं च प्रदर्शयितुं अपि समूढे।

अर्जुनेन उक्तम्–

मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम्।
यत्वयोक्तं वचस्तेन मोहोऽयं विगतो मम।।११.१।।

एवं शोधकार्ये शोधविधिं दृष्ट्वा सोत्साहेन कार्यम् अनुष्ठीयमाणः छात्रः भूरिविनयपूरितो भवेत् इत्यपि अभिहितं वर्तते।

द्रष्टुमिच्छामि ते रूपं ऐश्वर्यं पुरुषोत्तम।। ११.३।।
मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम्।।

शोधकार्यं कुर्वन्तः शोधछात्राः यदि एकस्यां गोष्ठ्यां मिलन्ति चेत् किं कुर्वन्ति? तत्र विषये भगवता प्रोक्तम्।

मच्चित्ता मद्गुणप्राणा बोधयन्तः परस्परम्।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च।।

अनुसन्धानात्मकः करणस्यैव चित्तं इति ब्रुवन्ति। एवं तदर्थं दूरप्रदेशं प्रति गमनमित्यादि कार्याणां अर्थात् बाह्यकरणानां श्रोत्रनेत्रादीनां प्राणाः इति वदन्ति। येषां चित्तं प्राणश्च स्वविषये रमतः तेषां स्वचिन्तनम् अनेकेषु वदन्तः भवन्ति। अपि स्वमार्गदर्शकानां कृतेऽपि सर्वदा समाख्यास्यन्तः भवन्ति। मार्गदर्शकैश्च च ग्रन्थनिर्देशादिकं प्राप्नुवन्ति एवम् अन्योन्य समालोचनेन एवं विध अनुसन्धानकार्येण शोधकार्यं शीघ्रमेव साफल्यं भजते। प्रेम्णा एवं श्रद्धया अनुसंधाता यं विषयं स्वीकृत्य गवेषणं करोति तस्मिन् एव निरन्तर-रूपेण संलग्नो भवति येन सः यथार्थतत्त्वं प्राप्नोति सः विषयः तस्मै वृद्धिं प्रयच्छति।

एवं च परिश्रमेण प्रामाणिकरूपेण शोधकार्यं ये कुर्वन्ति तेषां कृते ईश्वरोऽपि सहाय्यं प्रददाति।

तेषामेवानुकम्पार्थमहमज्ञानजं तमः।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता।। १०.११।।

एवंरूपेण सततप्रयत्नयुक्तव्यक्तीनां कृते स्वानुग्रहं प्रदातुमेव आत्मरूपेण स्थितपरमात्मा अन्तःकरणेषु अज्ञानान्धकारस्थाने सुज्ञानदीपं ज्वालयति।

अस्मिन्नेव दशमाध्याये शोधस्य अनेकविषयाणां एवं तस्य परिणामस्य विषयेऽपि उल्लिखितम् अस्ति। अर्जुनेन पुनः –

केषु केषु च भावेषु चिन्त्योऽसि भगवन् मया।।१०.१८।।

इमं प्रश्नं प्रच्छणानन्तरं १. सर्वभूताशयस्थित आत्मा २. सर्वभूतादि मध्यान्तपरमात्मा ३. आदित्येषु विष्णुः ४. ज्योतिषु अंशुमान् रविः ५. मरुत्सु मरीचिः ६. नक्षत्रेषु शशिः ७. वेदेषु सामवेदः ८. देवेषु इन्द्रः ९.इन्द्रियेषु मनः १०. प्राणिषु चेतनत्वम् ११. रुद्रेषु शङ्करः। १२. यक्षराज्ञेषु कुबेरः १३. वसुषु पावकः १४. पर्वतेषु सुमेरुः १५. पुरोहितेषु बृहस्पतिः १६. सेनापतिषु स्कन्दः १७. जलाशयेषु सागरः १८. महिर्षिषु मृत्युः १९. वाणीषु एकाक्षरब्रह्म २०. यज्ञेषु जपयज्ञः २१. स्थावरेषु हिमालयः २२. वृक्षेषु अक्षयः २३. देवर्षिषु नारदः २४. गन्धर्वेषु चित्ररथः २५. सिद्धेषु कपिलमुनिः २६. अश्वेषु उच्चश्रवः २७. गजराजेषु ऐरावतः २८. मनुष्येषु राजारामः २९. अस्त्रेषु वज्रः ३०. धेनुषु कामधेनुः ३१. जन्मकारणेषु कामः ३२. सर्पेषु वासुकिः ३३. नागेषु शेषः ३४. जलचरेषु वरुणः ३५. संयमनकर्तृषु यमः ३६. दैत्येषु प्रह्लादः ३७. सञ्चालकेषु कालः ३८. अन्यपशुषु सिंहः। ३९. राक्षिषु गरुडः ४०. पवित्रकेषु पवनः ४१. शास्त्रधारिषु परशुरामः ४२. मत्स्येषु मकरमच्छः ४३. नदिषु गङ्गा ४४. सृष्टिराद्यन्तम् परमात्मा ४५. विद्यासु अद्यात्मविद्या ४६. प्रवक्तृषु वादः ४७. अक्षरेषु अकारः ४८. समासेषु द्वन्द्वः ४९. अविनाशिषु कालः ५०. विश्वतोमुखेषु धाता ५१. सर्वहरेषु मृत्युः ५२. भविष्येषु उद्भवः ५३. नरसंबन्धशक्तिषु कीर्तिः स्त्रीः वाक् स्मृतिः मेधा धृतिः एवं क्षमा ५४. गन्तृषु द्यूतः ५५. तेजस्विषु तेजः ५६. विजयिषु जयः ५७. व्यवसायिषु निश्चयः ५८. सत्ववत्सु सत्वम् ५९. यादवेषु कृष्णः ६०. पाण्डवेषु अर्जुनः ६१. मुनिषु व्यासः ६२. कविषु शुक्राचार्यः ६३. दमनकर्तृषु दण्डः ६४. विजिगीषु नीतिः ६५. गोपनीयेषु मौनम् ६६. ज्ञानिषु ज्ञानम्। एतानि तत्त्वानि अनुसन्धानविषयः एवं अनुसन्धानद्वारा प्राप्तः परिणामः अथवा निर्णयः एव भवति। एषु **"वादप्रवदतामहम्"** १०.३.२ इत्यनेन शोधप्रबन्धस्य शैलीं निरूपितमस्ति।

शोधप्रबन्धः वादशैल्यां एव भवेत् न तु जल्पशैल्यां वितण्डशैल्यां वा इति।

एवं रूपेण १०.११.१२.१३.१४ तथा १५ अध्यायेषु विद्यमान कानिचन अनुसन्धानसूत्राणां सङ्कलनम् अत्र कृतं वर्तते।

मार्गनिर्देशकानां समीपे स्वाशोधकार्यार्थम् उपयुक्तप्रश्नं प्रष्टुं शोधछात्रैः पत्राङ्कितम् अपि कर्तव्यम् भवति। यदा समयः लभ्यते तदा तेषां समीपे गत्वा प्रश्नस्य समाधानं साधयेत्।

अष्टमाध्यायस्य आरम्भे युगपदेव सप्त-प्रश्ना अर्जुनेन पृष्टाः। तदा भगवता श्रीकृष्णेन सकृदेव तेषां उत्तरं सूत्रशैल्या प्रादायि। यथा–

किं तत् ब्रह्म?	अक्षरं ब्रह्मपरमम्।
किमध्यात्मम्?	स्वभावोऽध्यात्ममुच्यते।
किं कर्म?	भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः।
अधिभूतं किं?	पुरुषश्चाधिदैवतम्।
अधियज्ञः कथं कोऽत्र?	अधियज्ञोऽहमेवात्र देहे।
प्रयाणकले च कथं ज्ञेयोऽसि?	अन्तःकाले च मामेव स्मरन्मुक्त्वा कलेवरम् यः प्रयाति स मद्भावं याति। नास्त्यत्र संशयः।

अत्रैव स्वशोध्यविषयस्य तत्त्वं कथं प्राप्तुं शक्यते इत्यत्र मार्गः उक्तः।

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तनम्।।

हे अर्जुन! अनुचिन्तनम् एवम् अन्वेषणशील अभ्यासयोगेन युक्तः एवम् अनन्यगामी चित्तेन अर्थात् स्थिरबुध्या सः एकस्मिन् दिने परमदिव्यपुरुषं प्राप्नोति। एवं सति अन्यशोधविषयस्य का कथा? अपि च ये जनाः

अनन्य-भावेन शोधकार्यं कुर्वन्ति तादृशः नित्य उद्यतजनानां कृते सः शोधविषय एव योगक्षेमं **सम्यक्प्रापयति**। (८.२२) यः स्वशोधविषये एव बुद्धिं स्थापयित्वा एकचित्तेन शोधात्वेषणरूप भजनं करोति बुध्या अस्य पूजनं, तदर्थं सङ्गतिकरणम् एवं त्यागं च करोति। एवं च अहङ्कारेण नमस्कारमपि विधास्यति। सः शोधविषयार्थम् आत्मनम् अर्पयित्वा सः विषयः एव परमगतिरिति मत्वा अस्य मर्म स्वीकारं करोति। (८.३४) अयमेव श्लोकः भगवता श्रीकृष्णेन श्लोकस्य पूर्वार्धेऽपि (९.३४) उक्तम्। अयमेव विषयः उत्तरार्धस्य (१८.६५) समाप्तिकाले किञ्चित् पाठभेदेन कथितम्। शोधकार्येऽपि चतुर्विधपुरुषाणां प्रवृत्तिः दृश्यते।

चतुर्विधाः भजन्ते मां जनाः सुकृतिनोऽर्जुनः।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभः।। ८.१६

चतुर्विधश्रेष्ठविद्वांसः शोधकार्यं अनुतिष्ठन्ति। ते च १. वृत्तिः अथवा काऽपि आजीविका न प्राप्ता इति हेतोः २. विषयविशेषजिज्ञासुः ३. शोध-वृत्या ये धनं प्राप्तुम् अथवा अर्जयितुं इच्छन्ति ४. एवं ज्ञानिनः भवतु, परन्तु शोधकार्यं कुर्वाणाः सर्वे ऊर्ध्वगतिं उन्नतिं च प्राप्नुवन्ति।

तेषु ज्ञानी साक्षात् ब्रह्मरूपी एव भवति। स एव लोकोत्तरतत्त्वं समाश्रयति। यः श्रद्धया निष्ठया सह अन्वेषणं कर्तुं प्रयतते वाच्छति च तस्मै ईश्वरोऽपि तस्मिन् विषये तस्य निष्ठां स्थिरं करोति। स्थिरविश्वासेन निष्ठाद्वारा च विषयतत्परतया सह भगवद्-आराधनं करोति। एवं तादृशी आराधनया अथवा अनुसन्धानेन यत् फलं वाञ्छति यादृशी सिद्धिं च इच्छति तत् सर्वं परमात्मा पूर्णं करोति। (७.२१.२२)

सर्वे विद्वांसः शोधकार्यं न कुर्वन्ति। परन्तु तेषु केचन स्वविषयस्य तत्त्वं महत्वं च न ज्ञातुं शक्तुवन्ति। अयमभिप्रायः –

मनुष्याणां सहस्त्रेषु कश्चित् यतति सिद्धये।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः।। ७.३

इत्यनेन श्लोकेन उक्तमस्ति।

षष्ठाध्याये बहूनि अनुसन्धानसूत्राणि उपलभ्यन्ते शोधकार्यारम्भे शोधसामग्रीणां सङ्ग्रहार्थं कर्तुः सर्वत्र अन्वेषणीयः। परन्तु शोध-सामग्रेः सङ्ग्रेहणानन्तरं तदेकचित्तेन शान्त्या उपविश्य शोधकार्यम् अनुष्ठातव्यञ्च भवति। (६.३) अपि च शोधकार्यकर्त्रा एव स्वात्मानः उन्नतिः उद्धारः कर्तव्यः। सर्वदा सोत्साहेन कार्यं कुर्यात्। तस्य स्वभावः एव तस्य कृते मित्रं शत्रुः बन्धुश्च भवति। यः सोत्साहेन स्वात्मानं प्रति वशीभूताः भवन्ति ते त्वदर्थं बान्धवा भवन्ति। किं तु अनात्मा ये स्वात्मानं प्रति न वशीभूता अर्थात् निरभिमानिनः भवन्ति ते शत्रुवत् सर्वदा उपकारं चिन्त्यमाणाः भवन्ति। ६.५.६

जितात्मा प्रशान्तः भवति। किमर्थम् इति चेत् तेषाम् आत्मा अत्यन्तसमाहितः भवति। ते सर्वदा शीतोष्णेषु, सुखदुःखेषु मानापमानयोश्च समानाः भवन्ति। ते शास्त्रीयज्ञानम् एवम् अनुभवात्मक-ज्ञानेन तृप्त्वात् निर्विकाराः भवन्ति। तस्मादेव उच्यते ते जितेन्द्रियाः इति, तदेव दृश्यते ते समेषां लोह अश्म, सुवर्णेषु च समानवृत्तिं समानमतिं च स्थापयन्ति। (६. ७.८)

बहुभुज्यमाणाः अभुज्यमाणाः बहुनिद्रयन्तः अनिद्रयन्तः सर्वदा शोधकार्यं कर्तुं असमर्थाः भवन्ति। यस्य, आहार-विहारेषु नियमितत्वं दृश्यते, यस्य, कार्यकरणे न अतिप्रयासः वर्तते, यस्य, निद्रा अनिद्रा च नियमिता भवति तस्मै शोधकार्यं दुःखहानिं जनयति। (६.१६, १८)

सङ्कल्पेन उद्भुतसर्वकामनानां सम्पूर्णरूपेण त्यागं कृत्वा दृतिद्वारा गृहीतबुध्या मन्दं मन्दं च शान्तेः प्राप्तिर्भवेत्। एवं शोध-विषये एव मनस्समाधीय कदाऽपि किमपि न चिन्त्येत्। अपि च चञ्चलबुद्धिः अस्थिरमनः अन्यस्मात् विषयात् निष्कास्य स्वशोधविषये एवं प्रतिष्ठापनीयम्।

अत्र अर्जुनेन पृष्टं यत् श्रद्धायुक्त असंयमी पुरुषः शोधकार्येण विमुखो भूत्वा शोधकार्यं साधयितुं न शक्नोति। तस्य का गतिः? (६.२८)

इति प्रश्नस्य भगवतः समाधानम् एवम् अस्ति, येन शोधकार्यं समाचरितं तस्य नाशः वर्तमानकाले एवं कालान्तरेऽपि न भवति।

यः कल्याणकार्यं, सुकार्यं करोति तस्य दुर्गतिः सर्वदा न भवति। (६.४०) अपि च कालान्तरे अनुकूलपरिस्थितिं प्राप्य पुनः स्वप्रयासेन कार्यं सुयोजयति। अन्ते च सिद्धिं यशश्च प्राप्नोति। अर्थात् योगभ्रष्टानां जन्मान्तरे प्राप्यमानम् अनुकूलं परिस्थितीनां वर्णनं सङ्केतरूपेण भगवता समाधयि।

पञ्चमाध्याये शरीरः मनः बुद्धिः एवं मनोरहितकेवल इन्द्रियद्वारा व्यवहारसम्बद्धकर्म कुर्वन् अपि आत्मशुध्या सह स्वविषयस्य शोधार्थं शोधछात्रस्य अनासक्तत्वस्य वर्णनं प्रदर्शितमस्ति। (५.११)

एवं अस्मिन् विषये एषः बुद्धिं स्थापयित्वा मनः प्रणिधानं च कृत्वा शोधविषये निष्ठा तत्परता च यः स्थापयति तस्मै तेन ज्ञानेन मनसि कल्मषनिवृत्तिः जायते। तस्य शोधप्रबन्धोऽपि शोधप्रबन्धपरीक्षकात् पुनः संशोधनार्थं न गच्छति। (५.१८)

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः। (४.३.४)

इत्यनेनाऽपि शोधछात्रैः स्वमार्गनिर्देशकानां निर्देशनं सर्वदा स्वीकर्तव्यम् इति अभिहितं वर्तते। तत्त्वदर्शिनां ज्ञानिजनानाम् उपदेशानुसारेण, प्रणिपातेन विनयेन मनः शुद्धिः परिप्रश्नेन वाक्शुद्धिः एवं निर्देशानुसारं कार्यसम्पादनं, एवं सेवया कायशुद्धिः साधनीया।

विद्याह वै ब्रह्मणमाजगाम गोपाय मा शेवधिष्ठेऽहमस्मि।
असूयकायानृजवेऽयताय न मा ब्रूया वीर्यवती तथा स्याम्।।

इत्यादि ऋग्वेदीय मन्त्रेषु विद्यासमीपं गत्वा अस्माकं रक्षणार्थं च प्रार्थनं कृत्वा असूयक अथवा निन्दकः, अर्थात् यस्य वाणी अशुद्धा अस्ति, अनृक्षु या कुटिलता वर्तते यस्य मन अशुद्धम् वर्तते एवं यस्य

कायः दोषपूरितो विद्यते सः ज्ञानप्रापणार्थम् अनधिकारी इति गदितं वर्तते।

अस्मिन् अध्याये ज्ञानप्राप्तेः त्रीणिसाधनानि प्रदर्श्य शोधकर्तृणां ध्यानाकर्षणं कृतमस्ति।

श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिं अचिरेणाधिगच्छति।। ।।४.४०।।

श्रद्धा, तत्परता, एवं संयमः एतेषां त्रयाणां योगे एव ज्ञानप्राप्तिः भवति। न तु एकेनैव साधनेन इति उक्तम्। एवं ज्ञानप्राप्त्यनन्तरं शान्तिप्राप्तिरपि अचिरादेव भवति। तस्य विपरीतं वर्तते–

अज्ञश्चाश्रद्धधानश्च संशयात्मा विनश्यति। (४.४०)

अत्र उद्घोषितम्, अज्ञानी श्रद्धाहीनः एवं संशयालुद्वारा शोधकार्यं नाशं गच्छति इति।

तृतीयाध्याये, कामक्रोधौ शोधकर्तृणां परम–शत्रुरिति अभिप्रेतम्। (३.३७) यथा–धूमेन व्याप्ता अग्निः मलिनदर्पणम्, जरायसा युक्तः गर्भः तथा एतेषां बुद्धिः व्याप्ता (असंस्कृता) भवति इति अवर्णयत्। ज्ञानिनां नित्यवैरी–भवति एतादृशी दुष्टकामनया ज्ञानस्य आवृत्ति र्भवनम्, यथा इद्रियमनबुद्धयः अज्ञानस्य अधिष्ठानानि भवन्ति, तथा एतेषां ज्ञान द्वारा एव ज्ञानावृत्तं (ज्ञानव्याप्तिं) कृत्वा कामद्वारा शरीरधारेः विमोहकरणम् इति विषयोऽपि प्रस्थापितं वर्तते। तस्मात् अर्जुनवत् समस्तशोधार्थीनां कृते ज्ञानविज्ञानविषयकः पापमयकार्यस्य हननार्थं इन्द्रियसंयमं स्थापयितुञ्च उपदेशः प्रदत्तोऽस्ति।

द्वितीयाध्यायेऽपि अनुसन्धानसूत्रस्य बाहुल्यं दरीदृश्यते। कार्पण्यदोषेण स्वभावस्य उपहतभवनं तथा कर्तव्यं, एवं धर्मस्य विषये, चितस्य जागरणम् अनुसन्धानस्य आतुरतायाः उत्पन्नकरणं च तत्र अश्रावयत्।

या आतुराव्यक्तिः शिष्यभावेन मार्गनिर्देशकस्य शरणं गत्वा स्यकल्याणार्थं मार्गदर्शनं पृच्छति तदा एव शोधकार्यस्य आरम्भः भवति।

(२.७)

एतादृशं शोधकार्यार्थम् एका व्यवसायिका बुद्धिः इति अपेक्षिता। किमर्थं चेत् बहुशाखा एव अनन्तबुद्धिः व्यवसायत्मिका एव भवति। (२.४१) शोधकर्तरि यावत्पर्यन्तम् शोधकार्येषु मोहबुद्धिः भवति तावत्पर्यन्तं तस्य ज्ञानाभिवृध्यर्थं ज्ञास्यमानस्य शास्त्रस्य आवश्यकता भवति। (२.५२)

अत्र अर्जुनेन, शोधकार्यार्थं स्थितप्रज्ञत्वं आवश्यकम् इति अभिप्रेतम्। अस्मिन् विषये चत्वारः प्रश्नाः दर्शिताः। १. समाधिस्थस्य स्थितप्रज्ञस्य परिभाषा का? २. स्थितप्रज्ञेन किं च उद्यते? ३. कथं तेन उपविश्यते? ४. तेन कथं गम्यते?

यः मनोगत सर्वासां कामनानां त्यागं कृत्वा सर्वदा स्वात्मनि सन्तोषमनुभवति, स एव स्थितप्रज्ञ इति परिभाषितम्।

उपसंहारः

प्रजहातियदा कामान् सर्वान् पार्थ! मनोगतान्।
आत्मत्येवात्मना तुष्टः स्थितप्रज्ञः यतोच्यते।।

एवं च–

दुःखेषु अनुद्विग्मनाः सुखेषु विगतस्पृहः। यस्य मनः दुःखेन उद्विग्नः नास्ति, तथा सुखार्थं स्पृहां न करोति इत्यादीनि अन्यानि लक्षणानि स्थितप्रज्ञस्य इति उच्यते। एतानि सर्वाणि लक्षणानि शोधकर्तृषु अपेक्षितं वर्तते। किमर्थं इति चेत् स्थितबुद्धित्वं असम्मूढस्य बहुश्रेष्ठगुणः वर्तते। अपि च असम्मूढ एव शोधकार्यं कर्तुं प्रभवति यावन्पर्यन्तं स्थितप्रज्ञस्य स्थिरबुद्धिः शोधकार्येऽथवा शोधब्रह्मणि स्थितं स्थिरं च भूत्वा रमते तावत् पर्यन्तं विषयान्तरेषु अस्य प्रतिष्ठापनं सहज एव वर्तते इति।

।। शम् ।।

अनुसंधानस्य क्रियाविधिः

लेखकः - डा० नगेन्द्रः
अनुवादकः - डॉ. हर्षनाथमिश्रः

पाश्चात्यशोधसंस्थानेषु क्रियाविधिप्रशिक्षणे महदवधानं बलं च दीयमाने दृश्येते। परन्तु संस्थानानामीदृशां सम्बन्धः बाहुल्येन सामाजिकविज्ञानैः शुद्धविज्ञानैरेवाधिकोऽस्ति। एषु यः शोधविषयकः शोधो जायमानो विलोक्यते स प्रायेणोक्तक्षेत्रविषयक एवाऽस्ति। साहित्यक्षेत्रेऽपि वैज्ञानिकं समाजशास्त्रीयं च क्रियाविधिं यथायथं यथावश्यकं च संशोध्योपयोगीकर्तुं चर्च्यते।

क्रियाविधेः प्रधानान्यङ्गानि सन्ति–सामग्रीसंकलनम्, तस्याः परीक्षणम् (प्रमाणीकरणम्) त्यागग्रहणे, विश्लेषणसंश्लेषणे, वर्गीकरणम् निष्कर्षनिर्णयो च।

१. सामग्रीसंकलनम् –

सामग्रीसंकलनाय प्रथमाऽऽवश्यकताऽस्ति – तस्या आधारस्रोतसां सम्यग् ज्ञानम्–'अनुसंधानविषयसम्बद्धाः सामग्र्यः कुत्र कुत्रोपलब्धा भवितुं शक्नुवन्ति' इतीदृश वस्तुनः पूर्णतो ज्ञानमिति भावः।

एवंभूतायाः सामग्र्याः सर्वप्रमुखानि अपेक्षाकृतानि सुलभानि स्रोतांसि सन्ति–प्रसिद्धाः पुस्तकालयाः विशेषतः प्राचीनाः पुस्तकालयाः, यत्र च संस्कृतग्रन्थानां विपुलः संग्रहोऽवतिष्ठते। संस्कृतक्षेत्रं यतोहि देशस्य सर्वप्रदेशानभिव्याप्य वर्तते, अत एवेदृशा ग्रन्थकारा देशस्य प्रतिक्षेत्रं प्रतिग्रामनगरं च विद्यमानाः सन्ति। उत्तरभारते वाराणसी, पूर्वाञ्चले कलकत्ता, महाराष्ट्रे पुण्यपत्तनम् (पुणे) दक्षिणे तञ्जोर–मद्रासादौ चैवंविधमनेकं केन्द्रमस्ति।

अन्यच्च, देशस्य प्रायः प्रत्येकस्मिन् भागे प्राचीनानां पाण्डुलिपीनां भाण्डागाराः प्राप्ताः सन्ति। देशस्य सीमातो बहिर्भागे नयपाले (नेपाले) त्रिविष्टपे (तिब्बते) चापि संस्कृतवाङ्मयसम्बद्धाऽनुसंधानसामग्र्यः प्राचुर्य्येण प्रभूतमात्राया-मुपलभ्यन्ते। एष्वनेकत्र केन्द्रेषु ग्रन्थतालिकाः ग्रन्थसूच्योऽपि सामान्यरूपेण विषयक्रमेण वोपलब्धा भवन्ति। अनुसंधानकेन्द्रेषु उपर्युक्तायाः सामग्र्याः सूचनापुस्तकेनावश्यं भवितव्यम्, येनानुसंधानकर्तुरितस्ततो वृथाचङ्क्रमणप्रयुक्तो मुधा समयापव्ययो न स्यात्। प्रकाशिता अप्रकाशिताश्चानुक्रमणिकाः सामग्रीसंकलने पर्याप्तं साहाय्यं दातुं प्रभवन्ति शक्नुवन्ति च।

सामग्रीसंकलनस्य पद्धतयः–

(क) सूत्रसंग्रहः टिप्पणविधिश्च–

अनुसंधानस्य प्रायोऽयं सामान्यविधिरस्ति, यमाश्रित्यानुसंधाता विभिन्नेभ्यः स्रोतोभ्य आगतामधिगतां वा सूचनां संक्षिप्तटिप्पणीरूपेण, पश्चादुपयोगोद्देश्येन, एकत्रितां करोति। एतत्कृते च विविधा उपायाः प्रयुज्यन्ते, येषु सर्वाधिकसुगमोपायोऽस्ति कार्डानां (पत्रखण्डानाम्) उपयोगः। अयं विधिर्यद्यपि प्रायेण सर्वविधानां शोधकार्याणां कृते आवश्यकस्तथापि साहित्यविषयकानुसंधानायैष विधिरनिर्वाया सर्वाधिकोपयोगी चास्ति। वस्तुतः साहित्यविषयकानुसंधाने त्वयमेव प्रथमो व्यावहारिकश्च पदक्रमोऽस्ति।

(ख) प्रश्नोत्तरविधिः–

एतस्मिन् विधावनुसंधाता विषयनिष्ठविभिन्नपक्षसम्बद्धां प्रश्नावलीं विरचयति, तेषामुत्तराणि प्रश्नानां च विविधवर्ग्यव्यक्तिभिर्लिखितानि प्राप्य, तान्याधारीकृत्य तथ्यानां संकलनं करोति।

(ग) साक्षात्कारविधिः–

एतदनुसारेण विषयविशेषज्ञसम्बद्धव्यक्तिभिः सह साक्षाद् वार्तालापं कृत्वा सामग्रीसंकलन-मतसंग्रहौ क्रियेते। अयं संकलनादिरन्ते सामग्र्या एवावयवीभवति। अन्तिमयोरुभयोरपि विध्योरद्यत्वे समाजविज्ञान-

मनोविज्ञान–भाषाविज्ञानादिक्षेत्रे महान् परिलक्ष्यते। अभितः परितश्च सम्बद्धव्यक्तीः संग्रहकर्तॄणां वृन्दानि जालवद्वितताानि दृश्यन्ते, विषयसम्बद्धविषयविशेषज्ञैः सम्पर्कं संस्थाप्य संग्रहकर्तारो वैज्ञानिकरीत्योत्तराणि चैकत्रीकृत्य तेषां सम्पादनं कुर्वन्ति। यथा तत्र क्रियते तथेहापि कर्तव्यमित्यनुकरणप्रकृत्या साहित्येऽपि एतयोरुपयोगः प्राप्तस्थानोऽभूत् प्रारब्धश्च। परन्त्वस्माकं क्षेत्रेऽनयोः–प्रश्नोत्तरविधिसाक्षात्कारविध्योश्च द्वयोरेवोपयोगिता इयती सीमिता वर्तते यदेषामविचारितोपयोगेनानुसन्धाता मार्गभ्रमेण दिग्भ्रमेण च ग्रस्तो भवितुं शक्नोति। अनयोरुपयोगः सामान्यतः समयसाध्योऽस्ति, अत्रत्यानां जनानां मनोवृत्तिश्चेदृशकार्यानुकूलो नास्ति–यस्य देशस्य साहित्यकारा अत्यावश्यकव्यावहारिकपत्राणामप्युत्तरप्रदानमसाहित्यिकं कर्मावगत्य पत्रोत्तरमपि न प्रयच्छन्ति तत्र देशे क्रमबद्धप्रश्नावल्या व्यवस्थितोत्तरप्रदानस्य प्रश्न एव नोत्तिष्ठते (संभावनाऽपि नास्ति) वस्तुतो लिखितमौखिकोभयविधप्रश्नोत्तराणां कृते यस्यैकस्य विलक्षणविशेषप्रकारकस्य प्रशिक्षणस्यापेक्षाऽस्ति, तदधुनाऽपि सर्वत्र सुलभं नास्ति तथापि अहं मन्ये–साहित्यिकानुसंधानेऽपि तथाकथितयोरुभयोर्विध्योः सुसंगतः सार्थकश्चोपयोगो भवितुं शक्नोति भवितव्यं च तथाविधोपयोगेनेति।

सामग्र्याः परीक्षणं प्रमाणीकरणञ्च

संकलनादनन्तरं प्राप्तायाः सामग्र्याः प्रामाणिकतानिर्णयविधिरावश्यको भवति। सामग्रीपरीक्षणस्य सामान्यतस्त्रयो मुख्या विधयो भवन्ति–ऐतिहासिकः साहित्यिकः, वैज्ञानिकश्च।

येषां प्रामाण्यं प्रामाणिकत्वं वा इतिहाससिद्धं मान्यं चास्ति, तादृशानां ग्रन्थानां तथ्यानामभिलेखानामाधारेण विवेच्य सामग्र्याः शुद्धाशुद्धत्वनिर्णय ऐतिहासिकपद्धत्यन्तर्गततया विधीयते।

संस्कृतवाङ्मयेऽनेकेऽमूदृशाः शिलालेखादय उपलब्धाः सन्ति, यत्र तेषां रचनाकालस्य स्पष्टतयोल्लेखः कृतोऽस्ति। ततोऽन्ये राजतरङ्गिणीसदृश–ग्रन्था अपि तत्र विद्यन्ते येषां प्रामाणिकता विषये कोऽपि सन्देहोऽपि

नास्ति। एवमेवानेकेषां कवीनां लेखकानां जितकालानामजरामराणां कृतीनां च समयस्य निर्णयोऽपि प्रसिद्धानां विदुषामनुसन्धानात् साधारात्सम्पन्न एव। इमाः सर्वाः सामग्र्यः विभिन्नानां लेखकानां कृतीनां वा कालनिर्णये सहायिका भवन्ति। उदाहरणाय दृश्यताम्—अग्निपुराणस्य काव्यशास्त्रीय-प्रकरणविषये परम्परावादिनां विदुषामिदं मतमासीत्—इदं व्यासेन विरचितमिति। अतएव केषुचिदितिहासपुस्तकेषु भरतस्य नाट्यशास्त्रादपि प्राक् तदुल्लिखितं विलोक्यते। परन्त्वाधुनिका विद्वांसः पाठालोचनमुखेन तस्य रचना ख्रिष्टीय-नवम्यां शताब्द्यामभूदिति निरचैषुः। तत्र प्रस्तुतानि विविधानि काव्याङ्गविवेचनानि भामहदण्डिकृतविवेचनैः स्पष्टं प्रभावितानि सन्ति, इतश्चास्य प्रभावो भोजरचितग्रन्थेष्वपि सर्वथा स्पष्टः। अतोऽस्य रचना भामहदण्डिभ्यां परवर्तिनी भोजाच्च पूर्ववर्तिनीति स्वीकार एव सुसंगतः। कविलेखकादेरा-विर्भावकालनिर्णयविधावपीयमेवैतिहासिकी पद्धतिः प्रायराश्रीयते उपयुज्यते च। प्रस्तुतप्रसंगे आनन्दवर्धनस्योदाहरणं द्रष्टव्यमस्ति। तस्य विषये राजतरङ्गिण्यां निम्नोक्तः श्लोकः प्रदत्तः प्राप्यते—

मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः।
प्रथा रत्नाकरश्चासन् साम्राज्येऽवन्तिवर्मणः।।

अवन्तिवर्मा वर्मा वा काश्मीरस्य महाराज आसीत् तद्राज्यकालः ख्रिष्टीयं ८५५ तमं वर्ष यावदासीत्। अन्यैरपि सूत्रैरस्य निर्णयस्य सारल्येनैव पुष्टिः संजायते-तथाहि-एकत आनन्दवर्धनेनोद्भटस्य मतमुद्धृतम्, अन्यतश्च राजशेखरेणानन्दवर्धनस्योद्धरणं प्रदत्तम्। एतेन सिद्धम्-एष उद्भटस्य समयात् अर्थात् ईश्वीयाद् ८०० तमाद् वर्षात् पश्चाद् राजशेखरस्य च समयाद् ईश्वरीय ९०० तमाद् वर्षात् प्राग् बभूवेति। अतएवानन्दवर्धनस्य समयः ख्रिष्टीयनवम-शताब्द्या मध्यभागे, अर्थात् ८५० तम ख्रिष्टीयाब्दकल्पः मन्यते।

साहित्यिकपद्धतिः—

साहित्यिकपद्धतिद्वारेण कस्यापि कवेर्लेखकस्य वा कथ्यं कथनशैली-वैशिष्ट्यं चाधारीकृत्य तत्सम्बद्धाया विवादास्पदायाः सामग्र्याः परीक्षणं

क्रियते। प्रत्येककवेः स्वकीयमनोवृतिविशेषी रचनाशैलीवैलक्षण्यं च भवतः, ये किल तत्सामग्र्याः प्रामाणिकतानिर्णयविधौ सहायके सम्पद्येते। उदाहरणाय दृश्यताम्–कालिदासस्य स्वकीयाः साहित्यिकमनोवृत्तिविशेषः जीवनादर्शः काव्यादर्शः रचनाशैली शिल्पविशेषश्च वर्तन्ते ये तदीयप्रामाणिकरचनापरिशीलनेन स्पष्टा भवन्ति। संस्कृतस्य मनीषिविद्वद्भिरेषामेव तत्त्वानामाधारेण विषये आवश्यको निर्णयो यथायथमकारि। महाभारतस्य पाठानुसन्धानस्य विराडनुष्ठानमप्यनेनैवाधारेण विधीयमानमस्ति।

वैज्ञानिकपद्धतिः

वैज्ञानिकपद्धत्या कागल (कागज) मश्यादे रासायनिकपरीक्षणेनेदं ज्ञातुं प्रयत्यते–कापि पाण्डुलिपिः कोऽपि हस्तलेखो वा कियत् पुरातनोऽस्तीति अनेकेषु प्राचीनहस्तलिखितग्रन्थेषु लेखनकालस्योल्लेखो न भवति, किञ्च, कदापि, कदापि निहितस्वार्थव्यक्तिभिः स्वपाण्डुलिपेः प्राचीनत्वसाधनायासत्यानां तिथीनामुल्लेखः क्रियते, एतादृशानां हस्तलेखादीनां कालनिर्णयसमस्यासमाधानाय कागल (कागज) मशीप्रभृतीनां रासायनिकपरीक्षणं पर्याप्तमुपयुज्यते।

त्यागो ग्रहणञ्च

प्रामाणिक्या अप्रामाणिक्याश्च निर्णये संजाते सति अप्रामाणिक्यास्त्यागस्तु स्वयमेव सम्पद्यते। किन्तु प्रामाणिकसामग्र्या विषयेऽपीदं निश्चेतुं भवति तस्य कियानंशोऽनुसंधेयविषयेण सह सम्बद्धोऽस्ति इति, यतोहि स एवानुसंधित्सोराधारसामग्री भवितुं शक्नोति। अतोऽप्रामाणिक्या सामग्र्या सह तस्या असंबद्धायाः प्रामाणिक्या अप्यंशतस्त्यागोऽत्यावश्यको भवति। एवञ्च त्यागग्रहणयोः प्रक्रियया अनुसंधाता स्वकीयाया आधारसामग्र्याः सीमां निर्धारयति। तच्चेदं निर्धारणमनुसंधानकार्यस्य प्रामाणिकतायै नितरामनिवार्यं भवति।

विश्लेषणसंश्लेषणयोः वर्गीकरणम्

इतोऽग्रे य उपक्रमो भवति–विश्लेषणसंश्लेषणद्वारेणोपरिप्रोक्तया अनुसन्धेयसामग्र्या वर्गीकरणम्, यदाधारीकृत्य विषयविभाजनं क्रियते–अर्थात्

अध्येयं विषयं विभिन्नेषु शीर्षकेषु विभक्तं विधायानुसंधानस्य रूपरेखा योजना वा निर्मीयते। इदं संयोजनस्य (प्लानिङ्गतिप्रसिद्धस्य) कार्यमस्ति, सामाजिक-विज्ञानेषु संयोजनस्य स्वयं-स्वस्मिन् महत्त्वपूर्णविषयोऽस्ति, यस्य च स्वकीयो विधिरस्ति, स्वीयं च शास्त्रमस्ति। सामग्र्या उचितसंयोजने एतेषां विधीनां नियमानां च पालनं नूनमेवोपयोगिभवितुं शक्नोति।

निष्कर्षनिर्णयौ

अनुसंधानकार्यस्यान्तिमं सोपानं भवति–निष्कर्षनिर्णयौ, तौ च सम्पूर्णानुसंधानप्रक्रियायाः फलयोगो भवतः। शोधस्य नवीनविधिविज्ञाने निष्कर्षादिप्राप्तये सांख्यिकीयविधिभ्योऽतिमहत्वं प्रदीयते। निष्कर्षप्रक्रियायां प्रायः विशेषेण सामान्यस्य सिद्धिः–विशेषतथ्यैः सामान्यनियमानां विधानं प्रधानमस्ति। अत्र च प्रायः माध्यस्य (अवसितस्थितेः औसतस्य) सामान्यदेश्चान्यादृशीनां च निस्सारणपद्धतीनां प्रत्यक्षरूपेण परोक्षरूपेण वा प्रयोगः क्रियते। निष्कर्षान् परिणामांश्चाधिकाधिकं प्रामाणिकान् कर्तुं सांख्यिकीयविधीनां प्रयोगः सर्वेष्वनुशासनेषु वर्धमानो दृश्यते तथा चानुसंधान-विशेषज्ञानां मतमद्येदं प्रायः सम्पन्नं यन्निष्कर्षान् व्यक्तितत्त्वनिर्मुक्तानव-स्थापयितुमेषामवलम्बनमनिवार्यम् इति। मनोविज्ञानक्षेत्रे मानवचेतनाया विभिन्नशक्तीनां गुणप्रमाणादेराकलनविधानायापि एषामुपयोगः प्रक्रान्तः। साहित्ये कलाकारस्य प्रतिभाया विभिन्नगुणानामकलनस्य तथा कस्या अपि कृते गुणात्मकप्रभावादेर्निर्धारणस्य प्रश्नोऽनेकप्रकारेणोपस्थितो भवति। तत्रानुसन्धातुस्स्वनिष्कर्षप्रस्तुतीकरणाय प्रायोऽनुमानस्य कल्पनायाश्चाश्रया-वलम्बनमावश्यकं भवति, तत्रापि नवीनशोधविज्ञाने दृढाङ्किकाश्रितायाः सांख्यिक्याः पद्धतेरवलम्बनमधिकं प्रामाणिकं मन्यते। उदाहरणाय गृह्यताम्–भवभूति–श्रीहर्षयोः कल्पनाशक्तेः सापेक्षिकं मूल्याङ्कनं कर्तव्यमस्ति चेत् सांख्यिकीशास्त्रस्य विशेषज्ञ एतन्न चिन्तयेद् यदनयोर्द्वयोः कव्ययोः काव्यग्रन्थेभ्यस्तस्याथवाऽन्यप्रमातुः कल्पना कियतांशेन कुत्रपर्यन्तञ्चोद्बुद्धा भवति, स तु कविद्वयस्य कल्पनाशक्तेर्मूतानां परिणामानां–यथा विम्बानामलंकारादीनां–गणनामेव मुख्यं प्रमाणं स्वीकरिष्यति। इदमुदाहरणं

वस्तुतो लघ्वस्ति। सांख्यिकीशास्त्रेऽत्यन्तसूक्ष्मविधयो विकसिता व्याख्याताश्च सञ्जाताः येषामवबोधोऽपि साहित्यविद्यार्थिनः कठिनः, उपयोगस्य तु का कथा, स तु सुतरां दूरस्थः।

एवं प्रकारेण पश्चिमे–यूरोपीयदेशेषु विशेषतोऽमेरिकायां, शोधविज्ञानं विविधानुशासनप्रामाणिकपद्धतीनामुपयोगं विदधदेकस्मिन् स्वतन्त्रविज्ञानरूपे विकसितं भवद्दृश्यते, तत्र च प्रतिवर्षमीदृशा ग्रन्थाः प्रकाश्यन्ते, यत्रानुसंधानस्याङ्गप्रत्यङ्गयोः सविस्तारं सूक्ष्मातिसूक्ष्मं व्यवस्थितञ्च विवेचनं तिष्ठति।

साहित्यस्य शोधार्थिनां कृते प्रोक्तस्य शोधविज्ञानस्य तस्य च क्रियाविधेः सम्यग्ज्ञानावाप्तिः लाभप्रदाऽस्तीत्यत्र न कश्चन सन्देहः, किन्तु तस्य प्रयोगे विवेकपूर्णविधानमपेक्ष्यते। पाश्चात्येषु देशेषु विशेषतस्तेषु देशेषु येऽपारभौतिकसाधनान्विताः सन्ति तेषु एतादृशानां साधनानामुपयोगलोभवृत्तिरित्थं प्रवर्धमाना दृश्यते, येन गम्भीरचिन्तनस्य कृतेऽवसानाशङ्का प्रादुरभूत्। प्रत्येकस्मिन् क्षेत्रेऽनुसन्धानस्य विधिविधानं यान्त्रिकमिव जायमानं दृश्यते तया च प्रतिभाति यथा सर्वप्रकारके ज्ञानविज्ञाने मानवीयचेतनायाः क्रिया न भूत्वा केवलं भौतिकक्रियाणां संघातमात्रे स्तः।

अतएव साहित्यानुसंधातृभिः सावधानैः सतर्कैश्च भूत्वाऽस्मिंश्चक्रव्यूहे प्रवेष्टव्यम् कतिपये सिद्धाः मन्त्राश्च सर्वदा निरन्तरं ध्यातव्याः। ते मन्त्राश्च संक्षेपेणैवं सन्ति–

साहित्यं मानवचेतनायाः परिष्कृतानुभूतेर्वागस्ति। तस्य सम्बन्धो भूम्या सह सहजः सम्बन्धोऽस्त्यवश्यं, परन्तु तत् भूम्या लिप्तमभूत्वा निरन्तरं तदुपर्युत्थानाय व्यग्रमवतिष्ठते। अतो यान्त्रिकविधिभिस्तस्योचितं विवेचनं मूल्याङ्कनं च कर्तुं न शक्यते। अन्यादृशानामनुसंधानानां प्रवृतिर्यत्र बहिर्मुखाऽस्ति, तत्र मानवीयानां विद्यानां विशेषेण दर्शनसाहित्ययोश्च प्रवृत्तिर्मूलतोऽन्तर्मुखा भवति। अतस्तेषां साधनान्युपकरणानि च साहित्यदर्शनादिविषयकानुसन्धाने यथावत् प्रयोक्तुं न शक्यन्ते।

साहित्ये चात्मतत्त्वं प्रधानमस्ति। अतः साहित्याध्ययने आत्मतत्त्वस्य बहिष्कारं विधायैकान्ततो वस्तुपरकाध्ययनस्य संभावना नास्ति। इत्थं कृतमध्ययनं वस्तुनोज्झित्य (संस्पृश्यं) जडीभूतं भविष्यति, यतो हि साहित्यं तत्त्वतो वस्तुनास्ति, अनुभूतिरस्ति।

साहित्यस्य बाह्यपक्षाः–काव्यबन्धः, काव्यरूढयः भाषाशैल्यौ लयविधानमित्यादयोऽप्यतिमहत्त्वपूर्णा भवन्ति, इत्यत्र सन्देहो नास्ति, अपरतश्च तस्य सामाजिक–पक्षोऽपि नाल्पीयसीं महत्तां दधाति। परन्तु सर्वस्यास्य मूलप्रेरणा भवति सौन्दर्यभावना, या हि मानवमनसोऽत्यन्ततरलाऽतिसूक्ष्मा च वृत्तिरस्ति। अतएव काव्यस्य बाह्योपकरणानां सामाजिकतत्त्वानां च स्वयं स्वेषु स्वतन्त्रमूल्यं नास्ति अतएव आधुनिकशोधविज्ञानविधिमुखेन तेषां यान्त्रिकमध्ययनं सीमैकपर्यन्तमेव योगदानं कर्तुं शक्नोति। स्वकीयमूलप्रेरणातो विच्छिन्नं भूत्वा यत्रैवंप्रकारकमध्ययनं स्वतन्त्रायते, तस्य तत्रोद्देश्यमेव विनश्यति। तच्च साधकं न भूत्वा बाधकमेव भवति। आवश्यकता एतस्यावबोधस्यास्ति यत् साध्यसाधनयोरात्मशरीरयोश्च भेदं यथावज्ज्ञात्वा साधनस्योपयोगः साध्यस्य सम्पूर्त्यै शरीरस्य चोपयोग आत्मनश्चेतनाया–वा संवर्धनाय विधीयेत। जीवने भौतिकशरीरसाधनाया नितरां महत्त्वमस्ति, नाद्यतनात् कालात् किन्त्वारम्भादेव 'शरीरमाद्यं खलु धर्मसाधनम्' इति सिद्धान्तो मान्योऽस्ति–तथा चात एव भौतिकजीवनस्य सर्वे उपायाः–तन्निमित्ताय जायमाना नव नवा आविष्कारा नूनमेव काम्याः सन्ति। परन्तु शरीरसाधना जीवनस्य लक्ष्यं नास्ति; एवञ्चैतया दृष्ट्या तस्य स्वतन्त्रं महत्त्वमपि नास्ति। शरीरस्य संवर्धनमत एवावश्यकं वर्तते यत् तस्य माध्यमेन चेतनायाः संवर्धनं भवति। स्वतन्त्ररूपेण शरीरसाधना तु पशूनां धर्मः। साहित्यिकानुसंधानक्षेत्रे नवीनानां विधीनामुपयोगोऽनयैव दृष्ट्या करणीयः।

पाश्चात्येषु देशेषु इदानीमुद्योगविज्ञानस्य विकासः विस्तारश्च भवन्तौ दृश्येते, तथा च तस्य यन्त्रदृष्टेराक्रमणं साहित्यदर्शनादावपि प्रक्रान्तम्, यस्य च परिणाम एषु क्षेत्रेषूत्पन्नगतिरोधेस्तराणामधःपाते च स्पष्टरूपेण संलक्ष्यते। अतः स्वचिन्तनस्य परम्परास्ताभिर्मर्यादिताः स्वावश्यकताश्च ध्यायं ध्यायं

यथावद्‌वयमुपयोगिनामनुकूलानाञ्च विधीनां तथोपकरणानां ग्रहणं कुर्याम यैश्च पाश्चात्यविद्याः स्वयमेवापकर्षमवाप्तास्तेषामन्धानुकरणं न कुर्याम इत्येव ज्यायसीबुद्धिराश्रयणीया।

साहित्यस्य स्वकीयं स्वारूप्यमस्ति—यद्यपि तत्र वैज्ञानिकं तत्त्वमपि विद्यमानं भवति दार्शनिकञ्च, तथापि तन्न विज्ञानमस्ति न वा दर्शनम्—उद्योग-विज्ञानात् तस्य प्रक्रियोद्देश्यं च नितरां भिन्ने स्तः। अतः साहित्यस्याध्ययनाय मुख्यरूपेण साहित्यिकविधीनामवलम्बनमेव श्रेयस्करमस्ति। अन्येऽपि विधाय उपयोगिनो भवितुं सेद्धुं वा शक्नुवन्ति किन्तु तेषामुपयोगेन साहित्यस्योद्देश्यानां क्रियाविधेश्च सन्दर्भे एव भवितव्यम्।

उपनिषद् द्वयोर्मित्रपक्षिणो रूपकमुखेन ब्रह्मजीवयोर्भेदस्य रम्यं व्याख्यानमस्ति। अनयोरन्यतरः पक्षी एवमस्ति यः सर्वथा तटस्थो निर्विकारश्चास्ति, तद्भिन्नश्च फलं स्वाद्वत्ति। मम तु प्रतिभाति—वर्तमानयुगे वृक्षे एकः पक्षी तृतीयस्ताभ्यां भिन्नोऽपि आगत्योपविष्टोऽस्ति यः फलानां स्वादे रुचिं न गृह्णाति किन्तु तेषां गणनायां सज्जीकरणसंवरणक्रियायां च संलग्नस्तिष्ठति। अत्र प्रथमः पक्षी दर्शनस्य शुद्धविज्ञानस्य वा प्रतीकोऽस्ति, यो हि निर्विकाररूपेण स्थितो जगत् पश्यति, तृतीयः पक्षी उद्योगविज्ञानस्य प्रतीकोऽस्ति यो हि जीवनं रमणीयं संवरणीयं च विधातुमुपक्रममाणोऽस्ति। तथा द्वितीयः पक्षी साहित्यस्य प्रतीकोऽस्ति, यो जीवनरसमाददानः व्यवहरति। अस्माभिरयमेव द्वितीयप्रकारतया निर्दिष्टः पक्षी पोषणीयो येन स निरन्तरं जीवनरसं गृह्णन्नवतिष्ठेत।

विषयनिर्वाचनम्

डॉ॰ भगीरथमिश्रः

अनुसंधानकार्यस्य सर्वप्रथमः पदक्रमो भवति विषयनिर्वाचनम्। इदं प्रथमं करणीयं त्वस्त्येव, जटिलं तथा कठिनमप्यस्ति। प्रायोऽत्रैतादृशी स्थितिरुद्भवति यादृशी किल कस्यापि यात्रिणो निर्दिष्टस्थानज्ञानं विना प्रारब्धचलनस्य, यो हि चानन्तरं दिग्भ्रान्तोभूत्वा किञ्चन दूरं गत्वाऽनुभवेत् यत् स पूर्वस्य स्थाने पश्चिमं प्रति प्रस्थितोऽस्ति। इत्थं समयश्रमयोरुभयोरपव्ययो भवति। वस्तुतोऽनुसन्धातुर्विद्यार्थिनो मानसे स्वयमेव स्पष्टतोऽस्पष्टतो वा विषयस्य स्वरूपं वर्तमानं भवति। यथाकथंचित्तयाऽपि अनुसंधित्सोरिदम-पेक्षितं त्वस्त्येव। अस्य का प्रक्रियेत्यस्माभिरत्राग्रे विचारयिष्यते।

इदानीमनुसन्धानक्षेत्रे विषयनिर्वाचनाय काः काः प्रणाल्यो व्यवह्रियन्त इत्यस्य सर्वप्रथमं स्पष्टीकरणमत्र वयमावश्यकं मन्यामहे। तत्र च का प्रणाली केन रूपेणोपादेया अथवा तस्याः किमपि तारतम्यमप्यस्ति? साम्प्रतं वयं विषय-निर्वाचनसम्बद्धास्तिस्रः प्रणालीरुपक्रममाणा आश्रयामः। तत्र प्रथमा योजनाबद्धा प्रणाली वर्तते, येयं कस्यापि विभागस्य कस्याश्चित् संस्थाया एकया नियतयाऽनुसंधानयोजनया सम्बद्धा भवति। तत्कृते कयाऽपि योजनया सम्बद्धानां विषयाणामेका सूची निर्मीयते, तेषु च विषयेषु शोधचिकीर्षुभिश्छात्रैरनुसंधानकार्याणि कार्यन्ते। अथ चेत्थ योजनासम्बद्धा नियताः निष्कर्षाः परिणामाश्च प्रस्तूयन्ते। द्वितीया, स्वच्छन्दा वैयक्तिकी प्रणाली विद्यते, या ह्यनुसंधित्सुव्यक्त्या सम्बद्धा भवति। अत्र विद्यार्थी स्वकीयया रुच्या क्षमतायाश्चानुसारेण कांश्चिद् विषयान् संचित्यानयति निर्देशकश्च तेष्वन्यतमं यञ्चोपयुक्तमवगच्छति तदर्थं निश्चित्य तस्मै ददाति। एतन्निर्णयकाले निर्देशकोध्यायति-यदि अनुसंधित्सुना प्रस्तावितेषु

विषयेषु कोऽपि विषयोऽतितरां विततोऽतिसंक्षिप्तो वास्ति तर्हि स यथायथं संशोध्य तमनुरूपं कुर्यात् तस्य च स्तरमनुरूपतां नयेदिति। बहुधा तस्य प्रस्तावितेषु विषयेष्वन्यतमोप्युपयुक्तो न प्रतिभाति तदा निर्देशकस्तादृशमेव कमपि विषयं निर्माय प्रयच्छति। स एव च विषयस्तत्कृते तेन निश्चीयते। तृतीया प्रणाली सा भवति; यत्र सामान्यतो विषयाणामेकां सूची प्रतिवर्ष निर्मीयते ततश्च कोऽप्येको विषयोऽनुसंधित्सोरभिरुच्यनुकूलमवचीयतेऽथवा निर्मीयते। इयं प्रणाल्येव प्रायेणाधिकप्रचलिताऽस्ति; परन्तु योजना-बद्धाऽनुसंधानप्रणाल्येवाधिकोपयुक्ता श्रेष्ठा चास्ति। तेषु कतिपयतत्त्वानां स्पष्टं वैशिष्ट्यं विद्यमानं भवति। प्रथमन्तु तत्र यो निकर्षो भवति स सामाजिकोपयोगाय संपद्यते। द्वितीयन्तावत् तत्रानुसंधानं व्यवस्थितरीत्या भवति। तृतीयं खलु, तस्य परिणामेष्वहितावचितानामुपयोगिनामंशानां प्रकाशनं विधातुं शक्यते, येनान्याः संस्था अपि लाभान्वितास्तदवसरप्राप्ताश्च भवितुं शक्नुयुः। चतुर्थं तावत्, एवंकृते सति अन्यासु संस्थासु भविष्यतां कार्याणां पुनरुक्तिसंभावनापि विनश्यति। अन्यच्च, सर्वत्रैवंविधयैव योजनाबद्धप्रणाल्या कार्यमुपक्रमेत चेत् कार्यमिदमन्योन्यपूरकमपि प्रभवेत् तथाचेत्थं साहित्येतिहासदर्शन-शास्त्रविज्ञानादिषु सर्वेषु क्षेत्रेषु एका निश्चिता नियमिता च प्रगतिर्दृष्टिगोचरीकर्तुं शक्यते। ईदृशैरनुसंधानकार्यैराष्ट्रियज्ञानस्य व्यवस्थितो विशिष्टो विलक्षणः सर्वाङ्गीणश्च विकासो भवितुं शक्नोति। परन्त्विदमवश्यमवधेयम् यदत्र योजनायां विषयवितरणकार्यं विचार्यावगत्य च कर्तव्यमस्तीति। अस्मिन् कार्ये वैयक्तिकरुचिक्षमतयोः पूर्णतयाऽवधानमावश्यकं दातव्यं चास्ति यस्य च सम्बन्धः प्रणाल्या द्वितीयया चास्ति। इत्थंभूता सम्पृक्तप्रणाली विशेषत उपयोगिनी भवति। एतादृशकार्यसम्पादनायैकस्याः केन्द्रीयायाः समितेरावश्यकताऽस्ति या योग्यतां क्षमतां रुचिं सामग्रीसौलभ्यादिकं चोत्प्रेक्ष्यानुसंधानयोजनानां वितरणकार्यं स्वहस्तगतं कुर्यात्। तथाचानुसंधान-परिणामान् परस्परसम्बद्धान् व्यवस्थितांश्च कृत्वा यथावसरं तेषां प्रकाशनमपि कर्तुमुपक्रमेत।

विषयनिर्वाचनप्रसङ्गे कस्मैचिदनुसंधित्सवे विषयप्रदानात् पूर्वं येषु तत्त्वेष्वस्माकमवधानध्यानन्यासमावश्यकं भवति विषयस्योपयुक्तता,

रुचिमनोवृत्तिकार्यसम्पादनाभिव्यक्ती, अध्ययनस्य पृष्ठभूमिक्षमते, सामग्री–सौलभ्यम् योग्यनिर्देशन–सौगम्यं विषयस्य उपयोगितामहत्वे च। अग्रे वयं उपर्युक्ततत्त्वेष्वेकैकस्मिन् विचारं कुर्मः।

१. विषयस्योपयुक्तता–अस्य शीर्षकस्यान्तर्गततया वयं विषयनिर्वाचनेन सम्बद्धं प्रथमं, प्राथमिकं महत्त्वञ्च वर्णयामः। विषयनिर्वाचनस्य प्रसङ्गे अनुसन्धातुरुपयुक्ततातिरिक्तविषयोऽपि उपयुक्तो भवेत् अयमर्थोऽस्माभिर्विविधदृष्ट्या द्रष्टव्यो भवति। अनुसन्धातुरभिरुचेरध्ययनक्षमतायाश्चानुरूपोऽपि स अस्मिन् तत्त्वे विचारविधानेन सह, स यस्योपाधेः कृते विषयो निर्धारितः तस्याप्युपयुक्तोऽस्ति न वा, इदमपि विचारणीयं भवतिः। प्रायः उपाधिद्वयम् अनुसन्धानकार्येण सम्बद्धमस्ति यच्चोपाधिद्वयं साहित्यक्षेत्रेऽनुसन्धातुरुद्दिष्टं भवति–तदस्ति पी–एच०डी०, डी० लिट्. च (वयं प्रयतिस्यामहे यत् अनयोरुपाध्योः समकक्षे नामनी यथा विद्यावाचस्पतिर्विद्यावारिधिरिति सदृशे प्रचलिते भवेताम् तौ च स्तरद्वयं निर्वहतः) प्रथमः स्तरः योऽद्यत्वे पी०–एच्० डी० विद्यार्थिनां कृते वरणीयोऽस्ति, स तथ्यानुसन्धानस्य वर्तते यस्य कृते आंग्लभाषायां Discovery of facts इति उच्यते। अत्र बौद्धिकप्रौढताया वैचारिकमौलिकतायाश्च तावत्यपेक्षा नास्ति, यावती सामग्रीसंकलनस्य तथ्यानुशीलनस्य अध्यवसायस्य च। अतः एतस्मै उपाधये निर्वाचिता विषयाः तादृशा भवेयुः ये तथ्यानुसन्धानेनाधिकसम्बद्धा भवेयुः। द्वितीयः स्तरः, डी० लिट्. सदृशोपाधीनां कृतेऽस्ति, येभ्योऽधिकोच्चस्तराः अधिकव्यापकाश्च विषया भवितुं शक्नुवन्ति, एतस्य कृते बौद्धिकप्रौढता, सूक्ष्मविवेचनशक्ति–वैंचारिकमौलिकताश्चापेक्षिता भवन्ति। अस्मिंश्च तत्त्वस्य सिद्धान्तानां चान्वेषणस्य महत्त्वं प्रदीयते। अतएव एतत्कृते निर्वाचितेषु विषयेषु विचारविवेचनस्य प्राधान्यमवश्यं भवेत्।

किञ्च विषयनिर्वाचनविधानसमये अस्माभिरिदमपि द्रष्टव्यं यत् तस्य स्वरूपं क्षेत्रञ्च स्पष्टमस्ति, तत्र किञ्चित्प्रकारकस्य भ्रमस्य संदेहस्य च सम्भावना तु नास्तीति। क्षेत्रं यथावश्यकं ततो नितरां सङ्कुचितमथ च विस्तृतं तु नास्तीति। इदं कथनं विषयस्य शब्दावलीनिर्णयविधानसमये ध्यातव्यमस्ति।

शब्दावलीद्वारा सूचितो विषयोऽव्याप्तव्याप्तिदोषाभ्यामुभाभ्यां तु निर्मुक्तो भवेदेव। तेन च सहानुसन्धानदृष्टिरपि अभिव्यक्ता भवति न वेत्यपि वीक्षणमावश्यकमस्ति। विषयस्य शब्दावल्यां सा दृष्टिः स्पष्टतयाऽभिव्यञ्जिता भवेत् यामाश्रित्य अनुसन्धाता सामग्रीणां निरीक्षणपरीक्षणे कर्तुमिच्छति, अथवा तत्र शब्दावल्यां तस्य मूलसूत्रस्य संकेतेन भवितव्यं, यस्याधारेण अनुसन्धाता सामग्र्या मौलिकं नवीनं वा व्याख्यानं कर्तुमुपक्रममाणोऽस्ति। अद्यत्वे प्रायः ईदृशा विषया अस्माकं समक्षीभवन्ति, येषु एतादृशस्य दृष्टकोणस्याभावस्तिष्ठति, अतएव विषयस्य शब्दावली अस्मिन् पक्षे पूर्णतयोपयुक्तोऽस्ति, इदं प्रथमं विचारणीयं तत्त्वमस्ति।

२. अभिरुचि मनोवृती (Aptitude and Inclination)—

द्वितीयं विचारणीयं तत्त्वम् अभिरुचिमनोवृत्ती इति वर्तते। अनुसन्धानकार्ये प्रत्येकव्यक्तेरभिरुचि र्न भवति। यस्मै कार्यमिदं नाभिरोचते तस्योपरि अस्य कार्यस्य आरोपः, व्यक्तेर्विषयस्य चोभयोरेवाहितमापादयति। एवमेव विषयनिर्वाचनेऽपि अभिरुचेर्महत्त्वपूर्णं स्थानमस्ति। कलाया विश्लेषणे यस्याभिरुचिरस्ति, तस्मै दार्शनिकविवेचनसम्बद्धविषयप्रदानमनुचितमस्ति। एवमेव भावसौन्दर्यवीक्षणसमर्थकाय व्याकरणविषयाध्ययनसम्पादनम् अनुपयुक्तं भवेत्। न केवलमभिरुचिरपेक्ष्यते किन्तु आन्तरिकमनोवृत्तिरपि तद्विषयं प्रति जागरूकी भवेत्। अभिरुचेर्यथाकथञ्चिद् विकासः संगत्यापि जायते, येन प्रायः वास्तविकमनोवृत्तेरनुमानं विधातुं न शक्यते, अतो रुच्या सह तस्य मनोवृत्तिरपि तद् विषये रमते, अयमवबोधो नितरामावश्यकः। मम विचारोऽस्ति यत् एतत्कृतेऽनुसन्धित्सवे मौखिकपरीक्षा–लिखितपरीक्षासदृशेन केनचित्कार्यक्रमेण भवितव्यम्, येन निर्देशकः सम्यग् ज्ञातुं शक्नुयात् यत् कस्मिन् विषये शोधेच्छुकस्य मनोवृत्ती रमत इति। वैज्ञानिकविषयकानुसन्धानेऽपि मनोवृत्तिर्विशेषतो ध्याने स्थाप्यते, साहित्यविषयकानुसन्धाने तु तद् ध्यानं निरन्तरं करणीयमेवं भवति।

मनोवृत्तिरेकप्रकारकविषयम्प्रत्येव नहि, किन्त्वनेकप्रकारकविषयान् प्रति भवितुं शक्नोति। अतः विद्यार्थिने तेष्वन्यतम एव कोऽपि विषयो

दातुमुचितः। एतादृशमनोवृत्तिसम्बन्धिपरीक्षणं पुस्तकालयेऽपि कर्तुं शक्यते। यत्र हि विद्यार्थी बाहुल्येन कीदृशस्य पुस्तकस्याध्ययनं करोति, एतत् दृष्ट्वा अनुमातुं शक्यते यत् तस्य मनोवृत्तिः कीदृशी वर्तते। अयं च, तेन प्राक् यत्साहित्यमधीतं तदाधारेणापि तस्य मनोवृत्ति र्ज्ञातुं निश्चेतुं वा शक्यते। एवञ्च रुचेर्मनोवृतेश्च परीक्षणं विधायैव निर्देशकेन कोऽपि विषयोऽनुसन्धित्सवे स्वीकरणीयः। अत्र हि निर्देशकाय विद्यार्थिने चोभाभ्यामपि महती सत्यताऽऽवश्यकी भवति।

३. अभिनिवेशः (Devotedness)—

विषयं प्रति अभिरुचिमनोवृत्तिसत्तायाम् अनुसन्धानकार्याय सर्वस्मादावश्यकस्त्वभिनिवेशः (Devotedness) जागर्ति। अभिनिवेशं विनानुसन्धानकार्यमसम्भवमेव भवति। प्रायेणैवं दृश्यते यदुत्तमोत्तमा अपि विद्यार्थिनो मनोवृत्तिप्रतिकूलं विषयं गृह्णन्ति। तेषु कतिपय एव ईदृशाः भवन्ति, ये स्वकीयसंयमाध्यवसायात्मवशातगुणैः तस्य विषयस्य निर्वाहं कर्तुं प्रभवन्ति, अधिकांशास्तु तं विहाय ततो विरता एव जायन्ते। मनोरुचिप्रतिकूलविषये साभिनिवेशता जागरितुं न शक्नोति, तेन, विना चानुसन्धानकार्यं कथं भवेत्? तेभ्यस्तु तत्कार्यं पर्वतभङ्गवत् कठिनं जायते; किन्तु तदेव कार्यं तद्विषये प्राप्तसहजरुचये मनोरमं भवति। अतोऽभिनिवेशः यं विषयं प्रति जागरूको भवेत् वर्तेत वा, स एव अनुसन्धित्सुना ग्रहीतव्य, निर्देशकेनापि चात्रावधानमवश्यं देयम्।*

*. In selection of a topic for research, the social scientist must rely upon his own inclinations. The best and most independent minds rebel against puruing work which does not satisfy their curiosity Furthermore, where research topics are prescribed rather than elected, the pushing forward of the frontiers of knowledge, is handicapped by and limited to the degree of knowledge, the values and the imagination of those who have the power to prescribe. No one could have directed Eintein or Freud into inquiries they undertook. Even for scientists of more ordinary calibre, the prescription of subject matter eliminates an essential motive for the pursuit of science.

Research Methods in Social Relations, Part I
By—Jahoda and others P. 15

४. अध्ययनस्य पृष्ठभूमिक्षमते –

विषयनिर्वाचनविधानकाले द्वितीया महत्त्वपूर्णपरीक्षा अनुसन्धित्सोरध्ययनस्य वर्तते। अभिरुचौ सत्यामपि, यदि तस्य विषयस्याध्ययनपृष्ठभूमिरनुधित्सोर्नास्ति, तर्हि स गाम्भीर्येण विषयस्य विवेचनं तत्त्वान्वेषणञ्च नैव कर्तुं शक्नुयात्। अस्माकं समक्षं प्राय ईदृशाः प्रकाशिता अथवा अप्रकाशिताः शोधप्रबन्धा आयान्ति, ये विदुषां मतेन नितरां लघिष्ठाः प्रतीयन्ते। अस्य कारणमेतदेवास्ति यत् तेषामनुसन्धातृषु तत्तद्विषयकाध्ययनपृष्ठभूमिः प्रथमतो विद्यमाना नासीत्। एतत्तु सामान्यविषयेषु कृतानामनुसन्धानकार्याणां स्तरस्य विषये कथनीयं कथितम्। कतिपये विषयास्तु ईदृशाः सन्ति, ये एतां पृष्ठभूमिं विना चलितुमेव न शक्नुवन्ति। ईदृशेषु विषयेषु यथा कथञ्चिदपि यदि पृष्ठभूमिरल्पा बहुला वा विद्यमानास्ति तर्हि कार्यं सुगमं भवति परिणामश्च रम्यो जायते। संस्कृतभाषायाः साहित्यस्य अथवा व्याकरणस्याध्ययनं विना कस्यापि एतादृशस्य विषयस्य ग्रहणं, यत्र संस्कृतज्ञानमपेक्ष्यते स्वकीये शिरसि आपत्तेराह्वानमेवास्ति। एवमेव आंग्ल–बङ्ग–तमिलाद्यन्य–भाषाणां साहित्यानामथवा विशिष्ट–प्रवृत्तीनां तुलनात्मकविषयाणां ग्रहणं एतासां भाषाणां ज्ञानं सर्वप्रथममपेक्ष्यते।

अध्ययनस्य पृष्ठभूम्या सह विषयस्य गम्भीराध्ययनविधानक्षमताऽपि आवश्यकीवर्तते अस्य सम्बन्धोऽध्ययनमात्मसात्कृत्वा विषये प्रवीणताप्राप्त्या तत्र च नवीनतत्त्वानां शोधस्य योग्यताऽस्ति। इत्थं भूतायां स्थितौ, विषये इयती योग्यता भवेत् यया विषयेण सम्बद्धः समस्याः प्रशंसाँश्चावगत्य तेषां प्रौढं प्रामाणिकञ्च विवेचनं कर्तुं शक्यं भवेत्। अध्यबनस्य पृष्ठभूमिसहितं यद्येवं प्रकारकं प्रौढं ज्ञानम् इत्यंभूता योग्यता च शोधार्थिनः स्तस्तर्हि वस्तुतः ईदृशानां कार्याणां परिणामः श्लाघनीयः भवेदेव अनुसन्धातुः ईदृशी क्षमता भवेत् यया सः सामग्र्याः समुचितोपयोगं कर्तुं शक्नुयात्। इयं यदि तत्र नास्ति तर्हि सः सामग्र्याश्चाकचिक्ये दिग्भ्रान्तो भवितुमर्हति। अतः तस्मिन् अध्ययनक्षमतयोरुभयोरेव सत्ताऽऽवश्यकीभवति। अनयोरुभयोरभावेऽनुसन्धानकार्यमतिसामान्यं प्राय उपहसनीयञ्च सञ्जायते।

५. सामग्रीसौलभ्यम्–

कस्मिन्नपि विषये क्रियमाणमनुसन्धानं तत्त्वद्वयं निबिभर्ति, एकं तु बौद्धिकी प्रौढिः वैचारिकी क्षमता च; द्वितीयं सामग्रीसौलभ्यम्। विषयस्य निर्वाचन–विधानसमये अस्माभिरनयोरुभयोस्तत्त्वयोरवधानमवश्यं दातव्यम्। बौद्धिक–प्रौढौ वैचारिकक्षमतायाञ्च सत्यामपि अनुसधित्सुः यदि विषयेण सम्बद्धान् समस्तान् उपयोगिनः सामग्रीविशेषान् प्राप्तुं नाशकत् तर्हि निष्कर्षेषु भ्रमो भवितुं शक्नोति, ते चासङ्गता भवितुं शक्नुवन्ति। उदाहरणाय दृश्यताम्– अपभ्रंश–साहित्ये लिखितप्रेमाख्यानकाव्यसामग्रीणामसौलभ्ये वयं सूफीप्रेमाख्यानकाव्य–परम्परां फारसीसाहित्ये विदेशसाहित्ये वा द्रष्टुं संलग्ना भवामः। एवमेव रसिकसम्प्रदायद्वारा विरचितरामकाव्यगतशृङ्गाररसीयपरम्पराया अनुमानं केवलं रामचरितमानसं रामचन्द्रिकां वा पठित्वा न विधातुं शक्यते, ये किल सामाजिकमर्यादामतितरां ध्यायं–ध्यायं लिखिते स्तः, साधनाया रसिकतां न। एवमेवान्यत्रापि। इत्थं विषयनिर्वाचने तत्संबद्धा सामग्री कियत्या मात्रया सुलभाऽस्ति अस्य दर्शनस्य प्रथमावश्यकता वर्तते।

बाहुल्येन एतादृशा अपि विषया भवन्ति येषां साफल्यं बहुधा बहुतिथांशे सामग्र्यामेव निर्भरीभवति। एतादृशानां विषयाणां निर्वाचनं तु सामग्रीदर्शनं विना कर्तुमेव न शक्यते; नैतदेव, विषयस्य क्षेत्रं नामकरणं च सामग्रीसकृन्निरीक्ष्यैव कर्तव्ये स्तः। अस्य कारणमपि स्पष्टतः कथनमत्र वयमावश्यकमवगच्छामः। अस्माकं ज्ञानमधिकांशतया प्रकाशितपुस्तका–नामितिहासग्रन्थानां चाधारेण निर्मितं भवति। साहित्यस्य प्रसङ्गेऽन्वेषकैः प्राचीनेषु पुस्तकालयेषु सङ्ग्रहालयेषु च नवनवाः, किन्तु इदानीं पर्यन्तमज्ञाताः मुद्रिताः हस्तलिखिता वा ग्रन्था उपलभ्यन्ते, अतः तेषां परीक्षणं विधायैव तैः सम्बद्धाः विषयाः दातुं शक्यन्ते, अन्यथा न कदापि। एवमपि भवति यत् गवेषणासूचिकासु अन्यत्र प्राप्तासु च सूचनासु अपूर्णा अर्धपूर्णा एकाङ्गिनी सूचना वा मिलति, अस्यां दशायां तेषु पूर्णतया निर्भरेण न भवितव्यम्। अतएव सा सामग्री अनुसन्धात्रा स्वयमवश्यं द्रष्टव्या। अतः

निश्चितमेव यदीदृशा: विषया: सामग्रीसौलभ्यस्यानुमानं कृत्वैव दातुं शक्यन्ते। यदि सामग्री सुलभा न भवेत् तर्हि प्रतिभासम्पन्नोऽपि शोधार्थी तत्कार्यमग्रे वर्धयितुं न शक्नुयात्। यदि स किञ्चित् करोति तर्हि तस्य निष्कर्षाः नूतना मौलिकाः प्रामाणिकाश्चाभूत्वा भ्रान्तिप्रदा भवितुं शक्नुवन्ति। अतः सामग्रीसौलभ्यस्य ध्यानं विषयनिर्वाचनप्रसङ्गे नितरामावश्यकम्।

६. योग्यनिर्देशनम् –

अनुसंधित्सुः अभिरुचिम्, अध्ययनपृष्ठभूमिं, बौद्धिकप्रौढिं, वैचारिकक्षमतां, सामग्रीसौलभ्यञ्च प्राप्याऽपि कस्यापि विषयस्य निर्वाचनं योग्ये निर्देशने प्राप्ते सत्येव कर्तुं शक्नोति। योग्यनिर्देशकं विना अनुसन्धानकार्यं पूर्णतां न प्राप्नोति। यद्यपि तावत्, प्रत्येकविश्वविद्यालयस्य अध्यापकः विशेषरूपेणाचार्यः अध्यक्षश्च प्रत्येकविषयस्य निर्देशनं कर्तुं शक्नोति, करोत्यपि, परन्तु इदमनुसन्धानकार्यपाशमेव भवति, अर्थात् याप्यं कार्यसञ्चालनमेव भवति। निर्देशकः स्वयं विषयाविशेषज्ञः योग्यमध्यवसायिनमनुसंधातारं न तु प्रोत्साहयितुं शक्नुयात्, न वा तस्य सूक्ष्मास्त्रुटीरेवाख्यातुं शक्नुयात्। एवञ्च योग्यविद्यार्थ्यपि नवीनसिद्धान्तस्य तत्त्वस्य अन्वेषणं कर्तुं न शक्नुयात्। अतः विषयनिर्वाचनविधानकाले निर्देशकस्य योग्यता विशेषता च विचारणीये भवतः। कार्यमिदं द्विधा कर्तुं शक्यते-निर्देशकं प्रथमं निश्चित्य तदीयाया योग्यताया विशेषज्ञतायाश्च क्षेत्रे समाविष्टानां विषयाणां निर्वाचनं कुर्यादथवा विषयोऽन्यप्रकारेण पूर्णोऽस्तीति निश्चिते जाते तद्विषये सुयोग्यनिर्देशकस्य शरणेऽनुसन्धाता गच्छेत्। अत्रेदं कथनमपेक्षितमस्ति यदनुसन्धातॄणां वर्धमानसंख्यानुसारेण सुयोग्यनिर्देशकानां साम्प्रतम् तत्राधिकावधानस्याधिक-बलदानस्य चावश्यकताऽस्ति। अतएव विश्वविद्यालयेषु अनुसन्धानकार्यं प्राथमिकीं महत्तां न प्रापत् तदेकं गौणवत्कार्यमवगम्यते। इयं धारणा भावना च महाहानिकारिका वर्तते। अनुसन्धानकार्यं विश्वविद्यालयस्य सर्वप्रमुखकार्यमस्ति तस्मै च कार्याय निश्चिता सुविधा मान्यता च प्रदातव्या। अनुसन्धानपीठम्, अनुसन्धानकक्षश्च अनुसन्धाना- चार्यपरीक्षापरकं विश्वविद्यालयेषु पृथक्-पृथक् भवेताम्। एतयोः कृते विश्वविद्यालयस्याधिकारिणः

सर्वस्मात्प्रथममवधानं दद्युः।

७. विषयोपयोगिता महत्त्वे–पूर्वोक्तेभ्यः तत्त्वेभ्यः पृथक् विषयोपयोगिता महत्वे अपि विचारणीये स्तः। यद्यपि ज्ञानस्य क्षेत्रे कोऽपि विषयोऽनुपयोगि नास्ति परन्तु सामाजिक–सांस्कृतिक–जीवनाय यो विषय उपयोगी महत्वपूर्णश्च वर्तते तत्र अनुसन्धानकार्यस्य प्राथमिकता दातव्या। विषयस्योपयोगिता, सूचनाज्ञानबृद्ध्योरुभयोरेव दृष्ट्या भवितुमर्हति। ईदृशविषयनिर्वाचनेन, येषां कोऽपि सामाजिकी उपयोगिता वर्तते, सामाजिक–जीवनस्य ज्ञानस्य च विकासो भवति। अन्यच्च, विषयस्य महत्त्वपूर्णतया अनुसन्धित्सुरधिकेनोत्साहेन गौरवेण च स्व–कार्ये अग्रेसरी भवति। यथा किल प्रथमं मया सङ्केतितम्, अयमुत्साहः तथा अनुसन्धानकार्यगतमहत्त्वहेतुकगौरवभावनैव अनुसन्धानकार्यस्य वास्तविकः पुस्तकारो वर्तते। यद्यनुसन्धातुः स्वकार्यस्य तन्महत्त्वगौरवस्यानुभूतिः प्रक्रमते तर्हि स अधिकगाम्भीर्यपूर्णाभिनिवेशेन अध्यवसायेन च कार्ये संलग्नो भवति। अथ च इतोऽतिरिक्तमपि अस्यैको महान् उपयोगोऽयमस्ति यत् अनया भावनया कार्यसम्पादनेन अनुसन्धानकार्यस्य गौरवमयी परम्परा पाषाणगतरेखायते या स्वकीयं निजं सामाजिकं राष्ट्रियं च महत्वं प्रथयति। ज्ञानानुसन्धानक्षेत्र एतन्महत्वगौरवस्पृहा वाञ्छनीयाऽस्ति। अन्यान् स्थूलान् स्वार्थभावान् दृष्टिगतान् विधाय कृतमनुसन्धानसदृशपवित्रकार्यं स्वकीयां महत्तामवपातयति। सा स्वीया महत्ता विषयस्य स्वीयायामुपयोगितायां स्वीये च मूल्ये स्वतो निहिता तिष्ठति।

वस्तुतोऽनुसन्धानकार्यमेकं पवित्रं निरपेक्षं च कार्यमस्ति विषयनिर्वाचनेन सह वेदमावश्यकमस्ति यन्निर्देशकोऽनुसंधायकस्य मानसे विषयस्य महत्वभावनां सम्यग्बिभृषीष्ट। एतद्भावनासंभृत एवानुसंधाता तस्य स्वीयकार्यस्य गौरवमनुभवेत्, एवञ्च तस्मिन् गम्भीराभिरुचिरभिनिवेशश्च जागरूकौ भविष्यतः ताभ्यां च सहैव सोऽदम्योत्साहेन विषयादेकैकं निष्कर्षं परिणामं च निःसारयितुं प्रवृत्तौ भवन्नभूतपूर्वानन्दमनुभवेत्। अनुसन्धानकार्येऽमूदृशस्यानन्दस्यानुभूतिरेव महत्वपूर्णानां तत्त्वानां सिद्धान्तानाञ्चान्विष्योद्भावने सामग्रीसंकलने तथा तस्यानुशीलने चाद्भुतक्षमतां जागरयति।

निर्देशको वस्तुतः कदाप्यनुसंधात्रे सामग्रीः, सूचनास्तत्त्वं सिद्धान्तं वा स्वयं निस्सार्य न ददाति। यो ह्येवं मन्यते यत् सर्वेषां निस्सारणं निर्देशकः करोतीति, स भ्रान्तोऽस्ति। निर्देशकोऽनुसंधात्रे एकां दृष्टिं प्रददाति। स तदधीतविषयं पुनर्वीक्षितुमेकं ज्योतिर्वितरति, यस्यालोके स नवानि तत्त्वानि तथ्यानि चान्वेषयति। निर्देशकात् प्राप्तेदृशदृष्टिरवाप्तैतादृश- ज्योतिर्वानुसंधाता स्वस्मिन्नसदप्यज्ञातमर्धज्ञातं च विषयं स्पष्टं पश्यति। विषयस्य सम्पूर्णक्षेत्रस्योद्घाटनमियमेव दृष्टिः करोति। यो विषयोऽतिसंक्षिप्तो लघुर्वा प्रतिभाति सोऽपि निर्देशकप्रदत्तदृष्टौ प्राप्तायां जातायां समुचितदीर्घत्वमेति। जटिलत्वेनास्पष्टत्वेनासीमत्वेन च पूर्वप्रतीतोऽपि विषयो भिन्नग्रन्थिक-श्छिन्नसंशयश्च भूत्वा स्पष्टीभवति तत्सीमा च दृष्टिगोचरीभवति।

अनेन प्रकारेण विषयस्पष्टीकरणेन सहानुसंधातुः स्वमनोवृत्त्यभि-रुचिक्षमतादिपरिचयाऽवबोधावपि सुयोग्यनिर्देशकस्य सम्पर्के आश्रये चोपलब्धे सत्येव प्राप्तौ भवतः। स स्वामभिरुचिं क्षमतां च प्रति यदैव जागरूको भवति, एकस्यापूर्वस्योत्साहस्य विलक्षणगम्भीरानुभवस्य प्राप्तिस्तस्य जायते। स च केवलमनुसन्धानकार्यैकनिष्ठो भवितुमिच्छति। स सत्वरं सामग्रीः निर्देशकादवाप्तया नूतनया दृष्ट्य विलोक्य तान् नूतनान् परिणामान् निष्कर्षांश्च परीक्षितुमिच्छति, यान् प्रति तेन संकेतोऽवाप्तः। एतां स्थितिं प्राप्तमेवानुसंधानकार्यं वास्तविकरूपं गृह्णाति अन्यथा तदुपहासस्थानमिव निष्फलकार्यमिव च भवति।

एषु विषयेषु सध्यानावधानं विचारो विधीयते चेत् ज्ञायतेऽस्माभिर्यद् विषयनिर्वाचनमितीदृशमनुसंधानकार्यस्योपेक्षितमङ्गं कियन्महत्त्वमादधाति। इदमनुसंधानकार्यस्यास्य बीजमस्ति, अस्य यथानियमं यथारीतिं च समुचित-भूमौ वपनेनारोपेण च रम्य-मधुरे परिणामकुसुमफले आविर्भवितुं शक्नुतः। अन्यथा बीजे निर्बले भूमिक्षेत्रे चानुर्वरे सकलः परिश्रमो व्यर्थो जायते। वयमस्य विषयनिर्वाचनकार्यस्य ज्ञातप्रदत्तसमुचितमाहात्म्या अनुसन्धानकार्यस्य गौरवमयपरम्परानिर्माणाय हृदयेन प्रयत्नं विधास्याम इत्याशा वर्तते ऽस्मदीयेति।

अनुसंधानस्य रूपविधानम् (रूपबन्धः)

लेखकः - डॉ॰ नगेन्द्रः

अनुवादकः - डॉ॰ हर्षनाथमिश्रः

समुचितवेशभूषया यथा मानवव्यक्तित्वश्रीर्वर्धते तथैव समुचितरूपबन्धेन शोधप्रबन्धस्य स्वरूपमप्यवदातं भवति। पाश्चात्यदेशानां प्रख्यातेषु महत्सु महत्सु विश्वविद्यालयेषु यत्र किलानुसंधानस्य सुदीर्घा परम्पराऽस्ति, शोधप्रबन्धस्य रूपविधाने पर्याप्तं बलं दीयतेऽवधानञ्च। अन्यच्च "शोधप्रबन्धः केन प्रकारेण लिखितव्यः" एतादृशं विषयमादाय लघुलघु पुस्तिकाः काले काले प्रकाश्यन्ते, यत्र तस्य वाह्यरूपाकारगत-विविधाङ्गसम्बद्धावावश्यक-सूचनासंकेतौ च भवतः।

१. आकारः कलेवरं वा

प्रबन्धस्याकारविषये कलेवरविषये पूर्वमेव निश्चितनियमनिर्माणं कठिनमस्ति। प्रत्येकप्रबन्धस्य कलेवरं तदीयानुसन्धेयविषयमनुहरते। यदि विषयपरिधिर्व्यापकोऽस्ति, तस्य च प्रतिपादनं विवरणसापेक्षमस्ति तर्हि स्वभावत एव तस्य कलेवरं विशालं भविष्यति। परन्तु यदि स कस्मिन्नपि समस्याविशेषे प्रवृत्तिविशेषे वा केन्द्रितोऽस्ति, तस्य प्रतिपादनं च विश्लेषणसापेक्षं वर्तते, तर्हि प्रबन्धस्याकारो लघुरेव भविष्यति। तथापि स्थूलरूपेण कथयितुं शक्यते यत् प्रबन्धस्याकारेण तत्परिधिना वा द्विशतसार्धद्विशतपृष्ठचतुश्शतपृष्ठा-नामन्तरालस्थेन (२००,२५०–४०० पृष्ठान्तर्गतेन) भवितव्यम्। प्रथमात् शोधोपाधेः पी–एच॰डी॰ इत्यस्मात् 'डी॰लिट्॰' इत्युपाधेरनुसंधेयो विषयोऽधिकव्यापकोऽपि भवति गहनश्च, विषयस्येदं व्यापकत्वं गहनत्वं चाधृत्यैव तस्य कलेवरस्य निर्धारणं कर्तव्यम्।

२. मुखपृष्ठम्

मुखपृष्ठस्य गुणौ भवतः–स्पष्टता स्वच्छता च। स्पष्टताया अभिप्रायोऽयमस्ति–प्रबन्धविषयकाणामावश्यकसूचनात्मकतथ्यानामुल्लेखो मुखपृष्ठे स्पष्टशब्दैर्विधेय इति, स्वच्छतायाश्च तात्पर्यमस्ति– तत्रानावश्यकतथ्यानां प्रलापेन वावदूकतया च न भवितव्यमिति। सर्वस्मादुपरि मुखपृष्ठस्य मध्येभागमनुसंधेयविषयकशीर्षकेण भवितव्यम् तथाऽऽवश्यकता चेत् ततोऽधस्तात् कोष्ठके व्याख्यात्मकटिप्पण्यपि दातुं शक्यते। उदाहरणाय "काव्यशास्त्रे उपमालंकारस्य विकासः (भामहादारभ्य मम्मटान्तं यावत्") इति वाक्यं गृह्यताम्। मुखपृष्ठस्य मध्ये विश्वविद्यालयस्याथवा संस्थानस्य उपाधिविशेषस्य तथा प्रस्तुतिवर्षस्योल्लेखः कर्तव्यः, यथा– राष्ट्रियसंस्कृतसंस्थानस्य विद्यावारिधिरित्युपाधये प्रस्तुतः शोधप्रबन्धः, १९८५ ईस्वीय वर्ष इति च। सर्वतोऽधस्तादनुसंधातुर्नाम देयम्। सामान्यतो निर्देशकस्य नामनिर्देशो मुखपृष्ठेऽधिकसंगतो नास्ति, किन्तु विषयेऽस्मिन् विश्वविद्यालयानां स्वीया पृथक् पृथक् प्रथा वर्तते।

३. प्रस्तावना विषयप्रवेशो वा

प्रस्तावनायां विषयप्रवेशे वाऽनुसंधाता, विषयस्य महत्त्वं तदीयचयनकारणानि चोल्लिख्य तत्सम्बद्धपूर्ववर्तिसामग्र्याः संक्षिप्तं समीक्षात्मकं सर्वेक्षणं प्रस्तुत्य स्वदृष्टिकोणं स्पष्टयति ततश्चान्ते स स्वीयान् तान् निष्कर्षानथवानुसंधानकार्यस्योपलब्धी रेखाङ्कितान् विदधाति, यैः, तन्मतेन, विषयाध्ययनविकासो ज्ञानक्षेत्रसीमाविस्तारश्चाभूताम्।

पूर्ववर्तिसामग्रीसमीक्षा संयतशब्दैरेव करणीया। स्वस्मात् पूर्ववर्तिनां लेखकानां कार्यसीमानिर्देशस्त्वावश्यकः किन्तु तदीया निन्दा कठोरशब्दैरालोचना चानुचितैव मता स्यात्। प्रस्तावनाया मुख्यमुद्देश्यं तावदेव भवति यावताऽनुसंधानविषयकाणां निम्नोक्तानामनुबन्धानामावश्यकपूर्तिर्जायते।

अनुसंधात्रा इदमपि स्पष्टं क्रियेत, यत्तेन, पूर्ववर्तिसामग्र्या उपयोगः कियान् कुत्र पर्यन्तं च कृतः, तथा तेनाङ्गीकृतो निष्कर्षः केन रूपेण

विषयस्याध्ययने योगदानं करोति ज्ञानक्षेत्रसीमां च कथंकारं विस्तारयति।

अपरञ्च, यद्यनुसंधाता स्वकार्यविषयिणीं काञ्चित् सूचनां दित्सति तर्हि साऽपि प्रस्तावनायामेवोल्लेखनीया।

अन्ते, अनुसन्धातुरेकमौपचारिकं कर्तव्यमवशिष्यते, तदस्ति धन्यवाद-ज्ञापनम्। एतत्कृते संयता भाषा प्रयोक्तव्या, अर्थात् तत्र न किञ्चित् प्रकारकेणातिरञ्जनेन भवितव्यम् न च भावुकताप्रदर्शनेन भाव्यम्। सामान्यतो धन्यवादस्य प्रमुखं पात्रं निर्देशक एव भवति तथापि विभागस्य संस्थानस्य चाध्यक्षं प्रति कार्तज्ञ्यज्ञापनमुचितमावश्यकं चास्ति। अथ चैभ्योऽतिरिक्तेन केनापि विदुषा संस्थाविशेषेण वाऽनुसंधानकार्ये साहाय्यं प्रदत्तं तर्हि तस्यापि सधन्यवादोल्लेखः करणीयः। एतस्मिन् प्रसङ्गे मित्राणां परिवारसदस्यादीनां चर्चा सर्वथाऽशोभनीया भवति, यतो हि शोधप्रबन्धो विधिवत् परीक्षायै प्रस्तूयते, अनया दृष्ट्या सोऽपि प्रकारान्तरेणोत्तरपुस्तकमेव भवति। एवमेव शोधप्रबन्धस्य समर्पणादावपि किमप्यौचित्यं नास्ति। इमाः सर्वा औपचारिकता ग्रन्थप्रकाशनसमये आवश्यकतानुसारेण परिहर्तुं शक्यन्ते।

विषयविभाजनं रूपरेखानिर्माणञ्च

अनुसंधानकार्यस्य महत्त्वेन सर्वातिशाय्यङ्गमिदमेवास्ति। सामान्यतो विषयप्रतिपादनस्य मुख्यं भागद्वयं खण्डद्वयं च भवति। १. भूमिकाखण्डः २. शोध-खण्डश्च। प्रत्येकानुसन्धानकार्याय कापि भूमिका नूनमपेक्ष्यते, यतोहि कस्यापि विषयस्य प्रतिपादनं सहसाऽकस्माच्च न कर्तुं शक्यते। विषयस्य स्वावश्यकतानुसारेण स्वरूपस्य सैद्धान्तिकं विवेचनं, पूर्वपरम्परा-निरीक्षणं सम्बद्धघटकानां व्याख्यादिकं च प्रायः सर्वप्रकारकायानु-सन्धानकार्यायावश्यकानि भवन्ति। किन्तु प्रबन्धस्य भूमिकाभागे मूलभागे च यथोचितेन तारतम्येनानुपातेन वाऽवश्यं भाव्यम्। भूमिकायाः कलेवरं मुख्यभागात् प्रकृत्यैव लघुतरं भवेत् यतो ह्यनुसंधाता भूमिकायामनुसंधानस्य कृते केवलं भूमिमेव निर्माति अर्थादीदृशीं सामग्रीं प्रस्तौति या हि विषयप्रति-पादनायावश्यकीभवति। अनुसंधानपद्धतेर्ज्ञानाभावात् अथवोचितनिर्देशना-

भावादनुसंधातोचितस्यानुपातस्य निर्वाहं न कर्तुं प्रभवति। स भूमिकामेवानु- संधानाङ्गं मत्वा तत एव कार्यमारभते। एतस्य परिणामोऽयं जायते–यद् भूमिकायाः कलेवरं कुत्रापि शोधखण्डतुल्यं कुत्रापि कुत्रापि च ततोऽपि दीर्घं जायते। अनुपातव्यतिक्रमोऽयं नूनमेव प्रबन्धरचनायाः स्पष्टो दोषो भवति। यद्यप्यत्रापि विषये कस्या अपि नियतसीमाया निर्धारणं कठिनं दोषो भवति। किन्तु सामान्यतो भूमिकाखण्डस्याकारः सम्पूर्णस्य शोधप्रबन्धस्य तृतीयांशानुपातकल्प एव भवेत् तथा च तत्र तावत्येव सामग्री भवेद् यावती किल विषयप्रतिपादनायानिवार्याऽस्ति। अस्य कारणमेतदस्ति यद् भूमिकायां लेखकः प्रायेण शास्त्रीयामथ चेतिहासविषयामेव सामग्रीं प्रस्तौति तत्र च मौलिकताया विशेषावकाशो नावतिष्ठते, तथापि कतिपये विषया एतादृशाम् अवश्यं भवितुं शक्नुवन्ति, येषां विषयेऽनुसंधाता इतिहासदृष्ट्या कानिचिन्नूतनानि तथ्यान्युपलब्धानि विधातुं शक्नोति, अथ च शास्त्रीयदृष्टिमाश्रित्य सिद्धान्तानां नूतनमाख्यानं कर्तुमर्हति। ईदृश्युपलब्धिर्नूनमेव मुख्यानुसंधानकार्यान्तर्गततया शक्यते परिगणयितुम्। एवञ्चेदृशं तथ्यं प्रस्तावनायां रेखाङ्कितं विधेयं यतो हि शोधप्रबन्धस्य मूल्याङ्कनायैतदप्यवधेयं भवति। भूमिकाखण्डे चावश्यकतानुसारेण द्वित्रैरेवाध्यायैर्भवितव्यम्।

शोधखण्डेऽनुसन्धेयविषयस्य गवेषणात्मकमध्ययनं प्राप्तस्थानं भवति। अत्र सर्वप्रथममावश्यकता पूर्वापरक्रमनिर्वाहस्य भवति। अस्येदं तात्पर्यं भवति– विषयस्य विभिन्नानामङ्गानां विवेचनं तैः सम्बद्धानामध्यायानां क्रमश्च तर्कसम्मते भवेताम्। उदाहरणायोच्यते–यदि कमपि कविमधिकृत्यानुसंधित्साऽस्ति, तस्य कवेः समसामयिकपरिवेशस्य विवेचनं, यस्मिन् तस्य कर्तृत्वं विकासमवाप्नोत्, सर्वप्रथमं कर्तव्यम्। तदनन्तरं क्रमेण जीवनवृत्तग्रन्थपरिचयभावसम्पद्विचार- पृष्ठभूमि–काव्यशिल्पाभिव्यक्तिशैली–काव्यभाषाच्छन्दोविधानादयो विवेचनीयाः तथाचान्ते उपसंहारो लेख्यः। कवेः कथ्यस्य, अर्थाद् भावभूमेः विचारानुबद्ध- पृष्ठभूमेश्च प्रतिपादनात् प्राक् शैलीशिल्पादेर्विवेचनं तर्कसंगतं न भवितुमर्हति। यतः शैली शिल्पस्य निर्माणाधारः कथ्यविषयो भवति, आधारात् प्रागाधेयस्य स्थितिरसंगतैवेति कृत्वा शैलीशिल्पादे निरूपणं कथ्यात्–भावभूमि- विचारानुस्यूत-पृष्ठभूमितोऽनन्तरमेवोचितम्। एवमेव, कविः शैली–शिल्प–

प्रभावस्तस्य भाषिकसंरचनायामपि पतति। उपसंहारे सम्पूर्णस्यानुसंधानकार्यस्य समाहारो भवति। अतः स प्रबन्धस्यान्तिमाध्याय एव भवितुमर्हति।

विषयनिरूपणं कुर्वतोऽनुसंधातुर्ज्ञानं तथा स्पष्टं भवेत् यथा स विषयेण सम्बद्धस्यासम्बद्धस्य च वस्तुनो निर्णयं यथावत् कर्तुमर्हेत्। शोधप्रबन्धे तादृशस्य विषयस्य तादृशां वा विषयाणां विवेचनं कदापि न करणीयं येषां सम्बन्धो मूलविषयेण साक्षान्नास्ति। उदाहरणाय दृश्यताम्—यदि कोऽपि "कालिदासस्य काव्ये शैवदर्शनस्य प्रभावः" इति विषयमाश्रित्यानुसंधानं चिकीर्षति तर्हि शैवदर्शनस्य विवेचनं त्वावश्यकमस्ति, किन्तु काव्यस्य स्वरूपस्य तदीयभेदप्रभेदानां च व्याख्यानमपेक्षितं नास्ति।

रूपरेखानिर्माणमिमानेव सामान्यनिर्देशकसिद्धान्तानाश्रित्य क्रियते।

विषयप्रतिपादनम्

विषयप्रतिपादनमनुसन्धानस्यात्माऽस्ति। आधारसामग्र्या आलोचनात्मकपरीक्षणमनुसंधानस्यैको मौलिकोऽनुबन्धोऽस्ति। अतोऽमुत्र विषयप्रतिपादनस्य शैल्या विवेचनात्मकया विश्लेषणस्वरूपया च भवितव्यम् न तु वर्णनस्वरूपया। कस्यापि तथ्यस्याथवा सिद्धान्तस्य वर्णनमनुसन्धानं नास्ति, तस्य व्याख्यानमेवानुसंधानमस्ति।

विषयप्रतिपादनस्य द्वितीयावश्यकविशेषताऽस्ति व्यवस्था अर्थात् तदनुस्यूता एका स्पष्टा योजना भवेत्। यामाश्रित्यानुसंधातुः प्रस्तुते तर्कप्रमाणे एकतः केन्द्रीयविचारबिन्दुना सह, अन्यतश्च, परस्परमेकं द्वितीयेन सह सम्बद्धे भवेताम्। एतत्कृते प्रत्येकाध्यायस्यैकपूर्वयोजनानिर्माणं पर्याप्तमुपयोगि भवति। विषयप्रतिपादनस्य द्वौ प्रमुखौ दोषौ भवतः—पुनरावृत्तिर्विषयान्तरञ्च। सम्यगभ्यासाभावात् प्रबन्धलेखक एकमेवार्थं कतिधा कतिपयस्थानेषु च वक्तुं प्रक्रमते। अनेन विवेचने उज्झीनत्वमायाति जडीभावाश्च। द्वितीयो दोषो भवति विषयान्तरम्। अस्यापि कारणं प्रायोऽनभ्यास एव भवति। लेखकः विवेच्यं विषयं विहाय केषुचिदेवंभूतेषु प्रसंगेषु बम्भ्रम्यते, येषां तेन

सह कोऽपि सम्बन्धो नास्ति, बादरायणसम्बन्धे सायासं साधितेऽपि साक्षात्सम्बन्धस्तु नास्त्येव।

उद्धरणानां विषयेऽपीदमेव सत्यमवधेयमस्ति– विषयस्य प्रतिपादनं युक्तिप्रमाणपुरस्सरं विधेयम्। अतः शास्त्रीयविवेचनाय सूत्राणि वृत्तयः दृष्टान्तः उदाहरणनि च विहितानि सन्ति। अनुसंधाता स्वयुक्तेः पुष्टये वस्तुविवेचकं दृष्टान्तमुदाहरणं वा, कदाचित्कदाप्याप्तवाक्यम् अथवा सिद्धान्तवाक्यं चोद्धरति। एवञ्च विषयप्रतिपादनकर्मणि प्रामाणिकानां वक्तव्यानामुदाहरणानाञ्चोद्धरणस्यानिवार्यं महत्त्वमस्ति। उदाहरणानि गद्यपद्योभयात्मकानि भवितुमर्हन्ति अत्र विषयेऽवश्यमवधेयमिदमस्ति यत् केवलस्यावश्यकस्य, प्रसंगस्य कृते सार्थकस्यांशस्यैवोद्धरणं दातव्यम्–गद्यांशस्य केवलं तदेव वाक्यमुद्धरणीयं यस्य हि युक्तिविशेषेण साक्षात् सम्बन्धो भवेत्। एवमेवच्छन्दसस्तावानेवांश उद्धर्तव्यः यावानंशः प्रस्तुतस्य तर्कस्य सिद्धय आवश्यको भवेत्। सम्पूर्णे वक्तव्ये छन्दसि वोद्धृते विषयान्तरत्वमापद्यते, प्रबन्धस्याकारेऽनावश्यिकी वृद्धिरपि संभवति। कथनस्यायमाशयो यत् गद्यावतरणस्य च्छन्दोविशेषस्य वा तावानेवांशो विवेचनान्तर्गततयोद्धरणीयो यावान् हि लेखकस्याशयं स्पष्टीकर्तुं तस्य युक्तयुक्तत्वं च प्रमाणयितुमनिवार्यो भवेत्। शिष्टस्य भागस्यानुभूतावश्यकन्यासस्य पादटिप्पणीरूपेणोद्धरणं दातुं शक्यते। अपरञ्च, उद्धरणानां संख्ययापि सीमितयैव भाव्यम्। सामान्यतः उद्धरणद्वयेनाभीष्टार्थस्य सिद्धिः संभवति, परन्तु विषयेऽस्मिन् कोऽपि नियमः–इदमेव भवेन्नेत्थमिति–न कर्तुं शक्यते। कदापि एकस्य द्वयोर्वोदाहरणयोरुद्धरणं पर्याप्तं भवति, जातुचिच्च ततोऽधिकानामुदा- हरणानामुपयोगोऽपि आवश्यको भवति। अतः ध्यातव्यमिदमस्ति यदुदाहरणं साधनमात्रमस्ति, न तु साध्यम्–आधिक्येनोदाहरणानामुद्धरणप्रदानेन विचारसूत्रभङ्गाऽऽशङ्काऽपि जायते।

सन्दर्भसंकेतः

सन्दर्भलेखोऽनुसंधानप्रक्रियाया नितरामुपयोगी अंशोऽस्ति। यथा कस्यापि मतस्य प्रामाणिकतां साधयितुम् आप्तवाक्योद्धरणं सार्थकोदाहरण-

प्रदानञ्चावश्यकं भवति तथैव तस्योद्धरणस्योदाहरणस्य च प्रामाण्यसिद्धये तस्य संदर्भस्योल्लेखविधिरप्यनिवार्यो भवति।

एवञ्च सन्दर्भलेखोऽनुसंधानस्य प्रक्रियायाः प्रविधेश्च तदङ्गमस्ति यत्तस्य प्रामाणिकतायै दृढतरां भूमिकां प्रददाति।

सन्दर्भलेखस्य प्राथमिकी आवश्यकता भवति—एकरूपता, अर्थात् तत्र प्रारम्भादन्तपर्यन्तमेकस्या एव पद्धतेरुपयोगो विधेय इति। सामान्यतस्तस्य चत्वारो भागा भवन्ति १. लेखकस्य नाम २. ग्रन्थस्य नाम, ३. संस्करण-विवरणम् ४. पृष्ठसंख्या च। इतोऽन्यच्च, तत्र प्रकाशकसंस्थाया नामोल्लेखोऽप्यावश्यकः, किन्तु प्रारम्भ एव सकृद् द्विर्वोल्लेखः पर्याप्तो भवति तादृशः क्रमश्च प्रायः स एव पूर्वोक्त आश्रयणीयः किन्तु क्वापि क्वापि ग्रन्थस्य नाम प्रथमं दीयते। यतो हि लेखकस्य नामोल्लेखः प्रायो विवेचनेन सहैव, तदन्तर्गततया जायते, इत्येका युक्तिः अपरा च लेखक-ग्रन्थयोरुभयोर्मध्ये सापेक्षं प्रासंगिकत्वं ग्रन्थस्य भवति इति। ग्रन्थेन सह संस्करणस्योल्लेख आवश्यकोऽतोऽपि भवति यतः पृष्ठसंख्योल्लेखं विना तस्य किमपि सार्थक्यं नास्ति। व्यवसायस्याङ्गीभूततया ग्रन्थानां रूपाकारौ परिवर्तनं प्राप्नुतः, अतः पृष्ठसंख्यायामपि भूयोऽल्पीयो वा परिवर्तनं स्वाभाविकम्। यदि ग्रन्थस्य नाम प्रथममायाति तदा संस्करणस्य, पृष्ठसंख्याया श्चोल्लेखोऽपि क्रमेण तदनन्तरं करणीयः। लेखकस्य नामान्ते निर्देश्यम्, यदि विषयविवेचनप्रसङ्गे तस्य स्पष्टोल्लेखः प्रथमं कृतोऽस्ति तर्हि तस्य पुनरावृत्तिर्नापेक्ष्यते। अत्र सन्दर्भेऽवश्यं ध्यातव्यम्—यत् संपूर्णे प्रबन्धे कस्याप्येकस्यैव क्रमस्यानुसरणं कर्तव्यम्। लेखकस्य नाम प्रारम्भे प्रथमं निर्दिष्टं चेदन्तपर्यन्तं तथैव निर्देष्टव्यम्, यदि ग्रन्थस्य नाम प्रथममस्ति तर्हि तस्य क्रमस्य निर्वाहो यावदन्तं विधेयः।

सन्दर्भसंकेताः क्व दातव्या इतिप्रश्नोऽत्रोत्तिष्ठते। अत्र विषयेऽपि चत्वारो विकल्पाः संभवन्ति :—१. उद्धरणादव्यवहितपरतयाकोष्ठके विषयप्रतिपादनस्यान्तर्गतत्वेनैव सन्दर्भोल्लेखः कर्तुं शक्यते २. प्रत्येकस्मिन्नुद्धरणे

संख्यां दत्त्वा पृष्ठस्य निम्नभागे पादटिप्पणीरूपत्वेन तयैव संख्यया तस्य निर्देशः शक्यते कर्त्तुम् ३. सम्पूर्णाध्यायेऽन्तरुक्तेषूद्धरणेषु संख्याङ्कं निर्दिश्याध्यायान्ते तेनैव क्रमेण तदीयसन्दर्भाणामुल्लेखः शक्यते विधातुम् ४. सम्पूर्णे प्रबन्धे प्रयुक्तेषु समस्तेषूद्धरणेषु यथाक्रमं संख्या अङ्कयित्वा ग्रन्थान्ते तेषां सन्दर्भाणां विवरणं दातुं शक्यते।

एषु अङ्कनमुद्रणदृष्ट्या सर्वाधिकसुगमाऽस्ति चतुर्थी पद्धतिः, यत्र हि विवेचनप्रवाहो निर्बाधमग्रे वर्धते, किन्तु पद्धतावस्यामाश्रीयमाणायां पाठकैर्विविधोद्धरणसन्दर्भावबोधे महदसौविध्यमनुभूयते। अस्याः पद्धत्या उपादेयत्वं तदैवास्ति यदा पाठकः सन्दर्भचिन्तनं विनाऽध्ययने संलग्नो भवेत् किन्त्वीदृशमध्ययनं त्वपूर्णमेव स्थास्यति, कस्याप्युद्धरणस्य मूलस्रोतसो ज्ञानं विना तत्र प्रामाणिकताया प्रतीतेरशक्यत्वात्। तृतीयापद्धतिरुपर्युक्तपद्धतेरेव संक्षिप्तं रूपमस्ति। अतोऽत्रापि तद्वदेव गुणदोषौ यथावद् विद्यमानौ स्तः प्रत्येकाध्यायस्यान्ते सन्दर्भनिर्देशात् पाठकस्यात्रापेक्षाकृतोऽल्पीयान् श्रमो भवति, किन्तु सन्दर्भस्य सद्योज्ञानमत्रापि न भवति। सन्दर्भस्य तात्कालिकावगतये प्रथमापद्धतिः सर्वाधिकोपयोगिनी वर्तते। किन्तु तत्रापि द्वौ दोषौ स्तः एकस्तु पाठकस्य ध्यानमत्र मध्ये मध्ये विच्छिन्नं जायते, द्वितीयो हि प्रबन्धस्य मुख्यकलेवरेऽप्यनावश्यकवृद्धिरत्र दोषोऽस्ति।

अन्ततो गत्वा द्वितीया पद्धतिरवशिष्यते, यस्या अनुसारेण प्रत्येकपृष्ठे प्रयुक्तेषूद्धरणेषु संख्याङ्कं दत्वा पृष्ठस्य निम्नभागे टिप्पण्यां यथाक्रमं सन्दर्भास्तत् तत्संख्याङ्किता निर्दिश्यन्ते। व्यावहारिकदृष्ट्येयं पद्धतिरेवाधिकसमीचीनाऽस्ति, अस्या एव प्रयोगः शोधप्रबन्धेषु भवति। एतस्या अनुसरणेन पाठकस्य ध्यानभङ्गोऽपि प्रायो न भवति तथा च सन्दर्भसूचनाप्राप्तये विशेषश्रमोऽपि न कर्तव्यो भवति।

परिशिष्टम्

परिशिष्टे सामान्यतो ग्रन्थसूच्येव तिष्ठति, इतोऽतिरिक्ता काचिदीदृशी सामग्री अपि दातुं शक्यते, यस्योपयोगस्तु कृतो भवेत् किन्तु शोधप्रबन्ध-

स्यान्तर्गतत्वेन समावेशो न कर्तुं शक्य आसीत्। अप्रकाशिता हस्तलेखा, दुर्लभकृतीनामंशाः, शिलालेखादयश्चात्रवर्गे प्रवेष्टुमर्हन्ति। एषामन्तर्भावः शोधप्रबन्धस्य मुख्यकलेवरे न कर्तुं शक्यते, किन्तु विषयस्य सम्यगध्ययनायेदृशी सामग्री परीक्षकस्य, सामान्यपाठकस्य च ज्ञानाय चावश्यकी वर्तते।

ग्रन्थसूची

ग्रन्थसूची शोधप्रबन्धस्यावश्यकमङ्गं भवति। सर्वप्रथमःएकः प्रश्नः समक्षमुपस्थितो भवतिः– येषां येन केनापि रूपेण लेखको निजानुसंधानकार्यनिमित्तकमध्ययनं करोति स्म, किं तेषां सर्वेषां ग्रन्थानां तालिका दातव्या? अथवा केवलमत्र त एव ग्रन्थाः समावेशनीयाः, येषां प्रयोगः प्रबन्धान्तर्गततया बभूवेति। आभ्यामतिरिक्तो हि प्रश्नैकः कोशादिविभिन्नग्रन्थानां समावेशस्याप्युत्तिष्ठते अत्रास्माकं मतमिदमस्ति– अनुसंधेयविषयसम्बद्धाः सर्वे ते ग्रन्थाः सूच्यां समावेश्याः, येषामध्ययनं लेखकेन स्वकीयानुसंधानकार्यप्रसङ्गे विहितमिति। यदा स्फुटगवेषणात्मकलेखेष्वपि विषयसम्बद्धानामुपयोगिनीनां सामग्रीणामुल्लेख– परिपाटी वर्तते तदा प्रामाण्यभरणपोषणापेक्षे शोधप्रबन्धे तत्सार्थक्यनिषेधः कथंकारं कर्तुं शक्यते? ये ग्रन्थाः शोधप्रबन्धान्तर्गतत्वेन पादटिप्पण्यादौ समुल्लिखितास्तेषां सार्थक्यं तु सिद्धमेव किन्तु तेभ्योऽतिरिक्ताया विषयसम्बद्धायाः अन्यस्याः सामग्र्याः सूचनाप्रदानमप्यनुसंधानविकासायावश्यकमस्ति, येन परवर्तिनो लेखका अपि तस्य यथातथ्यं लाभान्विता भवितुं शक्नुयुः। सन्दर्भग्रन्थेषु सामान्यतः परिभाषाकोशानामन्तर्भावो ग्रन्थसूच्यां करणीयो भवति। सामान्यकोशग्रन्थानामुल्लेखस्तदैव करणीयो यदा केषामपि शब्दविशेषाणां व्याख्याय तदुपयोगः कृतो भवेत्।

द्वितीयः प्रश्नोऽयं जागर्ति–किम् सर्वेषां ग्रन्थानामुल्लेख आरम्भादन्तपर्यन्तमकारादिक्रमेण करणीयः आहोस्वित् विषयान् भाषा वाऽधिकृत्य ते वर्गीकृता विधेयाः? इति।

अस्माकं विचारदृष्ट्या भाषानुसारेण विषयानुसारेण च ग्रन्थानां वर्गीकृततालिकाप्रदानमेवोचितमुपयुक्तं च भवति। अस्य कारणद्वयमस्ति– प्रथमन्तु पाठकाय वर्गीकृता सूची सुतरामाधिक्येन सौविध्यजनिका भवति, द्वितीयं हि, देवनागरीलिपे रोमनवर्णमालायाश्चाकारादिक्रमेण मिश्रितसूचीनिर्माणे प्रयोगोऽपेक्षाकृतः कठिनो भवति। अनुसंधाताऽधुना न केवलं स्वभाषाग्रन्थानां अपितु संस्कृताङ्ग्लभाषाग्रन्थानां, जातुचिन्न अन्येषां विदेशिभाषाग्रन्थानां चावश्यकतयोपयोगं करोति। अतो देवनागरीरोमनलिप्योरकारादिक्रमेण एकत्र निर्वाहे किमपि काठिन्यमवश्यमायाति। विषयानुसारेण वर्गीकरणे कृतेऽयं लाभोऽस्ति यत् मूलग्रन्थसहायकग्रन्थानां विषये स्पष्टा सूचना पाठकैरवाप्यत इति। अनया पद्धत्या सन्दर्भसामग्री–कोशपत्रपत्रिकादीनां पृथक्–पृथग्–वर्गनिर्माणमुपयोगि भवति।

इदानीमवशिष्यते ग्रन्थविषयकसूचनानां क्रमस्य प्रश्नः। अत्र प्रसंगे सैव पद्धतिः निर्वोढव्या, यस्या अनुपदमेव सन्दर्भसंकेतप्रसङ्गे उल्लेखो विहितः। ग्रन्थसूच्यां यद्यपि प्राथमिकं महत्त्वं ग्रन्थस्यैवास्ति तथापि सौविध्यदृष्ट्या लेखकस्य नामैव प्रथमं निर्देश्यं यतो ह्यत्रैकस्य लेखकस्यानेकासां कृतीनां नामानि दातव्यानि भवन्ति। प्रत्येकग्रन्थेन सहात्र प्रकाशनसंस्थायाः संस्करणस्य चोल्लेखो नितरामत्यावश्यकः। पाददटिप्पणीरूपेण तु यत्रैषां तथ्यानां संकेतमात्रमेव कर्तुं शक्यते तत्र तावद् ग्रन्थतालिकायामधिकविवरणप्रदानस्य भवत्यवकाश इति।

ग्रन्थसूच्यपि सामान्यतः शोधप्रबन्धस्य परिशिष्टस्यैवाङ्गं भवति तथापि प्राविधिकदृष्ट्या महत्त्वविशेषो भवति, अनेनानुसंधातुः प्राविधिकयोग्यतायाः परिचयोऽपि प्राप्यते। इदं कार्यं स्वाध्यायमाधारीकृत्य पूर्णया निष्ठया सह कर्तव्यम्। पुस्तकालयीयतालिकानां प्रकाशनसंस्थानां सूचीपत्राणामथवान्यग्रन्थेषु संलग्नानां तालिकानामनुकरणं विधाय ग्रन्थसूचीनिर्माणमक्षम्योऽपराधोऽस्ति।

टङ्कणस्य शुद्धता स्वच्छता च

शोधप्रबन्धस्य रूपविधानाय टङ्कणस्य शुद्धतास्वच्छते नितरामा–

वश्यकीभवतः। प्रबन्धे विद्यमानानामशुद्धीनां टङ्कनाशुद्धीर्मत्वोपेक्षाकरणे किमप्यौचित्यं नास्ति यतो हि एतादृशीनामशुद्धीनामप्युत्तरदायित्वमन्ततो गत्वानुसन्धातुरेव शिरसि निपतति। इत्थंभूता अशुद्धयः प्रायः पद्यात्मकोद्धरणेषु आङ्ग्लादि भिन्नभाषाणामवतरणेषु चाधिक्येनागच्छन्ति, तथा च न प्राविधिकदृष्ट्यैव किन्तु व्यावहारिकदृष्ट्याऽपि आसामनुसंधानकार्यस्य मूल्यवत्तायां कुप्रभाव आपद्यते। प्राविधिकदृष्ट्या सर्वोच्चोपाधये प्रस्तुते प्रबन्धेऽशुद्धयः, क्षम्या नैव स्वीकर्तुं शक्यन्ते, व्यावहारिकदृष्ट्या एतदीयो दुष्परिणामोऽयं भवति इमा अशुद्धयः परीक्षकस्य मनसि कमपि क्षोभविशेषं जनयन्ति यस्य च दुष्परिणामः प्रत्यक्षतोऽप्रत्यक्षतो वा मूल्याङ्कनेऽपि निपतति।

स्वच्छताया अर्थोऽयमस्ति यत् टङ्कितेषु पृष्ठेषु भिदाच्छिदे नाधिकं भवेताम्। मुखपृष्ठस्य स्वरूपेण तु सर्वथा निर्दोषेणैव भवितव्यम्। यत्र तत्र स्थानेऽधिके भिदाच्छिदारेखाभिः प्रबन्धस्य स्वरूपं विकृतं भवति, अनेन च शोधकर्तुर्योग्यतायां सावधानतायाञ्च प्रश्नचिह्नमङ्कितं जायते। अतः प्रबन्धस्य टङ्कनं केनापि कुशलेन टङ्कनविधिविदा जनेन कारयितव्यम्, वर्तनीप्रभृतीनां निश्चयश्च प्रथमत एव करणीयः येन टङ्कने प्रारम्भत एवाधिका अशुद्धयो च भवेयुरित्यवधेयमवश्यम्।

यथा किलारम्भे मया संकेतितं यत् शोधप्रबन्धाय कमनीयो रूपबन्धस्तथैवावश्यकः सार्थकश्च भवति यथा मनुष्यस्य व्यक्तित्वाय तस्य वेशभूषा। इत्थं रूपबन्धोऽयं तेनैव रूपेण ग्राह्य इति।

अनुसन्धानमालोचना च

लेखकः - डॉ॰ नगेन्द्रः
अनुवादकः - डॉ. हर्षनाथमिश्रः

अनुसन्धानस्य आलोचनायाश्च उभयोः केवलं जातिरेव न किन्तु उपजातिरपि एकैवास्ति। अतः उभयोरपि पर्याप्तं साम्यमस्ति। उभयोः पद्धतिः बाहुल्येन सामाना वर्तते–व्याख्याविश्लेषणं निर्णयश्च उभयत्र समाने स्तः। अनुसन्धाने यत्तथ्याख्यानं भवति तदेव आलोचनायां व्याख्याविश्लेषणे भवतः, उभयत्र विवेचनकार्यकारणसूत्रान्वेषणपरस्पर–सम्बन्धार्थव्यञ्जनेत्यादीनाम् उद्घाटनं समानरूपेण भवति। एवमेव पक्षविपक्षयोः सन्तुलनादीनाम् आधारेण क्रियमाणस्य निष्कर्षस्य निर्णयस्य च पद्धतिरपि उभयत्र प्रायः समानैव भवति। तच्च तथ्यविश्लेषणानन्तरं तत्त्वरूपेण निष्कर्षग्रहणसम्पादनं सर्वथावश्यकं भवति–तेन विना तथ्यविश्लेषणस्य कोप्यर्थ एव नावशिष्यते। अतः निष्कर्षनिर्णययोर्महत्वम् अनुसन्धानस्य आलोचनायाश्च उभयोः कृते समानरूपेण मान्यमस्ति, तेन विना विचारस्य प्रक्रिया एव पूर्णा न भवति। तथ्याधारः अनुसन्धानाय एकान्ततः अनिवार्यस्त्वस्त्येव किन्तु आलोचनायै अपि तस्यावश्यकताया निषेधो न कर्तुं शक्यते। यतः किल तथ्यानां पुष्टाधारं विना आलोचनायां विश्वासस्य दृढता नोद्भवति।

इत्थं समानतायां विद्यमानायामपि अनुसन्धानम् आलोचनायाः पर्यायो नास्ति। मनोविज्ञानेन पुष्टः संस्कृतव्याकरणस्यायं नियमोऽस्ति यत् कावपि द्वौ शब्दौ एकस्यार्थस्य द्योतनं न कुरुतः–तयोः किञ्चित्प्रकारको भेदोऽवश्यं भवति। अनुसन्धानशब्दे मूलधातुर्धा वर्तते। ततः पूर्वं समुपसर्गं योजयित्वा ल्युट्प्रत्ययेन सन्धानशब्दः निष्पद्यते, यस्यार्थो भवति लक्ष्यबन्धः,

दृष्टिलक्ष्यीकरणं, एवमेव आलोचनाशब्दस्य मूलधातुः 'लोचृ' वर्तते यस्यार्थोऽस्ति 'दर्शनम्' अस्यैव मूलधात्वर्थस्य आधारेण यथासमयम् अग्रे गत्वोभयोरर्थयो र्भेदः प्रादुर्भवति। एकस्य अर्थो भवति लक्ष्यं बध्वा तदनुवर्धनम्, द्वितीयस्य चार्थो भवति समन्ताद्भावेन पूर्णतः दर्शनं परीक्षणञ्च। अयमेव उभयोः मौलिकभेदयोराधारोऽस्ति। अनुसन्धाने अन्वेषणेऽधिकबलं दीयते, आलोचनायाञ्च निरीक्षणपरीक्षणयोः। यद्यपि इमे द्वे तत्त्वे अप्यन्योन्यं निरपेक्षे न स्तः अन्वेषणं विना निरीक्षणपरीक्षणे कृतकार्ये न भवितुमर्हतः तथैव निरीक्षणपरीक्षणयोरपि पूर्वक्रियारूपेण अन्वेषणस्य आवश्यकता प्रायः तिष्ठति, तथापि अनुसन्धानालोचनयोः क्षेत्रं पूर्णतः सहव्यापकं नास्ति-समनियतं नास्तीति अनुसन्धानस्य अनेकरूपाणि एतादृशानि सन्ति, यानि शुद्धालोचनाया अन्तर्गतानि न भवन्ति तथा आलोचनाया अपि कानिचिद्रूपाणि शुद्धानुसंधानानि सन्तीति स्वीकारे वस्तुतः आपत्तिर्भवितुमर्हति। उदाहरणाय जीवनचरित्रविषय-कानुसन्धानं पाठानुसन्धानं भाषावैज्ञानिकानुसन्धानम् इत्यादीनि रूपाणि गृह्यन्तां यानि आलोचनाक्षेत्रान्तर्गतानि न भवितुमर्हन्ति। अस्याभिप्रायोऽयं नास्ति यत्तेषु आलोचनाया अभावो भवति। अथवा एषां क्षेत्राणामनुसन्धाता आलोचनशक्त्या निर्णयक्षमतया च सम्पन्नो न भवतीति – वस्तुत एषा सर्वेषु क्षेत्रेषु निरीक्षणपरीक्षणनिष्कर्षग्रहणादीनि तावन्त्येव महत्वपूर्णानि भवन्ति यावन्ति अन्यत्र। परन्तु आलोचनायाः प्रयोगोऽत्रास्माभिः साहित्यविषय-कालोचनार्थे एव क्रियते, सामान्यार्थे अर्थात् सामान्यनिरीक्षणपरीक्षणार्थे नैव। इत्थमेव आलोचनायाः किञ्चिदेकरूपमप्यस्ति-यथा प्रभावाद्यालोचनाया विभिन्नाः प्रकाराः, ये किल अनुसन्धानस्य गरिम्णो निर्वहणं न कर्तुं शक्नुवन्ति। अतएव इदं स्पष्टमस्ति यत् अनुसन्धानस्य आलोचनायाश्च क्षेत्रेषु पूर्णतः सहव्याप्तिर्नास्तीति।

उपर्युक्तविवेचनस्य स्पष्टीकरणाय पारिभाषिकार्थे आलोचनायाः स्वरूपं स्पष्टतरं कर्तुमावश्यकमस्ति। मया स्मर्यते-एकदाऽस्माकं कस्मिन्नपि प्रश्नपत्रे एकः प्रश्न आसीत्–आलोचना विज्ञानमस्ति कला वा मया न स्मर्यते, तदानीं मया अस्य प्रश्नस्य किमुत्तरं दत्तम्। किन्तु अध मम मानसे

अस्योत्तरं स्पष्टमस्ति, आलोचना (अर्थात् साहित्यिकालोचना) कलायाः विज्ञानमस्ति। विशिष्टशब्दावल्याम् आलोचना न तु तस्मिन्नर्थे रसस्य साहित्यमस्ति यस्मिन्नर्थे कवितोपन्यासकथादयः सन्ति। किञ्च न तदर्थे ज्ञानस्य साहित्यमस्ति यस्मिन्नर्थे दर्शनशास्त्रं मनोविज्ञानशास्त्रं तर्कशास्त्र वा प्रयुज्यते। इदं तु सप्रामाणिकरूपेण रसात्मकसाहित्यस्य शास्त्रीयं वैज्ञानिकं वा अध्ययनमस्ति। विषयस्य प्रभावः तस्य विवेचने सर्वथा अनिवार्यो भवति–अर्थात् कस्यापि विषयस्य विवेचनं तस्य विचारपद्धतिश्च तदीयात्मभूततत्त्वानां प्रभावग्रहणं विना प्राणितुं न शक्नुति यतः किल, विषयेण सह तस्य लक्ष्यादयः तस्य विवेचनपद्धतिमपि अनिवार्यतः अनुशासितां कुर्वाणा भवन्ति। साहित्यस्य तत्त्वे भवतः अनुभूतिः कल्पना च, तस्य प्राणा भवन्ति रसः, अतः साहित्यस्य विवेचनपद्धतिः तस्याङ्गभूतानुभूतिः कल्पना च प्राणभूतरसप्रभावेण असम्पृक्ताः स्थातुं नार्हन्ति। अतएव तत्रापि कलातत्त्वस्य अर्थात् रसस्य, तदुपकरणानुभूतेः कल्पनाया इत्यादेरन्तर्भाव अनिवार्यतो भवत्येव। इत्थम् आलोचनायां कलातत्त्वम् अनिवार्यतो विद्यमानं तिष्ठति, तत्र आत्माभिव्यक्तिः यथाकथञ्चित् येन केन प्रकारेण अवश्यं विद्यमाना भवति। अनुसन्धानस्य विषयेऽयं प्रश्नः न कर्तुं शक्येत तत्कलास्ति शास्त्रं वा? तत् शास्त्रमस्तीति निश्चप्रचम्। कलायाः तत्कृते तावत्येवापेक्षा वर्तते यावती शास्त्रस्य कृते, यतो हि शास्त्रस्यापि स्वकीया एका कला भवति, एका शैली भवति या वाङ्मयस्य अन्येभ्यो रूपेभ्यः तस्य रूपविशेषं पृथक्करोति। अनुसन्धानस्य चतुर्थे उपनिबन्धे निर्दिष्टस्य उपयुक्तेति अथवा संतोषप्रदेति रूपाकारकपदस्य अभिप्राय इयानेवास्ति, इतोऽधिको नैव–उदाहरणाय शक्यते वक्तुं यत् निबन्धस्य ललिता गद्यशैली अनुसन्धानस्य कृते नोपयुक्ता भवेत् न वा संतोषप्रदा। निष्कर्षोऽयं यत् आत्माभिव्यक्तिः कलातत्त्वं वा साहित्यविषयकालोचनायाः अनिवार्यो गुणोऽस्ति किन्तु साहित्यविषयकानुसंधाने तस्य महत्त्वं गौणमेवावतिष्ठेत। इतो विपरीतं तथ्यान्वेषणं, तथ्यानां वस्तुपरकमाख्यानं, वैज्ञानिकप्रविधिः प्रक्रिया च अनुसन्धानस्य कृते महत्त्वपूर्णान्येव न भवन्ति किन्तु इमानि तस्य प्राणतत्त्वानि भवन्ति। कस्यापि प्रकारस्य–बहिरङ्गस्य अथवा अन्तरङ्गस्य तथ्यस्य सम्यगन्वेषणं विनाऽनुसंधानम्

एकमपि पदक्रमम् अग्रे कर्तुम् एधितुं वा न शक्नोति। अतएव एषां तत्त्वानामाख्याने अनुसन्धातुः दृष्टिरेकान्ततो वस्तुपरा भवेत् येन तथ्यमेव तस्य निर्देशनं कुर्यात् स तथ्यानां निर्देशनं न कुर्वीत्। यद्यत्यालोचनायै अपि निर्लिप्तयाः दृष्टेर्महती आवश्यकता अस्ति किन्त्वनुसंधानाय तु सा सर्वथाऽनिवार्यैव भवति। अनुसन्धानस्य मार्गः एकान्ततः तपश्चर्यायाः मार्गोऽस्ति तस्य कृते अधिकस्य कठोरस्य संयमस्य विधानमस्ति आलोचनायै यतः कठोरस्य बौद्धिकब्रह्मचर्यस्यावश्यकता कदाचिन्न भवति आत्मरसस्य यत्किञ्चित्संस्पर्शः तस्य कृते एकान्ततः वर्जितो नास्ति। इत्थमेव वैज्ञानिकप्रविधिः प्रक्रिया च अनुसन्धानाय सर्वथाऽनिवार्यौ स्तः सन्दर्भादेः पूर्वं विवरणम्, अनुक्रमणिका, परिशिष्टं, ग्रन्थसूची, पादटिप्पणीत्यादेर्व्यवस्था अस्मिन्नेव प्रविधौ अन्तर्गता भवन्ति, वस्तुतः अयं प्रविधिः आलोचनायै अपि अनुपयोगी नास्ति, किन्तु तत्रास्य तावदनिवार्यं महत्त्वं नास्ति। शुद्धाऽऽलोचनायाम् आलोच्यस्यात्मनः साक्षात्कारं प्रति लेखकस्य पाठकस्य चेयान् आग्रहो नावतिष्ठते येन एवंभूतस्य स्थूलतत्त्वविवरणस्योपेक्षां सः कर्तुं शक्नोति वस्तुतः तथाकृते तैः तस्यावधानभङ्गोऽपि सम्भाव्यते।

अनुसन्धानस्य आलोचनायाश्च प्रत्यक्षमुद्देश्यमपि एकं न भवति–अनुसन्धानस्य लक्ष्यं यथा किलास्माभिरधुनैव संसाधितं, ज्ञानवृद्धिरस्ति, किन्तु आलोचनायाः लक्ष्यं भवति मर्मावगतिः। यदनुसन्धानं ज्ञानवृद्धिं न करोति, ज्ञानवृद्धौ योगदानं न ददाति तद्विधानतोऽसफलमस्ति किन्त्वालोचनायै इयत्पर्याप्तं नास्ति–याऽऽलोचना काव्यात्मनः साक्षात्कारं कारयितुं न शक्नोति अर्थात् तस्य सारभूतस्य प्रभावस्य सम्प्रेषणं नैव कर्तुं शक्नोति कलाकारेण सह प्रमातुः तादात्म्यं स्थापयितुं न शक्नोति सा स्वकीयमौलिकोद्देश्यस्य पूर्तावसफलैव तिष्ठति। फलागमस्य प्रत्यक्षेण अनेनैव भेदेन हेतुना उभयत्र आरम्भेऽपि स्पष्टतः भेदो जायते। आलोचनायाः प्रथमो धर्मो भवति–प्रभावग्रहणम् अर्थात् आलोच्यं प्रति रसात्मकप्रतिक्रिया। अनुसन्धातुः कृते साऽऽवश्यकी नास्ति–प्रायः बाधिकाऽपि भवितुं शक्नोति। तत्प्रभावग्रहणं स्वकार्यारम्भं तथ्यसङ्कलनेन सम्पादयति यत्र तस्य दृष्ट्या निर्लेपया भवितव्यम्। अतः अनुसन्धानस्य आलोचनायाश्चारम्भे फलागमे च बाह्यभेदोऽवश्यं वर्तते।

मम मन्तव्यस्य सारांश इत्थमस्ति :-

साम्यम्-

१. साहित्यविषयकानुसन्धानं साहित्यविषयकालोचना च एकस्या एव विद्यायाः-साहित्यविद्यायाः-द्वावुपभेदौ स्तः।

२. उभयोः पद्धतिर्बाहुल्येन तुल्यास्ति। उभयोः प्रक्रियायां तथ्यानां सङ्कलनम्- त्यागः ग्रहणञ्च-व्याख्यानविश्लेषणं, निष्कर्षग्रहणञ्च प्रायेणोपयुज्यन्ते।

वैषम्यम्-

१. किन्तु अनुसंधानम् आलोचना च पर्यायवाचिनो शब्दौ न स्तः- धात्वर्थस्यानुरूपेणानुसंधाने अन्वेषणेऽधिकं बलं दीयते, आलोचनायां तु निरीक्षण-परीक्षणयोः।

२. अनुसंधानस्य अनेकानि रूपाणि एवंविधानि सन्ति यानि आलोचनायां नान्तर्भवन्ति तथैव आलोचनाया अपि कतिपयानि रूपाणि अनुसन्धानस्योपबन्धानां पूर्तिं न कर्तुमर्हन्ति।

३. आत्माभिव्यक्तिरथवा कलातत्त्वम् आलोचनाया अनिवार्यो गुणोऽस्ति। किन्त्वनुसन्धाने स बाधकोऽपि भवितुं शक्नोति।

४. वैज्ञानिकतटस्थतायाः तदनुवर्तिनो वैज्ञानिकप्रविधिप्रक्रिययोर्महत्व-मनुसंधानस्य कृतेऽनिवार्यं भवति। आलोचनायै तु तस्य महत्वं परिशिष्टरूप एव दृश्यते।

५. अनुसन्धानस्य प्रत्यक्षमुद्देश्यमस्ति ज्ञानवृद्धिः। किन्त्वालोचनायाः सिद्धिरस्ति मर्मणोऽवगतिरनुभूतिर्वा।

शोधस्य तुलनात्मकविधेः सोपानानि

लेखकः - डॉ. चक्रधर बिजल्वान

अनुवादकः - डॉ. के. अनन्तः

नवीनतथ्यानामुद्घाटनम् अथवा पूर्वत एव अवगतानां तथ्यानां नवीनप्रणाल्या प्रतिपादनमेव सामान्यतया अनुसन्धानस्य अर्थः अस्ति। पाण्डुलिपीनां सम्पादनम् तथा कोशग्रन्थसम्बद्धकार्याणि अपि प्रकारान्तरेण उपर्युक्तविधासु समाविष्टानि भवितुम् अर्हन्ति। शोधस्य विषयः उपाधिसापेक्षो वा भवेत् उपाधिनिरपेक्षो वा, तत्र एको निश्चितः क्रियाविधिरपेक्षितो भवति। कास्मिन्नपि विषयविशेषे शोधस्य कार्यं स्वतः स्फूर्तमपि भवितुमर्हति अन्यप्रेरितमपि। उभयथापि प्रायः शोधकर्त्तुः सामान्यात् विशेषं प्रति, ज्ञातात् अज्ञातं प्रति, समष्टितः व्यष्टिं प्रति, प्रसृतात् स्रोतं प्रति, अथवा अपेक्षाकृतसन्दिग्धात् अपेक्षाकृतनिश्चितं प्रति अभिमुखीभवनम् आवश्यकं भवति। केचित् विशिष्टशोधकर्त्तारः अत्र विषये व्यतिक्रमेणापि गन्तुं प्रभवन्ति। साहित्य-दर्शनादिसंस्कृतवाङ्मये शोधकार्ये प्रवृत्ता अनुसन्धातारः प्रायः पूर्वमार्गस्यैव अनुसरणं कुर्वन्ति। सभ्यमानवस्य अधिकानि कार्याणि प्रायः येन भावनाद्वयेन प्रेरितानि भवन्ति, तत्र प्रथमा भावना भवति- 'स्वीयसुन्दरसुखदास्तित्वनिर्माणस्य' द्वितीया च वर्तमान-भाविजनेषु स्वव्यक्तित्वबोधस्थापनस्य। निष्कामकर्मयोगेऽपि स्वस्य कृते न स्यात्; परम् अन्येषां कृते तु यत्किमपि उद्देश्यं भवत्येव। अतः अन्यगतिविधीनामिव अनुसन्धान-क्षेत्रेऽपि सर्वप्रथमं स्वशक्तेः सीम्नश्च निर्धारणम् आवश्यकम् अस्ति।

यावत् स्वतःस्फूर्तानाम् अनुसन्धित्सूनां प्रश्नो विद्यते तेषां कृते तु इदम् अनिवार्यं सुकरञ्चास्ति। परं विश्वविद्यालयेषु अनुसन्धानं कुर्वताम्

अधिकतरशोधकर्त्तृणां विषयाणां निर्धारणं मार्गनिर्देशकाः, विभागाध्यक्षाः शोधसमितयो वा कुर्वन्ति। एतादृशेषु सन्दर्भेषु निर्णायकानाम् इदम् उत्तरदायित्वं सञ्जायते यत् ते अनुसन्धित्सूनां निजरूचीनां मान्यतानाञ्च समवधारणं विधायैव विषयनिर्धारणं कुर्युः। अतः मम विचारानुसारं शोधकार्यस्य आरम्भः- अनुसन्धित्सूनां रुचेः, अध्ययनस्य, उद्देश्यस्य क्षमतायाश्च तुलनात्मकविश्लेषणानन्तरमेव भवेत्! अस्मिन्नपि कार्ये- अनुसन्धित्सवः स्वयं वा कुर्युः, शोधसमितयो वा, मार्गनिर्देशका वा- अनुसन्धित्सूनां रुचेरुद्देश्यस्य क्षमतायाश्च तुलनात्मकविश्लेषणमपरिहार्यं विद्यते।

अनुसन्धित्सूनामान्तरिकपात्रतायाः तुलनात्मकनिर्धारणानन्तरं यो विषयः अनुसन्धानाय चितो भवेत्, तस्य अध्ययनस्य निरूपणस्य च विधिः निश्चितः स्यात्! बहुवारं तु शोधप्रबन्धस्य शीर्षके एव तस्य विधेरुल्लेखो भवति। यथा- १- "गीताभाष्याणां तुलनात्मकमध्ययनम्"। २- "ब्रह्मसूत्र-शाङ्करभाष्यस्य आलोचनात्मकविश्लेषणम्"। ३- "रामायणस्य भाषावैज्ञानि-कविश्लेषणम्"। ४- "दूतकाव्यानाम् ऐतिहासिकपरम्परा" आदि। एतादृशेषु शीर्षकेषु तु इदं स्पष्टमेवास्ति यद् अनुसन्धात्रा तत्र प्रमुखरूपेण स एव विधिरङ्गीकरणीयोऽस्ति यस्योल्लेखः शीर्षके विहितो विद्यते। परम् प्रायशः शीर्षकाणि एतादृशानि भवन्ति, यत्र विधेरुल्लेखो न भवति। यथा- "संस्कृतसाहित्ये शब्दालङ्काराः", "वाक्यपदीये स्फोटविचारः" भारतीयप्रमाण-मीमांसायाम् उद्योतकरस्य योगदानम्", "भारतीयदर्शनेषु प्रत्यक्षप्रमाणविमर्शः" "नव्यन्यायस्य भाषिकप्रविधयः" आदि। एतादृशेषु विषयेषु प्रश्नोऽयं समुत्थितो भवति यदत्र निरूपणविधिः कीदृशः स्यात्? इति। तात्पर्यमिदं यत्-अनुसन्धित्सोः क्षमतानुसारं विषयनिर्धारणानन्तरम् अनुसन्धानकार्ये विधेः चयनम् एकं महत्त्वपूर्णं सोपानमस्ति एवं तस्य निर्धारणमपि तुलनापेक्षमस्ति।

"तुलनात्मक-विधिः, विवरणात्मकविधिः, विश्लेषणात्मकविधिः, आलोचनात्मकविधिः"- इत्याद्यनेकविधीनां शोधकार्ये प्रयोगः भवितुमर्हति। कतिपयसन्दर्भेषु एकविधेरपरविधिना सह सम्प्लवोऽपि भवति, एवं कुत्रचित्सन्दर्भेषु विधेः निर्धारणं परिचयोऽपि वा कठिनं भवितुमर्हति, परं

सामान्यतया प्रत्येकविधेः स्वकीयं रूपं, क्षेत्रं, समुपयोगश्च विद्यते। अत्र अहं केवलं तुलानात्मकविधेरेव प्रमुखरूपेण चर्चां कर्तुमिच्छामि।

"शास्त्रं, शाखा, देशः, कालः, सम्प्रदायः, भाषाशैली, कथ्यम्"- इत्यादीनि अनेकानि एतादृशानि तत्त्वानि सन्ति, येषु तुलनात्मकमनुसन्धानम् अनुसन्धानपरकतुलना वा आधारिता भवति। विषयभेदं मनसि निधाय तुलनायाः तत्त्वानि विभिन्नप्रकारेण निश्चितानि कर्तुं शक्यन्ते। एतेषां संख्या अपि आवश्यकतानुसारं न्यूना अधिका वा कर्त्तुं शक्यते। तुलनीयतथ्यानां रचनानां वा सर्वाङ्गसमत्वम् आवश्यकं नास्ति। उदाहरणार्थं- भारविविरचिते ''किरातार्जुनीये'' माघविरचिते ''शिशुपालवधे'' च विषयनिरूपणदृष्ट्या पर्याप्तसाम्यं विद्यते, परमुभयोः सर्वाङ्गसमता नास्ति। अतः यदि कोऽपि जनः अनयोर्महाकाव्ययोः तुलनात्मकं विश्लेषणं कर्तुमिच्छति तदा तेन सर्वप्रथमं तानि तथ्यानि परिचेयानि, यानि उभयत्र समानानि स्युः। सहैव उभयोः सम्यगध्ययनं विधाय तादृशान्यपि तथ्यानि परिचेयानि, यत्रोभयोरन्तरमस्ति। एतदतिरिक्तं सामान्यकाव्यशास्त्रीयतत्त्वाधारेणापि उभयोः विवेचनं करणीयम्। अनेन प्रकारेण कयोश्चिद्द्वयोः रचनयोस्तुलनाविधौ- ''सम्बन्धितशास्त्रतत्त्वानां, द्वयोः समानतयोपलब्धतत्त्वानां, द्वयोरसमान-तत्त्वानाञ्च'' तुलना तत्रत्योदाहरणप्रदर्शनपूर्वकं करणीया। केवलं तुलनैव अनुसन्धानाय पर्याप्ता न भवति, अतस्तयैव सह अनुसन्धित्सुना स्वमन्तव्यमपि तत्र प्रकाशनीयम्। अस्मिन् स्तरे आलोचना तुलनायाः पूरका जायते। तात्पर्यमिदं यदत्र आलोचनात्मक-तुलनात्मकपद्धत्योः सम्मिश्रणञ्जायते। परमनेनेदन्नावधारणीयं यत्-तुलना आलोचनां विना न भवितुमर्हति, आलोचनार्थं तुलना वा अनिवार्या भवतीति! एवमवश्यमस्ति यद्-आलोचनाया अनेकानि स्तराणि सन्ति, तेषु तुलनाऽपि एका अस्ति। एवमेव यत्र तुलनया सह इदमपि प्रकाशनम् अपेक्षितं स्याद् यत्-सम्बद्धपक्षयोः कः श्रेष्ठः अस्ति! इति। तत्र आलोचनां विना कार्यं नैव भवितुं शक्नोति। निष्कर्षोऽयमेवास्ति यद्- आलोचना तुलना च परस्परं विपरीते न स्तः, अपितु परस्परं पूरके एव स्तः। परमपेक्षितमपि तयोः साहचर्यं सर्वत्र अनिवार्यं नास्ति।

तुलनाया आधारः–

तुलनात्मकाध्ययनाय आधारभूतसामग्र्यां– "द्वयोः द्वाभ्यां वा अधिकानां ग्रन्थानां, विचाराणां, भावानां, सङ्कल्पनानां, लेखकानां" समावेशो भवति। अतः अनुसन्धित्सु नेदं सदैव ध्येयं यत् सः कस्य वस्तुनः तुलनां कुर्वन्नस्ति। निदर्शनार्थं यदि वयं कालिदासाश्वघोषयोस्तुलनात्मकमध्ययनं कुर्यास्म तदा तयोः समयस्य, विचाराणां ग्रन्थानां, सङ्कल्पनानाञ्च विचारः करणीयो भविष्यति, एवं यदि अलङ्कारविधानदृष्ट्या तयोः तुलनां कुर्यास्म, तदापि तयोर्ग्रन्थानां विचारः करणीय एव भविष्यति, परन्तु प्रथमप्रकारीयानुसन्धाने वयम् अनयोः कव्यकण्योः "व्यक्तित्वं" प्रामुख्येन ख्यापयिष्यामः, द्वितीये च तयोः "कृतित्वम्।" आङ्लभाषायामेकमाभाण-कमस्ति– "Style is the man" अर्थात् "वाग्व्यापार आचार एव मनुष्यः" एवम् अनेन प्रकारेण लेखकसम्बद्धतुलनाया आधारोऽपि प्रमुखरूपेण "व्यक्तित्वं" कृतित्वं वा भवति।

तुलनाः व्यक्तिनिष्ठा वस्तुनिष्ठा वा–

तुलनाया आधारः तथ्यपरकः भवति, किन्तु किं तथ्यं सङ्गतं, किञ्चासङ्गतम्? अस्य निर्णयकाले चयनकाले वा वैयक्तिकज्ञानस्य प्रवृत्तेश्च प्रभावो भवत्येव। बहुवारमनुसन्धातुः स्वकीयानां सामाजिकानां धार्मिकानां वा परम्पराणामपि तस्य रुचिनिर्धारणे सहयोगो भवति। कुत्रचित् पूर्वाग्रहोऽपि प्रभावी भवति। यथा वेदानां तिथ्यादिसम्बन्धे केषाञ्चिद् विदुषां मतानि तेषां स्वकीयपूर्वमान्यतासु आधारितानि भवन्ति।[१]

पश्चिमे इयं धारणा अस्ति यद्– ज्ञानस्य उद्गमस्त्रोतः "ग्रीसः" अस्ति अत एव न्यायशास्त्रादिषु सर्वेषु क्षेत्रेषु पाश्चात्यविदुषां प्रायः इदं मतमस्ति यद्–भारतीयैः ग्रीकविदुषामनुकरणं कृतमस्ति।

---

१. अखिलभारतीयप्राच्यविद्यासम्मेलने कुरुक्षेत्रे "प्रो. महेण्डले" महोदयेन एकः लेखः पठितः, यत्र तैर्निवेदितं यत्– "फादर स्टेलरः" वेदमन्त्राणां योऽर्थः इदानीं कुर्वन्नस्ति, सः पूर्वाग्रहग्रस्तः सहैव तथ्य विपरीतोऽप्यस्ति।

अस्मिन् अङ्गीकारे नास्ति कापि आपत्तिर्यत्- आधुनिकपरिप्रेक्ष्ये भारतीयवाङ्मयस्य स्वरूपावबोधाय पाश्चात्यमनीषिभिः महत्त्वपूर्णं योगदानं विहितमस्ति, परं कतिपयानां ऐतिहासिकतथ्यानां विश्लेषणे तैः ज्ञात्वा अज्ञात्वा वा त्रुटयो जाताः सन्ति। अज्ञाने त्रुटिः वस्तुनिष्ठा भवति, किन्तु ज्ञाने सन्देहे वा सति कस्यापि मतस्य प्रतिपादनं व्यक्तिनिष्ठं भवति।

केषुचित्सन्दर्भेषु इदमपि दृष्टमस्ति यद्– अनुसन्धाता तथ्याधारेण कस्मिँश्चित् परिणामे गन्तुं न प्रभवति, किन्तु स्वीयासफलतादोषापाकरणाय कस्मिँश्चिदेकस्मिन् पक्षे सः स्वमतं संस्थापयति। एतादृशे वक्रमार्गे सः वस्तुनिष्ठो न भवति, अपितु व्यक्तिनिष्ठः सञ्जायते।

एषा तु अनुसन्धातुः स्वरुचेर्वार्ता जाता, यां प्रति सः स्वकार्ये पदे-पदे सचेतो भवेत्। परन्तु संस्कृत-वाङ्मयस्य क्षेत्रे मूलग्रन्थैः सहैव तट्टीकाप्रटीकानामपि अत्यधिकं महत्त्वं विद्यते। अतः अनुसन्धात्रा तद्विश्लेषणावसरे इदमप्यवधारणीयमस्ति यत्- टीका 'वस्तुनिष्ठा' अस्ति "व्यक्तिनिष्ठा" वा। श्रीमद्भगवद्गीताया ब्रह्मसूत्रस्य च भाष्याणामुपरि कार्यं कुर्वतामनुसन्धातृणां समक्षं एषा समस्या उग्ररूपेण समायाति। अतः सम्बद्धसामग्र्याः "व्यक्तिनिष्ठताया वस्तुनिष्ठतायाश्च" आधारेण तुलनापि तुलनात्मकानुसन्धानप्रक्रियाया एकं महत्वपूर्णं सोपानमस्ति।

शास्त्रीयपृष्ठभूमीनां परिज्ञानम्–

तुलनात्मकानुसन्धाने सम्बन्धितपक्षाणां शास्त्रीयपृष्ठभूमीनां परिज्ञानमपि अपेक्षितं भवति। उदाहरणतया-न्याय-वाक्यविश्लेषणसन्दर्भे यदि वयं भारतीयनैयायिकानां पाश्चात्यतार्किकाणाञ्च सिद्धान्तानां तुलनां चिकीर्षामः, तर्हि अस्माकं कृते अनयोः शास्त्रीयपृष्ठभूमीनामपि ज्ञानम् अत्यावश्यकमस्ति। अस्मिन् सन्दर्भे केषाञ्चित् ध्येयस्वरूपाणां दिग्दर्शनं निम्नलिखितरूपेण कर्त्तुं शक्यते–

१. पाश्चात्यदर्शने "तर्कशास्त्रम्" (Logic) प्रमाणशास्त्रञ्च (Epistemology) भिन्न-भिन्नरूपेण अङ्गीकृतमस्ति, किन्तु भारतीयन्यायशास्त्रे

उभयोर्विवेचनं सहैव विहितमस्ति।

२. पाश्चात्यतर्कशास्त्रस्य उद्देश्यमस्ति–सत्यस्य प्राप्तिः, अर्थात् विचाराणां सङ्गतिः (Consintescy of thought) एव सत्यमस्ति। भारतीयन्याय-शास्त्रस्य उद्देश्यमस्ति यथार्थज्ञानस्य प्राप्तिः, अर्थात् व्यावहारिक–साफल्यम्।

३. पाश्चात्यतर्कशास्त्रे सत्यस्य रूपद्वयमस्ति– "आकारिकम्" (Formal or deductive) "वास्तविकञ्च" (Real - Material, or Inductive) "निगमनतर्कशास्त्रम्" आकारिकसत्यतायाः विश्लेषणं करोति, "आगमन–तर्कशास्त्रं" वास्तविक–सत्यतायाश्च। भारतीयन्यायशास्त्रे तर्कप्रकिया एकांशतया स्वीकृता विद्यते।

४. पाश्चात्यतर्कशास्त्रे ज्ञानम्– साक्षात् (Immediat) असाक्षात् (Mediat) भेदेन द्विधा विभक्तं विद्यते। तर्कशास्त्रम् साक्षाज्ज्ञानस्य अध्ययनं न करोति, भारतीयन्यायशास्त्रं करोति।

५. तर्कशास्त्रानुसारं ज्ञानस्य सत्यता पूर्वानुभूतीनाम् अनुकूलतायाम् आश्रिता अस्ति, किन्तु न्यायशास्त्रानुसारं ज्ञानस्य यथार्थता तस्य व्यावहारिक–सफलतायाम् आश्रिता अस्ति।

न्यायवाक्येष्वपि पाश्चात्ये भारतीये च तर्कशास्त्रे महदन्तरं विद्यते–

पाश्चात्यन्यायवाक्यम्–

१. सर्वे मनुष्या मरणशीलाः सन्ति। (Major Premise)

२. रामः मनुष्यः अस्ति। (Minor Premise)

३. रामः मरणशीलः अस्ति। (Conclusion)

भारतीयन्यायवाक्यम्–

१. रामः मरणशीलः अस्ति। "प्रतिज्ञा"

२. यतः सः मनुष्यः अस्ति। "हेतुः"

३. सर्वे मनुष्याः मरणशीलाः सन्ति।–यथा–सोहनः, मोहनः "दृष्टान्तः"

४. रामः अपि मनुष्यः अस्ति। "उपनयः"

५. रामोऽपि मरणशीलः अस्ति। "निगमनम्"

पाश्चात्य-भारतीय-न्यायवाक्यानाम् उपर्युक्तोदाहरणयोः अवयव-संख्याया अन्तरम् अस्ति। इदमुल्लेखनीयमस्ति यत्–मीमांसकानां वेदान्तिनाञ्च न्यायवाक्येष्वपि प्रथमन्त्रयोऽन्तिमत्रयो वा अवयवा भवन्ति. एवम् अनया दृष्ट्या ते अरस्तुसाम्यं भजन्ते। अन्तरमिदमस्ति यत्–

भारतीयव्यापकवाक्ये 'उदाहरणम्' अपि अस्ति। किन्तु पाश्चात्य-पूर्णव्यापकवाक्येन सह उदाहरणम् न भवति। तस्य सत्यतामङ्गी कृत्यैव निष्कर्षे गन्तव्यं भवति। भारतीयानुमाने सर्वप्रथमं पक्षस्य सम्बन्धः साध्येन सह स्थाप्यते ततः तत्र हेतुः प्रदर्श्यते तदनन्तरम् उदाहरणद्वारा इदं विज्ञाप्यते यत् साध्येन सह हेतोः अविच्छेद्यसम्बन्धः अस्ति। अनेन प्रकारेण इमानि त्रीणि वाक्यानि तान्येव सन्ति, यानि पाश्चात्यतर्कवाक्ये विद्यन्ते, किन्तु क्रमे भिन्नता अस्ति।

मूलग्रन्थस्य ग्रन्थानां वा प्रतिपादनप्रणालिपरिसीमनम्–

संस्कृतस्य केषुचित् विशिष्टग्रन्थेषु विषयप्रतिपादनाय एकाधिक-प्रणाल्यः स्वीकृताः सन्ति। यथा– "उपनिषत्सु"। इदानीं प्रश्नः समुदेति यत्– तेषु तुलनात्मकानुसन्धानसमये उपनिषत्स्वेव उपलब्धा का पद्धतिः आधारीकृता स्यात्? मन्यताम् यत्– "उपनिषत्सु आत्मस्वरूपप्रतिपादनम्"– इति विषये कश्चित् शोधकार्यं कुर्वन्नस्ति, उपनिषदध्ययनानन्तरं स विजानाति यत्– कुत्रचित् आत्मविश्लेषणं "सूत्रप्रणाल्या" कृतमस्ति, कुत्रचित् "प्रहेलिकाप्रणाल्या", कुत्रचिच्च "प्रतीपगमनप्रणाल्या"– इति। यदि शोधकर्त्ता स्वशोधप्रबन्धे आत्मस्वरूपविश्लेषणातिरिक्तम् उपनिषत्सु तत्प्रतिपादन-विधीनामुपर्यपि विचारं कर्त्तुम् इच्छति, तदा सः सर्वप्रथमं तेषां विधीनां तालिकानिर्माणं कुर्यात्।

इत्थं शोधस्य तुलनात्मकविधेः अनेकानि सोपानानि स्वरूपाणि च सन्ति। एतेषां पूर्णज्ञानेन विवेकपूर्णोपयोगेनैव च शोधप्रबन्धः पूर्णतां यास्यति।

अन्यपद्धतीनामपेक्षया एषा पद्धतिः अस्मात्कारणादपि ग्राह्या अपेक्षाकृतसरला च अस्ति यत्– अस्याः ग्रहणं कुर्वन् सामग्रीचयने स्थूलतथ्यानामुपर्यपि निर्भरः भवितुम् अर्हति। एतदतिरिक्तम् आनुषङ्गिकसाहित्याध्ययनापेक्षायामपि तस्य नितान्तानिवार्यता न भवति। एषा एतादृशेषु आकलनेषु आधारिता भवति, येषां समीक्षणमपि सरलतया भवितुमर्हति। इदमेव संक्षेपेण शोधस्य तुलनात्मकविधेः स्वरूपं विज्ञेयम्।।

पाठानुसंधानम्

डॉ० माताप्रसादगुप्तः

१. उद्देश्यं विस्तार आवश्यकता च

पाठानुसंधानस्योद्देश्यं कस्या अपि ईदृश्या रचनायाः पाठनिर्धारणं भवति, यस्यास्तल्लेखककेन प्रमाणीकृतः पाठो नोपलभ्यते। यासां रचनानामेतादृशं मुद्रितं संस्करणमुपलभ्यते, यद्धि लेखकस्य तत्त्वावधाने प्रकाशितमस्ति, अथवा यासां प्राचीनरचनानां लेखकेन हस्तलिखिता अथवा तद्द्वारा संशोधिताः प्रतयः प्रतिलिपयो वा प्राप्यन्ते, तासां कृते पाठानुसंधानस्यावश्यकता न भवति। अतः प्राय एतादृश्या एव रचनायाः सम्बन्धे एव पाठानुसंधानस्यावश्यकता भवति या मुद्रणयुगात् पूर्ववर्तिनी भवेत्। हिन्दीभाषायाः प्राचीनसाहित्यविषयेऽस्य विज्ञानस्योपयोगित्वं प्रकटं वर्तते। अस्माकं समस्तं प्राचीनं साहित्यं हस्तलिखितप्रतिषूपलब्धमस्ति, यासु विरलैवेदृशी वर्तते या स्वयं लेखकस्य हस्तेन लिखिताऽस्ति अथवा तेन संशोधिता प्रमाणीकृता च भवेत्, तत्रापि यासां रचनानामेकाधिकाः प्रतयः प्राप्यन्ते, तासां पाठोऽपि विभिन्नासु प्रतिषु परस्परं केनापि न केनापि परिमाणेन भिन्नो दृश्यते, एतस्यां स्थितौ निर्णयोऽयमावश्यको भवति–विभिन्नेषु प्राप्तेषु पाठेषु कतमोऽधिकृतः पाठोऽस्ति इति। पाठनिर्धारणस्य कार्यं यद्यपि चिरन्तनं नितरां प्राक्कालाज्जायमानत्वात्, तथापि वैज्ञानिकपद्धत्या विधीयमानस्य पाठनिर्धारणस्य (पाठानुसंधानस्य) इतिहासो नातिप्राचीनः। हिन्दीभाषायान्तु सम्प्रत्येवास्यारम्भः सञ्जातः। तथाचात्र समस्तस्य प्राचीनसाहित्यस्य सर्वविधाध्ययनविवेचनायास्यां पद्धत्यां कार्यभवनस्यावश्यकताऽस्ति, तद्विवरणमत्रानावश्यकमेवास्ति।

२. विषयविभाजनम्

एतत्प्रायश्चतुर्षु विभागेषु विभज्यते–१. सामग्रीसंकलनम् (Hueristics) २. पाठचयनम् (Recension) ३. पाठसंशोधनम् (Emendation) ४. तथोच्चतराऽऽलोचना (Higher Criticism) इति। तत्र सामग्रीसंकलनं नाम समस्तपाठसामग्रीणामुपयोगाय एकत्रितीकरणम्। रचनाया विभिन्नानां प्राप्तानां पाठानां परीक्षणं विधाय तेष्वन्यतमस्याधिकृतस्य पाठस्य ग्रहणं पाठचयनमुच्यते। प्राप्तेषु पाठेष्वन्यतमोऽपि यदाधिकृतप्रमाणितो न भवति तदेदृशस्य पाठस्य कल्पनम् योऽधिकृतो भवितुमर्हति, पाठसंशोधनमाख्यायते। रचनाया मूलाधाराणां गवेषणा तथा लेखकेन कथंकारं तेषामुपयोगः कृत इतीदृशं विवेचनमुच्चतरालोचना कथ्यते। किन्तु अन्तिमः पाठानुसंधानस्य वस्तुतस्तावाननिवार्यावयवो नास्ति, यावन्तोऽन्ये त्रयः, स तत्र सहायकोऽपि भवितुं शक्नोति।

३. सामग्रीणां प्रकारस्तासां सापेक्षिकोपयोगित्वम्

सामग्र्याः प्रकारद्वयं मन्यते–मुख्यं सहायकञ्च। या सामग्री कृतेः पाठं, यथा कृतौ वर्तते, तथैव प्रस्तौति सा मुख्या सामग्री उच्यते। अस्या अन्तर्गततथा कृतेः प्रतय आगच्छन्ति। इमा प्रतयोऽनेकधा भवन्ति। तासु याः प्रतयः लेखकस्य हस्तलिखिताः, अथवा केनाप्यन्येन लिखिता अपि लेखकेन संशोधिताः, अथवा प्रमाणीकृता भवन्ति, ताः स्वहस्तलेख इत्युच्यन्ते। एतादृशीनां प्रतीनामुपलब्धौ जातायां पाठानुसंधानस्यापेक्षा नैवावशिष्यत इति स्पष्टमेव। इतोऽनन्तरं सर्वाधिकमहत्त्ववत्यः प्रतयस्ता भवन्ति, या एतासां प्रतिलिपयो भवन्ति, प्रथमप्रतिलिपयश्च वर्तन्ते। ततः प्रतिलिपीनां प्रतिलिपयो भवन्ति या भिन्नमहत्त्ववत्यो भवन्ति। सामान्यतो याः प्रतयो यावत्प्राचीनाः, तास्तावदधिकमहत्त्ववत्यो भवन्ति यतो हि ता मूलप्रतिमधिकमनुहरन्त इति कृत्वा, किन्तु एतत्कथनं न सार्वत्रिकम्। एतदपि संभाव्यते एका बहुकालपश्चात्कृता प्रतिलिपिर्मूलप्रतिलिपेस्तस्य प्रथमप्रतिलिपेर्वा प्रतिलिपिः संभवति, अवशिष्टा उपलब्धप्रतयो यास्ततः पूर्वतिथिलिखिताः भवन्त्योऽपि मूलादतितरां दविष्टा भवितुमर्हन्ति, कतिपयपुरुषानन्तरकृतत्वात्। अतोऽत्र

विषये प्रथममवधेयं यत् कापि प्रतिर्मूलप्रते: कियत् वंशानुगत्पुरुषकाल-कृताऽस्तीति। एतदवश्यमस्ति एकस्या एव प्रतिलिपिपरम्परायाः प्रतिषु यः पूर्वापरः कमो भवेत् तदनुसारेण तस्याः परम्परायाः प्रतीनामपि महत्वं भवेत्। या पाठसामग्री रचनाप्रतिरूपेण न प्राप्ता भवति, तस्य टीका-सन्दर्भ-ग्रन्थानुवाद-विवेचनोद्धरणादिरूपतया प्राप्ता भवति, सा सहायकसामग्री प्रोच्यते। इयं सामग्री तदैव महत्त्वविशेषस्य प्रमाणिता भवति, यदा हि अनया कस्या अपि ईदृश्याः शाखायाः पाठः प्राप्यते, यस्या मुख्यसामग्री अप्राप्याऽस्ति अथवा यदा किल मुख्या सामग्री खण्डिताऽस्ति, तेष्वंशेषु इयं सामग्री उपलभ्यते।

४. सामग्र्या बहिरङ्गपरीक्षा

प्रत्येकपाठसामग्र्याः परीक्षाऽवश्यकी भवति। इयं च परीक्षा द्विप्रकारिका—बहिरङ्गाऽन्तरङ्गा च। कस्या अपि पाठसामग्र्याः सम्बन्धे इदं द्रष्टव्यं यत् तस्य लिपिकाल-लिपिकारलिपिप्रयोजनादिसम्बन्धे तत्र यत् किमपि कथितं लिखितम्वाऽस्ति, तत् कियद् विश्वसनीयमस्ति। अथवा यदि तत्रैवं भूतः कोऽप्युल्लेखो नास्ति तर्ह्यपि तत्सम्बन्धे कापि प्रसिद्धिरस्ति चेत्तत्र कियती सत्यताऽस्ति, सा च केन प्रमाणेन सिद्ध्यति, कियद्या-वन्मान्याऽस्ति इयं प्रतेर्बहिरङ्गपरीक्षा मन्यते। प्रायः प्रतीनामन्ते एवंभूतम् उल्लेखः प्राप्यते यो हि पुष्पिकोल्लेख उच्यते।

५. सामग्र्या अन्तरङ्गपरीक्षा

पाठसामग्र्याः पाठस्य सहायतया इदं परीक्षितव्यम्—तदीय-पुष्पिकायां य उल्लेख आयाति अथवा तद्विषये याः प्रसिद्धयः सन्ति ताः कियतांऽशेन सत्याः सन्ति ईदृशी तदीयान्तरङ्गपरीक्षा कथ्यते।


६. पाठविकृतयः तासां प्रकारश्च

प्राचीनरचनानां पाठाम् अस्माभिः प्रतिलिपिद्वारेण प्राप्यन्ते तथा च सर्वेषु प्रतिलिपिकारेषु न तथा पूर्णा साभिनिवेशकर्तव्यनिष्ठा भवति, न वा पूर्णा योग्यता, अतः प्रतिलिपिपरम्परायां कृतेः पाठ उत्तरोत्तरमधिकाधिकं

विकृतो भवन् परिवीक्ष्यते। इमा विकृतयोऽनेकप्रकारा भवन्ति किन्तु ता मुख्यतो वर्गद्वये विभक्तुं शक्यन्ते—अभीष्टा अनभीष्टाश्च। अभीष्टास्ता विकृतयो भवन्ति याः प्रतिलिपिकारेण रचनायाः पाठे जानतावगच्छता चोपन्यस्यन्ते—यथोदाहरणाय दृश्यताम्—रचनायाः पाठेषु तान् अधिकपूर्णान् संगतान् काव्योचितान् अथवा शुद्धान् सम्पादयितुं यानि परिवर्तनानि प्रतिलिपिकारेण क्रियन्ते तानि सर्वाणि एतस्मिन्नेव वर्गेऽन्तर्भवन्ति। इमे प्रक्षेपा इत्युच्यन्ते। एवमेव पाठेषु या विकृतयः प्रतिलिपिकर्तृणामयोग्यतया अनवधानतया अथवाऽन्यैः कारणैर्विनेच्छामायान्ति ता अनभीष्टा विकृतय उच्यन्ते। उदाहरणाय तानि स्थलानि दृश्यन्ताम् यत्र पत्राणि, पङ्क्तीः, मात्रादीनि विलिखनरहितानि जायन्ते, तेषां क्रमे स्थाने च व्यत्यासः, स्मृतिभ्रमेण एकस्य शब्दस्य चरणस्य च स्थाने इतरस्योल्लेखभवनम्, स्वज्ञानाय आदर्शप्रतेरंशे तत्स्वामिना लिखितानां टिप्पणीनां मूले समावेशनम् इत्यादि।

७. पाठसम्बन्धास्तेषां प्रकाराश्च

कस्या अपि रचनाया विभिन्नाः प्रतयो मूलप्रत्या मिथो वा येन प्रकारेण सम्बद्धाः तेषां परिज्ञानमन्वेषणं च पाठानुसंधानस्य सर्वप्रमुखं कार्यमस्ति। प्राचीनरीत्या कृते पाठालोचने आधुनिकपद्धत्या विहिते च तस्मिन् यन्महत् पार्थक्यमस्ति तदिदमेवास्ति यत् पाठानुसंधानकर्ता विभिन्नानां प्राप्तप्रतीनां मध्ये सम्बन्धनिर्धारणस्य प्रयासं कृत्वा रचनायाः पाठपरम्पराया इतिहासं पुनर्निर्मितं करोति तथा च एतद्द्वारा रचनायाः प्राचीनतमरूपं यावज् ज्ञातुं अनुसर्तुं च प्रयतते। अयं सम्बन्धो द्विप्रकारको भवति—मूलो गौणश्च। रचनाया मूलरूपस्य यानि तत्त्वानि विभिन्नासु प्रतिषु सुरक्षितानि तिष्ठन्ति तेषामाधारेण तदीयो मूलसम्बन्धः स्थापितो भवति, प्रतिलिपिक्रियायां तदीयपाठे यानि तत्त्वविकृतीनां रूपाणि क्रमश उपस्थितानि जायन्ते, तेषामाधारेण प्रतीनां गौणः सम्बन्धः स्थापितो भवन्ति। एतत्कथ्यमेकेन रेखाचित्रेण एवमुदाहर्तुं शक्यते—



कल्पना क्रियताम्–मूलपाठः 'अः' आसीत्। ततस्तिस्त्र प्रथमाः प्रतिलिपयो भवन्ति स्म, एकत्र काश्चिद् विकृतय आगता या 'क' इति वक्तुं शक्यते, एवमेवान्यत्र द्वितीये 'ख' विकृतयः तृतीये 'ग' विकृतय आगताः आधुनेमा स्तिस्त्रः प्रतयः केवलं मूलसम्बन्धेन सम्बन्धिताः सन्ति यतो हि तिसृषु यानि तत्त्वानि समानरूपेण प्राप्तानि भवन्ति तानि मूलस्य 'अ' इत्यस्य सन्ति।

यतः, यानि विकृततत्त्वानि गौणतत्त्वानि वा प्राप्तानि भवन्ति तानि त्रीण्यपि स्वस्य तथा पृथक् पृथक् 'क' 'ख' 'ग' इत्यस्य सन्ति। अधुना कल्प्यताम् अ–क इत्यस्य अ–ख इत्यस्य च द्वे द्वे प्रतिलिपिकृते अभूताम् तथा च एभ्यः प्रतिलिपिकृतेभ्यः ग्रन्थेभ्यः नवीन विकृततत्त्वानि आगतानि। अ–क इति प्रतिलिपौ 'च' इति विकृतय आगताः अन्यत्र द्वितीये 'च' 'छ' इति तथाप्येषु विकृतेः कानिचित्तत्त्वानि समानरूपेण मिलन्ति तानि च सन्ति 'क' इति। अत इमाः प्रतयः मूलस्य 'अ' इत्यस्य

शेषांशद्वारेण तथा 'अ–क' इति तथा परस्परम् 'अ–क' इति विकृतितत्त्वैः सम्बद्धाः सन्ति। एवमेव रेखाचित्रस्य अन्यस्य विषयेऽपि ज्ञातुं शक्यते।

८. सम्बन्धनिर्धारणप्रणाली

विभिन्नप्रतिषु प्राप्ताया रचनाया मूलगौणतत्त्वान्यधिकृत्य यदि तेषामुपर्युक्तप्रकारेण मूलगौणसम्बन्धस्थापनं कर्तुं शक्येत तर्हि मूलपाठानुसृतिः कर्तुं शक्येत तथा च तथैव निश्चयात्मकतया मूलस्यानुसरणं सम्भवति यथैवोपर्युक्तसम्बन्ध-निर्धारणम्। किन्तु कार्यमिदं न सुगमम्। इदं कथं सम्पन्नं विधेयम् इति पूर्वोक्तोदाहरणमाश्रित्यैवं वक्तुं शक्यते।

कल्प्यताम्–उपर्युक्तरेखाचित्रस्य प्रतिषु भवता केवलं प्रथमातः सप्तमाः प्रतयः प्राप्ताः। पाठविश्लेषणकाले भवता द्रक्ष्यते यत् यद्यपि प्रथमायां विकृतयः सन्ति किन्तु ताः कस्यामप्यन्यस्यां न मिलन्ति, अतो भवता तस्यै एकं स्वतन्त्रं स्थानं दातव्यं भवेत् ततश्च भवता द्रक्ष्यते यत् द्वितीयायां तृतीयायाञ्च विकृतयः सन्ति या अन्यत्र न प्राप्यन्ते किन्तु तासु कतिचिदुभयत्र प्राप्यन्ते। अत इदं मन्तव्यं भवेत् यत् ता एकस्या; स्वतन्त्रशाखायाः सन्ति तथा क्वापि न क्वापि एकस्मात् स्वतन्त्रात् सामान्यादादर्शात् अर्थात् पूर्वजात् निर्गताः सन्ति याश्च मूलस्य कस्यामपि निम्नश्रेण्यामायान्ति स्म तथा च तत्र 'अ–क' तत्त्वे स्थिते स्याताम् ये (२) तया (३) संख्यकाभ्यां तत एव प्राप्ते अभूताम्। अधुना भवान् द्रक्ष्यति यत् (६) तथा (७) संख्यकयोर्विकृतेरनेकतत्त्वानि ईदृशानि सन्ति यान्युभयत्र समानरूपेण प्राप्तानि भवन्ति। अतएव भवान् स्वीकरिष्यति यत् इमाः प्रतयः कस्मादपि ईदृशात् सामान्यादादर्शात् पूर्वजाद्वाजाताः सन्ति या मूलान्निम्नस्य संभवाः। यदि भवान् (५) संख्यकया अनयोरुभयोस्तारतम्य-पर्यवेक्षणं करिष्यति तर्हि द्रक्ष्यति यत् यद्यपि (५) संख्यकेन सह तासां तावद्विकृतिसाम्यं नास्ति यावत्परस्परमस्ति तथापि वर्ततेऽवश्यम्, अतः भवान् मंस्यते यत् (५) संख्यायुक्ताऽपि प्रतिः तस्यैवादर्शस्य पूर्वजस्य वा सन्ततिर्भवेदिति यस्या (६) तथा (७) इति आदर्शा पूर्वजा वा प्रतिरस्ति। इतोऽग्रे गत्वा भवान् पश्येत् यत् (४) मध्येऽपि एतादृशानि

कानिचिद्विकृततत्त्वानि मिलन्ति यानि (५) (६) (७) मध्ये समानरूपेण दृश्यते तर्हि भवान् मंस्यते यत् (४) संख्यागताऽपि प्रतिस्तस्यैवादर्शस्य पूर्वजस्य वा सन्ततिरस्ति यः (५) (६) (७) इत्येषां सामान्यादर्शः पूर्वजश्चाभवत् इत्थं भवान् प्राप्तानां सप्तानां प्रतीनां सम्बन्धनिर्धारणं कर्तुं शक्ष्यति।

९. पाठानुसंगतेः प्रकाराः

प्रत्ययेकेन पाठेन निर्धारितेन द्विविधानुसंगतिनिकषेण परीक्षितेन निर्दोषेण भवितव्यम्–ते अनुसंगती स्तः बाह्या अन्तर्गता च। बाह्यानुगतेः सम्बन्धो रचनायाः सम्पादनेन पाठसामग्र्या वा भवति अन्तर्गतानुसंगति-सम्बन्धश्च रचनाप्रकृत्या तदीयाकारप्रकारेण च भवति। रचनायाः स एव पाठो ग्राह्यो भवितुमर्हति यस्तस्य पाठसामग्र्या प्रस्तावितः रचनायाः स्वप्रकृत्यानुमोदितश्च भवेत्। मन्यताम्–यदीदृशः पाठो ग्राह्यीक्रियते यः पाठसामग्र्या मिलति किन्त्वर्थहीनोऽस्ति अथवा रचयितुः प्रमाणितविचारैः सिद्धान्तेन च प्रतिकूलायते, तर्हि एतादृशः पाठः ग्राह्यो न भवितुमर्हति। एवमेव कल्पना क्रियताम्कोऽपीदृशः पाठः क्वापि स्थले दत्तोऽस्ति यो लेखकस्य विचारधारयाऽभिव्यक्तिप्रणाल्यादिदृष्ट्या संगतः प्रतीयते किन्तु पाठसामग्र्यां न प्राप्यते तथा प्राप्तः पाठः निश्चप्रचतया कथमपि तस्य विकृतिर्मन्तुं शक्यते एतादृश्यां स्थितौ अयमन्यथा पाठोऽपि ग्राह्यो न भवितुं शक्नोति।

१०. पाठचयनम्

प्राप्तेभ्यो विभिन्नपाठेभ्यः सम्भवमूलपाठस्य चयनविधिः पाठचयनमित्युच्यते। प्रतीनां पाठसम्बन्धनिर्धारणानन्तरमनुसंगतीनां साहाय्येन पाठचयने पर्याप्तं सौगम्यमायाति निरापत्तिश्च। कल्पना क्रियताम्–कस्या अपि रचनायाः पाठस्यानेकाः शाखा निर्धारिता अभूवन्–अर्थात् तस्याः कतिपये एतादृशः पाठाः प्राप्ता अभूवन् ये किल मूलसम्बन्धेनैव सम्बन्धिताः सन्ति, गौणेन सम्बन्धेन अथवा विकृतिसम्बन्धेन सम्बन्धिता न सन्ति।

अस्यां दशायां यानि तत्त्वानि कस्मिन्नपि शाखाद्वये समानरूपेण प्राप्तानि भविष्यन्ति, तानि मूलस्य भविष्यन्ति। मन्यताम्—यदि द्वावीदृशौ पाठौ स्तः प्राप्तौ यौ शाखाद्वये ततोऽधिके वा शाखात्रयादौ प्राप्तौ भवतः तर्हि इदं स्वीकर्तव्यं भवेद् यत्सम्बन्धनिर्धारणं न यथायथं संजातम् अथवा यदि पाठद्वयं द्विविधाऽप्यनुसंगत्या समर्थितमस्ति, तौ रचनाया लेखककृतौ द्वयोरग्रिमप्राथमिकयोः पाठयोः प्रस्तुतीकृतीस्तः। अस्य पश्चाद्वर्तितथ्यस्य विश्लेषणं पाठानुसंधानस्य नितरां दुर्गमो विषयोऽस्ति। अत्र तदीयप्रणालीनां विवेचनं संभवं नास्ति। अतः कल्पना कर्तव्या यत् पाठसम्बन्धनिर्धारणानन्तरं पाठानां शाखाद्वयमेव मिलति, तर्हि यत्रोभयोरभेदो भविष्यति तत्र तूक्ताभिन्नांशौ मूलस्य मन्तव्यौ किन्तु यत्र पाठभेदोऽस्ति, तत्र काठिन्यं भविष्यति। यदि द्वयोः पाठयोरन्यतरो नूनमेव विकृतः प्रमाणितो भवेत् द्वितीयचाविकृतः तदा अविकृतो ग्रहणीयो भविष्यति, यदि चोभौ पाठौ समानरूपेण अविकृतौ प्रतिभातस्तदा द्वयोः शाख्योर्याधिकविश्वसनीया तस्याः पाठो ग्राह्यो भविष्यति। परन्तु एवं पाठभेदानां बाहुल्ये पाठद्वयमविकृतं प्रतीयते चेदिदं निश्चेतव्यं भवेद् यत् पाठद्वयं लेखकप्रकाशितरचनायाः पूर्वपश्चादवर्तिनौ पाठौ तु न स्तः किमु इति।

११. पाठसंशोधनम्

सामान्यतोऽधिकांशे च पाठचयनेन रचनायाः सन्तोषजनकं मूलं प्राचीनतमश्च पाठ उपलब्धे भवतः किन्तु कदापि कदापि एतादृशी स्थितिरायाति यत् प्राप्तेषु पाठेषु अन्यतमोऽपि अनुसंगतिद्वयेन समर्थितो न भवति, तथासति ईदृशपाठस्य कल्पना करणीया भवति यो हि विकृतोभूत्वा वर्तमानपाठे परिणतः अथवा तेषु कस्यापि तादृशभवनस्य संभावना भवेत्, यश्च रचनाया आन्तरिकप्रकृत्या सर्वथाऽनुमोदितो भवेत्। एवंभूतपाठकल्पना पाठसंशोधनमित्युच्यते। पाठसंशोधनमेकमहोत्तरदायित्वपूर्णं कार्यमस्ति तथा च तस्य शरणे तदैव गन्तव्यं यदा पाठचयनेन कथमपि ईदृशः पाठो न प्राप्यते यो ह्यन्तरिकानुसंगत्या युक्तो भवेत्। एतस्मै कार्याय पाठनुसंधानकर्त्रा रचयितुः समस्तानां रचनानामेव न, किन्तु तदीयकाव्यप्रणालीनां, तद्युगस्य

तदीयविचारधाराया अन्यरचनामपि सम्यगध्ययनं कर्तव्यम्, ययोर्युगयोर्ययोश्च क्षेत्रयोर्विवेच्यरचनायाः प्रचारोऽस्ति स्म, तत्र क्षेत्रेषु तस्य तत्क्षेत्राणां भाषाश्च कियत्परिवर्तनमधिगताः तस्य कृते एषामपि विषयाणां ज्ञानमपेक्षितमस्ति। रचनाया मूलाधारणां लेखकद्वारा तदीयोपयोगप्रकारादेरध्ययनमपि यदुच्चतरालोचनान्तर्गततया संमतमस्ति अत्र कार्यसहायकं भवितुमर्हति।

१२. परिणामसत्यता

पाठानुसंधानस्यान्ततो लक्ष्यसाध्यं सत्यानुसन्धानमेवाऽस्ति अतएवास्य परिणामः प्रत्येकानुसंधानस्येव सत्योपलब्धिरपि भवितुमर्हति। यावत्या निष्ठया, योग्यतया यावतानुभवेन च सह निर्धारितानां विधीनामनुसरणं कुर्वता पाठानुसंधानकार्यं सम्पादितं स्यात्, आवश्यकी पाठसामग्री तावत्येव पूर्णतयोपलब्धा स्यात्, परिणामे च तावत्येवाधिकसत्यताया आशा कर्तुं शक्येत। तथापि एतत्तु निश्चितमेव यत् प्रत्येकमनुसन्धानमस्मान् सत्यान्वेषणाय प्रेरयति सत्यस्थापनदिशि वर्धयति, पाठानुसंधानसम्बन्धेऽपि एतत् प्रमाणितमेवावर्तत इति।

संस्कृतविषयकशोधस्य प्रगतेः सिंहावलोकनम्

लेखकः - डॉ. मण्डनमिश्रः

अनुवादकः - डॉ. सतीशः के. एस.

संस्कृतप्रगतेः पक्षद्वयमस्ति –(क) संस्कृतसाहित्यम् (ख) संस्कृत भाषा च।

इदं तु सर्वविदितमेवास्ति यत् संस्कृतसाहित्यं विश्वस्य यस्यां कस्याञ्चिदपि भाषायां विद्यमानसाहित्यापेक्षया महद्व्यापकमस्ति। किन्तु इदमपि तथ्यमेव यदाधुनिकभाषासु साहित्यसृजनं यावत् प्रवर्तमानमस्ति तावत् संस्कृते न दरीदृश्यते।

आधुनिकभाषामाध्यमेन संस्कृतम्

संस्कृतं प्रति अध्येतॄणां रुचिविशेषे, अध्येतृसङ्ख्यायां वा ह्रासो न जातः, किन्तु साहित्यान्तररचयितॄणामध्येतॄणाञ्च यादृशी वृद्धिर्जाता तादृशी संस्कृते नाभूत्। अस्य प्रमुखं कारणमिदं प्रतीयते यदाधुनिकभाषाणां सम्बन्धः व्यवहारेण साकमप्यस्ति, किन्तु संस्कृतस्य सम्बन्धः प्रमुखरूपेण शिक्षया साकमेवास्ति। किञ्चाधुनिकभाषाणामावश्यकतापूर्त्यै तत्तद्भाषामाध्यमेनैव संस्कृतसम्बद्धविषयानधिकृत्य लेखनं प्रवर्तते। तत्परिणामतः इदानीं हिन्दी-आङ्ग्लप्रभृतिभाषाणां माध्यमेन संस्कृतविषये यल्लेखनकार्यं प्रचलितमस्ति तन्मूलतः संस्कृते सम्पन्नलेखनपरिमाणापेक्षया बह्वधिकमस्ति।

शिक्षणे संस्करणस्य आवश्यकता

संस्कृतापेक्षया मधुरतरा जगति न काप्यन्या भाषा किन्तु साधारणजनानामयं निर्णयः प्रचलितः यत् 'संस्कृतं भाषितुं कठिनमस्ति'-इति। अस्याः भावनायाः निराकरणाय समये समये प्रयत्नः क्रियमाणो वर्तते। संस्कृतव्याकरणं सरलं कर्तुं वदन्ति साधारणजनाः। एतद्विषये संस्कृतक्षेत्रे कार्यं क्रियमाणाः संस्थाः प्रयत्नं कुर्वत्यः सन्ति।[१]

किन्तु भाषाविज्ञानसम्बन्धिनां कतिपयप्रविधीनां नवीनतायाः प्रवर्तनातिरिक्तमिदानीं संस्कृतव्याकरणसरलीकरणे कापि विशेषसफलता न प्राप्ता। राष्ट्रीयानुसन्धानमथवा प्रशिक्षणपरिषद्द्वारा संस्कृतपाठ्यक्रमस्य माध्यमिकशिक्षास्तरे किञ्चित् नवीनीकरणे प्रयत्नः प्रचलनस्ति। किन्तु यथा आङ्ग्लभाषायां 'ग्रेडेड् रीडर्' सन्ति तथा संस्कृते न भवन्ति। संस्कृतस्य प्रारम्भिकशिक्षा यद्यपि अमरकोशमूलिकाष्टाध्यायीमूलिका वा न वर्तते तथापि एवं वक्तुमपि न शक्यते यत् यावत् परिवर्तनमपेक्षितं तावत् सर्वमभूत्तदिति।

संस्कृतस्याध्ययनाध्यापने आधुनिकपद्धत्या भारते प्रायशः सर्वेषु विश्वविद्यालयेषु भवति।

काश्चन एतादृश्यः स्वतन्त्रसंस्था अपि संस्कृतस्य प्राचीनग्रन्थानां प्रकाशने सन्नद्धाः सन्ति यासु शुद्धशास्त्ररक्षाया दृष्टिकोणं सर्वोपरि वर्तते।

भारतसर्वकारद्वारा विशेषप्रावधानम्

संस्कृतस्य विकासाय भारतसर्वकारेण प्रायशः सार्धैककोटिरूप्यकाणां प्रतिवर्षं प्रावधानं कृतमस्ति। देशे येषु विश्वविद्यालयेषु संस्कृतविभागा नासन् तत्र इदानीं ते उद्घाटिताः सन्ति। परम्परापद्धत्या संस्कृतस्य

---

१. अद्यतनविद्वद्भिः संस्कृतव्याकरणे कठिनतां दूरकर्तुं तथा प्रयासाधिक्यं कृतं क्रियमाणं च वर्तते यद्दृष्ट्वा तेषां श्रद्धा भक्तिकर्तव्योपरि आश्चर्यं विना भवितुं न शक्यते। एतस्य विवरणं पृथक् लेखनस्य विषयो भवति।

अध्ययनाध्यपनयोः व्यवस्थायै राष्ट्रीयसंस्कृतसंस्थानस्य स्थापना जाता। संस्थानान्तर्गतानि दश विद्यापीठानि प्रवर्तन्ते यत्र परम्परापद्धत्या प्रथमा मध्यमा-प्राक्शास्त्री-शास्त्री-शिक्षाशास्त्री-आचार्य विद्यावारिधिवाचस्पति-पर्यन्तोपाधये पठनपाठनव्यवस्था कृतास्ति। १९७५-७६ तमे वर्षे एतेषु विद्यापीठेषु छात्राणां संख्या बह्वधिका जाता। पारम्परिकसंस्कृतशिक्षायाः विकासाय केन्द्रीयप्रान्तीयसर्वकारैः 'सम्पूर्णानन्दसंस्कृतविश्व-विद्यालयः-वाराणसी', काशीविद्यापीठम्-वाराणसी, कामेश्वरसिंहसंस्कृतविश्व-विद्यालयः-दरभङ्गा, भारतीयविद्याभवनं-मुम्बई, गुरुकुलकाङ्गडी-इत्यादिनैकसंस्थानां माध्यमेन प्रयत्नः क्रियमाणः वर्तते।

भारते संस्कृतस्य विश्वविद्यालयाः स्वतन्त्राः मानिताश्च पारम्परिकशिक्षायां निरताः सन्ति। ते च

१. उत्तराखण्डसंस्कृतविश्वविद्यालयः हरिद्वारः उत्तराखण्डः।

२. कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः-रामटेक नागपुरम् महाराष्ट्रम्।

३. कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयः दरभंगा, बिहारः।

४. जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः, जयपुरम्-राजस्थानम्।

५. राष्ट्रियसंस्कृतविद्यापीठम्-तिरुपतिः-आन्ध्रप्रदेशः।

६. श्रीजगन्नाथसंस्कृतविश्वविद्यालयः-पुरी, ओडिशा।

७. श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली।

८. श्रीशङ्कराचार्यविश्वमहाविद्यालयः-कालडी, केरलः।

९. सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी, उत्तरप्रदेशः

१०. सोमनाथसंस्कृतविश्वविद्यालयः-जूनागढ, गुजरातः।

११. पाणिनीसंस्कृतविश्वविधालयः उज्जैनः म.प्र.

किञ्च राष्ट्रियसंस्कृतसंस्थानस्यापि कालक्रमेण बहवः विद्यापीठ-परिसराः संस्कृतक्षेत्रेऽनितरसाधारणानि कार्याणि साधयन्तो दृश्यन्ते। इदानीं एतत्संस्थानस्य दशपरिसराः विराजन्ते। ते च-

१. के.जे. सोमय्या संस्कृतविद्यापीठम्-मुम्बई, महाराष्ट्रम्।

२. गरलीपरिसरः - गरली, हिमाचलप्रदेशः।

३. गुरुवायूर् परिसरः - त्रिचुर, केरलः।

४. जयपुरपरिसरः - जयपुरम्, राजस्थानम्।

५. भोपालपरिसरः - भोपालः, म.प्रदेशः।

६. राजीवगान्धीपरिसरः - शृङ्गेरी, कर्नाटकः।

७. लखनऊपरिसरः - लखनऊ, उ. प्रदेशः।

८. श्रीगङ्गानाथझापरिसरः, इलाहाबादः, उ. प्रदेशः।

९. श्रीरणवीरपरिसरः - जम्मू, जम्मू-कश्मीरम्।

१०. श्रीसदाशिवपरिसरः - पुरी, ओरिस्सा।

किञ्च संस्थानस्यैव २३ महाविद्यालयाः आदर्शयोजनान्तर्गताः भारते विलसन्ति। ते च,

१. अहोबिलमठम् आदर्शसंस्कृतमहाविद्यालयः - मधुरान्तकम्- चेन्नै।

२. एस्.डी. आदर्शसंस्कृतविद्यालयः-डोहगी-हिमाचलप्रदेशः।

३. कालीकट् आदर्शसंस्कृतविद्यापीठम्-कालिकट्, केरलः।

४. कलियाचक् बिक्रमकिशोर आदर्शसंस्कृतमहाविद्यालयः-हरिया-पं. बङ्गालः।

५. जे.एन्.बी. आदर्शसंस्कृतमहाविद्यालयः-लागमा, बिहारः।

६. ठाकुरगदाधर-आदर्शसंस्कृतमहाविद्यालयः-कालीपुरम्-प.बङ्गाल।

७. पूर्णप्रज्ञसंशोधनमन्दिरम्-बेङ्गलूरु-कर्नाटकः।

८. मुम्बादेवीसंस्कृतमहाविद्यालयः-मुम्बई, महाराष्ट्रम्।

९. मद्रास्संस्कृतविद्यालयः-चेन्ने, तमिलनाडु।

१०. राजकुमारीगणेशशर्मासंस्कृतविद्यापीठम्-कोलहण्टा पटोरी-बिहार

११. राधामाधवसंस्कृतमहाविद्यालयः नम्बोलः, मणिपुरम्

१२. रामसुन्दरसंस्कृतमहाविद्याप्रतिष्ठानम्, रमौली, दरभंगा, बिहारः

१३. रामजीमेहता-आदर्शसंस्कृतमहाविद्यालयः-मुजफ्फरपुर-बिहारः।

१४. रानीपद्मावतीतारायोगतन्त्र-आदर्शसंस्कृतमहाविद्यालयः-वाराणसी- उ. प्रदेशः।

१५. लक्ष्मीदेवी सर्राफ आदर्शसंस्कृतमहाविद्यालयः-कालीरेखा, झारखण्डः।

१६. वैदिकसंशोधनमण्डलम्-पूणे, महाराष्ट्रम्।

१७. एकरसानन्दआदर्शसंस्कृतमहाविद्यालयः-मैनपुरी, उ.प्रदेशः।

१८. श्रीभगवान्दास आदर्शसंस्कृतमहाविद्यालयः-हरिद्वारः उत्तराखण्डः।

१९. श्रीरङ्गलक्ष्मीः आदर्शसंस्कृतमहाविद्यालयः-वृन्दावनम्, उ.प्रदेशः।

२०. श्रीदिवानकिशोर एस.डी. आदर्शसंस्कृतमहाविद्यालयः- अम्बाला कैण्ट हरियाणा

२१. श्रीसीतारामवैदिक-आदर्शसंस्कृतमहाविद्यालयः-कलकत्ता-प.बङ्गालः।

२२. संस्कृत-अकाडेमी - हैदराबाद - आ.प्रदेशः।

२३. स्वामी प्राङ्कुशाचार्य-आदर्शसंस्कृतमहाविद्यालयः- गया बिहारः

२४. हरियाणासंस्कृतविद्यापीठम्-बघोला, हरियाणा।

२५. हिमाचल-आदर्शसंस्कृतमहाविद्यालयः-जङ्गला-हिमाचलप्रदेशः।

संस्कृतक्षेत्रे दीयमानाः पुरस्काराः।

संस्कृतक्षेत्रे विशिष्टेभ्यः साधकेभ्यः राष्ट्रस्तरे राज्यस्तरे च पुरस्काराः बहवः दीयमानाः सन्ति। तेषां, केषाञ्चन नामान्यत्र उपस्थाप्यन्ते।

तत्र अन्ताराष्ट्रियस्तरे हिमाद्रिपुरस्कारः, उत्तराञ्चलसंस्कृत-अकाडेमी द्वारा दीयमानः अस्ति।

राष्ट्रस्तरे चैते अधोनिर्दिष्टाः पुरस्काराः दीयमानाः सन्ति।

१. पाणिनिपुरस्कारः (व्याकरणे) - उ.प्रदेशसंस्कृतसंस्थानम्।

२. बाणभट्टपुरस्कारः (साहित्ये) - उ.प्रदेशसंस्कृतसंस्थानम्।

३. महर्षिबादरायणपुरस्कारः - ३० तः ४० वर्षवयोमित्यन्तर्गतानाम्। - भारतसर्वकारः।

४. महर्षिवाल्मीकिपुरस्कारः- उ.प्रदेशसंस्कृतसंस्थानम्।

५. महर्षिवेदव्यासपुरस्कारः - उ.प्रदेशसंस्कृतसंस्थानम्।

६. मोदीपुरस्कारः

७. राष्ट्रपतिपुरस्कारः। - भारतसर्वकारः।

८. वाचस्पतिपुरस्कारः - के.के. बिरला।

९. वेदव्याससम्मानम् - यू.जी.सी।

१०. विश्वभारतीसम्मानम् - उ.प्रदेशसंस्कृतसंस्थानम्।

११. शाङ्करपुरस्कारः (दर्शने) - उ.प्रदेशसंस्कृतसंस्थानम्।

१२. सरस्वतीसम्मानम् - के.के. बिरला।

१३. सायणभाष्यपुरस्कारः (वेदे) - उ.प्रदेशसंस्कृतसंस्थानम्।

१४. साहित्य-अकाडेमीपुरस्कारः - साहित्य-अकाडेमी - देहली।

एवं राज्यस्तरेऽपि तत्तद्राज्यस्य संस्कृत-अकाडेमीद्वारा विविधाः पुरस्काराः दीयन्ते।

संस्कृतस्य शोधपत्रिकाः –

प्रायः सर्वेषु विश्वविद्यालयेषु संस्कृतशोधपत्रिकाणां प्रकाशनं भवति। 'अखिलभारतीयसंस्कृतसाहित्यसम्मेलन' द्वारा प्रकाशमाने 'संस्कृतरत्नाकरे', सागरविश्वविद्यालयात् प्रकाश्यमानायां 'सागरिकायां', इलाहाबादतः प्रकाश्यमानायां 'सङ्गमन्यां' संस्कृतलेखाः प्रकाश्यन्ते। दक्षिणभारतात् 'सुधर्मा' नामकमेकं दैनिकं पत्रमपि संस्कृतभाषायां निःसरति। अनेनेदं स्पष्टं भवति यत् संस्कृतमेका जागृता भाषा इति, एतत्प्रति भारतीयानां पर्याप्ता रुचिरस्ति–इति च।

अस्माकं विद्यापीठादपि एतद्दिशायां पूर्वम् 'अध्ययनमाला' अन्वेषणायाश्च, इदानीं 'शोधप्रभायाः' प्रकाशनं भवति।

सम्प्रति संस्कृतविषये प्रायशः षष्ट्यधिकाः पत्रिकाः सन्ति। तासां सूच्येका अत्र प्रदीयते।

१. अजस्रा – " – अखिलभारतीयसंस्कृतपरिषत्, चखनो।

२. अमृतभाषा – बालेश्वरम्।

३. अमृतवाणी – अग्रवालविद्यापीठम् – बालेश्वरम्।

४. अर्वाचीनसंस्कृतम् – त्रैमासिकम् – नवदेहली।

५. आरण्यकम् – आरा।

६. आर्षज्योतिः – मासिकम् – श्रीमद्दयानन्दवेदविद्यालयः–नवदेहली।

७. अभिव्यक्तिः – भारतसंस्कृतपरिषत् – नवदेहली।

८. अभिसंस्कृतम् – मासिकम् – कानपुरम्।

९. कामधेनुः – " – त्रिचूरम्।

१०. गाण्डीवम् – साप्ताहिकम् – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः – वाराणसी।

११. गोरखपुरचर्चा – गोरखपुरम्।

१२. गीर्वाणसुधा - मासिकी - मुम्बई।

१३. गैर्वाणी - " संस्कृतभवनम्, चित्तूरम्।

१४. गुञ्जारवः - " - अहमदनगरम्।

१५. चन्दमामा - " - चेन्नै।

१६. त्रिस्कन्धज्योतिषः - वाराणसी।

१७. दिव्यज्योतिः - " - शिमला।

१८. दिशाभारती - पाक्षिकी - देहली।

१९. दूर्वा - " - संस्कृतभवनम्, भोपालम्।

२०. नैसर्गिकी - राष्ट्रियनैसर्गिकशिक्षानुसन्धानसंस्थानम्, वाराणसी।

२१. प्रभातम् - दैनिकम् - कानपुरम्।

२२. पारिजातम् - मासिकम् - कानपुरम्।

२३. प्रियवाक् - " - पुरी।

२४. पूर्णत्रयी - अर्धवार्षिकी - राजकीयसंस्कृतमहाविद्यालयः, त्रिपुनीथुरा।

२५. पावमानी - गुरुकुलप्रभात-आश्रमः - मेरठः।

२६. परिशीलनम् - उ.प्रदेशसंस्कृतसंस्थानम् - लखनऊ।

२७. प्रभातम् - त्रैमासिकम् - लखनऊ।

२८. भारतमुद्रा - मासिकी-त्रिचूरम्।

२९. भारतोदयः - " - गुरकुलमहाविद्यालयः-हरिद्वारम्

३०. भारती - मासिकम् - जयपुरम्।

३१. भास्वती - षाण्मासिकी - काशीविद्यापीठम् - वाराणसी।

३२. युगगतिः - साप्ताहिकपत्रिका - गोरखपुरम्।

३३. रावणेश्वरकाननम् - बैजनाथदेवधरम्।

३४. रसिकप्रिया - चेन्नै।

३५. लोकसंस्कृतम् – पाक्षिकी – पाण्डिचेरी।

३६. वाक् – पाक्षिकी – देहरादूनम्।

३७. विश्वभाषा – " – वाराणसी

३८. विश्वसंस्कृतम् – " – विश्वेश्वरानन्दवैदिकशोधसंस्थानम्, होशियारपुरम्।

३९. विमर्शः – लखनऊ-विश्वविद्यालयः, लखनऊ।

४०. श्रीपण्डितम् – त्रैमासिकम् – वाराणसी।

४१. शारदा – पुणे।

४२. शोधप्रभा – त्रैमासिकम् – श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विद्यापीठम्-नवदेहली।

४३. सङ्गमनी – " " – संस्कृतसाहित्यपरिषत्-प्रयागः।

४४. सत्यानन्दम् – " चित्तूरम्।

४५. सन्देशः – द्वैमासिकम् – कानपुरम्।

४६. सन्देशः – अक्षरम् – बेङ्गल्लूरु।

४७. संस्कृतसङ्केतम् – पाक्षिकम् – अयोध्या।

४८. संस्कृतप्रचारकम् – मासिकम् – प्राध्यापकनिवासः, हिमाचलप्रदेश विश्वविद्यालयः-शिमला।

४९. संस्कृतसम्मेलनम् " – श्रीरामनिरञ्जनमुरारकासंस्कृतमहाविद्यालयः – पटना।

५०. संस्कृतप्रतिभा – वार्षिकी – नवदेहली।

५१. संस्कृतसञ्जीवनम् – पटना

५२. संस्कृतमन्दाकिनी – पुरी।

५३. संस्कृतामृतम् – साप्ताहिकी – अम्बेडकरनगरम्।

५४. संस्कृतसौरभम् – पटना।

५५. संस्कृतमञ्जरी – दिल्लीसंस्कृत-अकादमी – नवदेहली।

५६. स्वरमङ्गला – " " – राजस्थानसंस्कृत-अकाडेमी – जयपुरम्।

५७. सर्वगन्धा – " – लखनऊ।

५८. सागरिका – " – सागरम्, म.प्रदेश।

५९. सारस्वतम् – पटना।

६०. सुधर्मा – दैनिकम् – मैसूरु।

६१. सुरभारती – मैनपुरी।

६२. सूर्योदयः – मासिकम् – वाराणसी।

६३. संविद् – " – भारतीयविद्याभवनम्, मुम्बई।

६४. हितसाधिका – पाक्षिकी – हरियाणा।

६५. संस्कृतविमर्शः राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

६६. महस्विती राष्ट्रियसंस्कृतविधापीठम्, तिरुपतिः

संस्कृतशोधस्य नूतनाः विधयः

संस्कृतविषयकानुसन्धाने प्रशिक्षणार्थं दिल्लीस्थश्रीलालबहादुरशास्त्री राष्ट्रिसंस्कृतविद्यापीठे प्रगतवर्षे 'प्रशिक्षणकार्यशाला' एका आयोजिता आयेज्यते च। भारतस्य बहुषु विश्वविद्यालयेष्वपि संस्कृतविषये एम्.फिल् अथवा प्री.णीएच.डी. कोर्स् आरब्धमस्ति। एतत्पाठ्यक्रमाणां सञ्चालनेन इदानीमियं सम्भावना भवति यत् संस्कृतविषयकशोधः समुचितरूपेण भविष्यतीति।

सर्वे शोधार्थिनः शोधस्य प्रमुखविभागैः प्रक्रियाभिः अपेक्षाभिश्च सह परिचिता एव सन्ति। इदानीं तु विशेषरूपेण इदमपेक्ष्यते यत् शोधकार्ये परिमाणापेक्षया गुणवर्धने अधिकं प्रामुख्यं स्यादिति।

अनुसन्धानक्षेत्रे विशेषरूपेण अवधानार्होऽयमंशः अस्ति यत् बहुभिः विद्वद्भिः उपाधिनिरपेक्षं शोधकार्यं यत् कृतं तदपि बहु महत्त्वपूर्णमस्ति। रायबहादुर सर देसाई, डी.वी. पारसनीसानां च शिक्षादीक्षा अत्यन्तसाधारण रीत्या अभूत्। किन्तु अद्य ते इतिहासज्ञेषु अग्रगण्याः भवन्ति। प्रमुखरूपेण

संस्कृतपरम्परा एतैरेव विद्वद्भिः जीवितावस्थायां स्थापिता ये स्वात्मप्रचारं त्यक्त्वा तूष्णीं स्वकार्यं कुर्वन्ति। विभिन्नशास्त्राणां भाष्यं टीकाप्रटीकाश्च एतत्कोटावेवान्तर्भवन्ति। एतेषु सर्वेषु सत्स्वपि इदमङ्गीकर्तव्यमेव यत् विश्वविद्यालयेषु, अन्यशोधसंस्थासु च नियमितरूपेण यत् कार्यं भवति, तस्य स्वकीयं महत्त्वं वर्तत एवेति।

उपसंहारे केचन नियमाः

डॉ. ज्ञानधरपाठकः

कृतस्यानुसन्धानस्यान्तिमोऽंशः सर्वाधिकमहत्त्वपूर्णो भवति तमुपंसहारमिति कथ्यते। सम्यक् लिखितः शोधसारांशः सर्वेभ्यः उपयोगाय भवति, निष्कर्षप्रतिवेदनं दृष्ट्वैव ज्ञातुं शक्यते यद्धि कीदृशमभवच्छोधकार्य? के चराः? कानि प्रयुक्तानि उपकरणानि? कः विधिः? केन माध्यमेनाभवत् इत्या सर्वेषां प्रश्नानामुत्तरं प्रतिवेदने आगच्छति। पाठकाः केवलं निष्कर्षं दृष्ट्वा निश्चेतुं शक्नुवन्ति यत् मत्कृते अस्योपादेयता वर्तते न वा प्रतिवेदने शोधकार्यस्य सारांशो भवति। शोधकर्मणि यत्प्रतिज्ञावाक्यं भूमिकाया-मुल्लिखितमस्ति तत्कृते शोधविधिं संक्षिप्तं विलिख्य शोधस्य सारांशः लेखनीयः एतत्सर्वं शोधनिष्कर्षे आगच्छति।

उपसंहारस्यावश्यकता-

शोधकर्त्ता शोधप्रबन्धलेखनानन्तरं तस्य सारांशमपि लिखति। केचन अन्तिमाध्यायरूपे केचन च परिशिष्टे पृथग्रूपेण लिखन्ति। शोधसारांश एव एकं संसाधनमस्ति यस्य साहाय्येन शोधकर्त्ता स्वविचारान् समाजे प्रस्तौति। शोधप्रक्रियायां शोधसारांशस्य निम्नप्रकारेणोपयोगिता वर्तते[१]-

१. सामान्यतः शोधप्रबन्धस्य विस्तृतः भवत्याकारः तस्याध्ययने कालाधिकमपेक्षितम्भवति तस्मात्कारणात् शोधसारांशस्यावश्यकता भवति शोधसारांशाध्ययनाधिगमे सौविध्यम् अल्पकालापेक्षितं च भवति। शोधसारांशः सम्प्रेषणस्य महत्वपूर्णं साधनमस्ति येन सकृदेव विषयबोधगम्यम्भवति।

२. शोधप्रबन्धस्य मूल्याङ्कने शोधसारांशादेव सम्पूर्णशोधकार्यस्य ज्ञानम्भवति यत्रावश्यकम्भवति तत्रैव विस्तरेणावलोकनं परीक्षकैः क्रियते।

---

१. शैक्षिकानुसन्धानविधयः, पृ. ३४३

३. अन्येभ्यः शोधकेभ्यः सम्बन्धितसाहित्यस्य सर्वेक्षणमुद्धरणं च शोधसारांशाद् सुगमतया उपलब्धं भवति। अनेन शोधसारांशेन स्वकीयस्य शोधकार्यस्य बोधो भवति।

४. शोधकर्त्ता स्वकीययोगदानस्य प्रकाशनाये पत्रिकासु शोध-सारांशस्योपयोगं करोति।

५. शोधकर्मणि आर्थिकसहयोगाय शोधप्रबन्धप्रकाशनाय वा सम्बन्धितसंस्थाभ्यः उपभोक्ताभ्यश्च शोधसारांशप्रेषणम्भवति अनेन शोधसारांशेन शोधकार्यस्य मूल्याङ्कनं समीक्षणं च सुगमतया भवति।

निष्कर्षकथनस्याधाराः

अनुसन्धानस्योद्देश्यं प्रामाणिकपरिकल्पनातः सामान्यीकरणमस्ति। यतोहि शोधकर्मणि नैकन्यूनताः भवन्ति। तथापि सामान्यीकरणमत्यन्तं सावधानतया करणीयमस्ति। समान्यीकरणे प्रमाणपूर्णाः निम्नाङ्किताः आधाराः अपेक्ष्यन्ते–

१. सामान्यीकरणं सत्यापिततथ्यानुरूपं भवितव्यम्।
२. सामान्यीकरणं प्रकृतेः तं नियमानुरूपं भवितव्यं यत् सदैव सत्यं स्वीकरणीयं भवतु।
३. कथनं यथासम्भवं सरलं प्रामाणिकञ्च भवितव्यम्।

निष्कर्षात्रा सीमाङ्कनम्–

व्यावहारिकविज्ञाने अनुसन्धाता सावधानं भूत्वा कार्यं करोति तस्य अनुसन्धानस्य परिणामः मौलिकोऽस्ति न वा। यस्मिन् क्षेत्रे शोधकार्यं जातं तस्मात् क्षेत्रादेव निष्कर्षः दातव्यः। व्यावहारिकविज्ञाने कस्यापि शोधस्य निष्कर्षः निम्नकारकैः प्रभाविताः भवन्ति–

१. अध्ययनस्य परिणामः परिसीमाङ्कनात् युक्तो भवति, तस्योल्लेखः अनुसन्धाता प्रायः आलेखस्य प्रारम्भे एव करोति।

२. अध्ययनस्य निष्कर्षः केवलं तं तथ्यमुद्घाटयति यस्य विवरणं अनुसन्धाता स्वीयं विध्यंशे प्रायुङ्क्ते।

३. अध्ययननिष्कर्षस्य शुद्धतावधारणायाः पूर्तये च आश्रयति।

४. अध्ययनस्य निष्कर्षस्य प्रारूपम् चराणां प्रकृतिपर्यन्तं सीमितं भवति।

५. अध्ययनस्य निष्कर्षः सांख्यिकीयप्रविधीनामनुप्रयुक्तादपि प्रभावितो-भवति। अनुमानपूर्तिमात्रं तु न भवति[१]।

अत्र कथनमसमीचीनं न भविष्यति यत् कोऽपि अनुसन्धाता अनुभवजन्य (आकड़ा) चरात् एव निष्कर्षं ददाति। निष्कर्षः व्यक्ति-विशेषे व्यक्तिद्वयस्य प्रयोगः न साधुः, व्यक्तीनां समूहे भवति।

शोधनिष्कर्षस्य प्रमाणिकता

१. निष्कर्षकथनात्पूर्वाध्ययने उपलब्धानां तथ्यानां सारांशीकरणम्। आदौ निरूपितेनापकल्पितेन सह तुलना आवश्यकम्।

२. निष्कर्षैः दत्ताधारैः भवितव्यम्।

३. निष्कर्षानां सामान्यनियमानाञ्च स्वीकारात्पूर्वं परीक्षणमावश्यकं यत् पूर्वनिर्धारितानां तथ्यानां प्रकृतिं प्रति अनुकूलाः सन्ति न वा? तेषामपि सत्यतायाः परिज्ञानमांवश्यकम्।

४. सामान्यीकरणं सरलेषु सुनिश्चितेषु शब्देषु व्यक्तः कर्त्तव्याः।

५. समस्यायाः समाधानायोत्तरमवश्यं भवितव्यम्।

६. प्रारम्भे अपूर्णानां परिकल्पनानां परिणामः स्वीकृतः अस्वीकृतो वा।

७. दोषपूर्णानाम् अपूर्णानां दत्तानां (DATA) कारणादुत्पन्नानां समस्यानां सङ्केतः अवश्यमेव विधेयः।

८. व्यावहारिकोपयोगे दिशानिर्देशः।

९. अग्रिमानुसन्धानार्थं समस्यानां सम्बन्धे स्वाभिमतं प्रस्तोतव्यम्।[१]

---

१. शिक्षायामनुसन्धानम्, पृ. ८१

उत्तमशोधसारांशः

शोधसारांशस्य निम्नलिखितानि वैशिष्ट्यानि भवन्ति[१]–

१. अल्पसमये नूतनज्ञानप्राप्तिः।

२. नूतनज्ञानप्रसारणे साहाय्यं भवति।

३. भाषा सरला सहजा स्पष्टा च भवति।

४. विशेषज्ञाः स्वाभिमतिं टिप्पणीं च दास्यन्ति।

५. शोधकर्त्तुं शोधप्रपत्रनिर्माणे साहाय्यं भवति।

६. शोधकर्त्तुं शोधशीर्षकः समुचितरूपेण प्रस्तुतं करोति।

शोधनिष्कर्षात् लाभाः

शोधकर्त्ता प्रमुखान् निष्कर्षान् प्रस्तौति। निष्कर्षस्य पक्षे विपक्षे च तर्कं ददाति। शोधप्रपत्रस्यान्ते सन्दर्भसूची अवश्यमेव दातव्या। अनेन शोधकार्यस्य प्रामाणिकता वर्धते। शोधप्रपत्रेण निम्नलिखिताः लाभाः सन्ति–

(क) शोधकर्त्ता यद् योगदानं विहितं वर्तते तत् सर्वे ज्ञास्यन्ति येन ख्यातिः भविष्यति।

(ख) तस्मिन् क्षेत्रे विशेषज्ञा स्वाभिमतिं टिप्पणीं च दानाय अवसरं लभन्ते।

(ग) शोधकर्त्ता अनेन कार्येण अनुभवः वर्धते।

(घ) आगामिशोधकेभ्यः धन-समय-शक्तीनाञ्चापव्ययं न भवति।

(ङ) विशिष्टक्षेत्रे कृतस्य शोधस्य संकलने साहाय्यं भवति।

(च) अन्ये शोधकर्त्तारः समानकार्यपुनरावृत्तितः निवृत्तो भवन्ति।

---

१. शैक्षिकानुसन्धानस्य मूलतत्त्वानि, पृ. २२३

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठात्
विद्यावारिधिरित्युपाधिप्राप्तये स्वीकृतानां विषयाणां विवरणम्

(१९९४-२०१०)

S.N.	Name of Candidate	Name of the Topic	Name of the Guide	Year
१.	श्रीमती कमलेश शर्मा	कुवलयानन्दचित्रमीमांसयोः समीक्षात्मकमध्ययनम्	डॉ॰ अमिता शर्मा	१९९४
२.	श्रीरमेशचन्द्रः 'बराल'	चतुर्भाण्यां परिहासव्यंग्यानां परिशीलनम्	श्री अमीरचन्द्रशास्त्री	१९९४
३.	श्रीधूरणः, झा	अलङ्काराणां विषये मम्मटजगन्नाथयोर्मतविमर्शः	श्रीदेवीकांतमिश्रः	१९९४
४.	श्रीदिलीपः 'राणा'	भामतीरत्नप्रभयोस्तुलनात्मकमध्ययनम्	डॉ॰ रामवृक्षपाण्डेयः	१९९४
५.	श्रीकात्यायनमिश्रः	ज्यौतिषशास्त्रोक्त-कृषिविज्ञानविमर्शः	श्रीरामदेवझा	१९९४

६.	श्रीराजेन्द्रप्रसादपाण्डेयः	आगमिकानागमिकपूजापरम्पराणां समीक्षात्मकमध्ययनम्	डॉ॰ बदरीनारायणपञ्चोली	१९९४
७.	श्रीमद् उमेशकुमारभारद्वाजः	दशाफलस्य विशिष्टं पर्यालोचनम्	श्रीरामदेवझा	१९९४
८.	श्रीप्रेमकुमारशर्मा	सिद्धान्तशिरोमणेर्गोलाध्यायस्य समालोचनात्मकमध्ययनम्	डॉ॰ ओंकारनाथचतुर्वेदी	१९९४
९.	श्रीमती लीला कुमारी	कात्यायनश्रौतसूत्रे सोमयागपर्यन्तस्य भागस्य समीक्षात्मकमध्ययनम्	डॉ॰ लक्ष्मीश्वरझा	१९९४
१०.	श्रीरजनीकान्तशुक्लः	कारकप्रकरणस्थ सूत्रव्याख्याने भट्टोजिदीक्षितनागेशभट्टयोः मतभेदविमर्शः	श्रीवासुदेवघुशे	१९९४
११.	श्रीसुदेशकुमारशर्मा	प्रश्नशास्त्रस्योद्भवो विकासश्च	डॉ॰ शुकदेवचतुर्वेदी	१९९४
१२.	श्रीकीर्तिकान्तशर्मा	व्याकरणमहाभाष्ये समुदाहृत-वैदिकप्रतीकानां समीक्षात्मकमध्ययनम्	डॉ॰ रामवृक्षपाण्डेयः	१९९४

१३.	श्रीपवनकुमारशर्मा	केशवीय-श्रीपतिपद्धत्योस्तुलनात्मकमध्ययनम्	श्रीशारदानिवासशास्त्री	१९९४
१४.	श्रीपरमेश्वरीदत्ताचार्यः	वाजसनेयि-माध्यन्दिनीशुक्ल-यजुर्वेदसंहितायाः महीधरभाष्यस्यसमीक्षात्मकमध्ययनम्	श्रीलक्ष्मीश्वरझा	१९९४
१५.	श्री के० अनन्तः	माधवीयधातुवृत्ति-सिद्धान्तकौमुद्योः तुलनात्मकमध्ययनम्	श्रीवासुदेवघुशे	१९९४
१६.	श्रीनवीनचन्द्रकाण्डपालः	परिभाषाव्याख्याने नीलकण्ठदीक्षित-नागेशभट्टयोः मतभेदविमर्शः	श्रीवासुदेवघुशे	१९९४
१७.	श्रीश्रीधरमिश्रः	अजन्तलिङ्गत्रयपर्यन्तस्य तत्त्वबोधिनी-लघुशब्देन्दुशेखरयोस्तुलनात्मकमध्ययनम्	श्रीदेवीकान्तमिश्रः	१९९४
१८.	श्रीहरि ओम् काला	फलितज्योतिषशास्त्रे वास्तुविद्यायाः महत्त्वम्	श्रीशारदानिवासशास्त्री	१९९४
१९.	श्रीविमलाकान्तत्रिपाठी	ज्योतिषशास्त्रे पाराशरीययोगानां समीक्षात्मकमध्ययनम्	श्रीशारदानिवासशास्त्री	१९९४

२०.	श्रीब्रह्मचारी शिवशंकरः	गत्यर्थकधातूनां प्रयोगविषयः	श्रीदेवीकान्तमिश्रः	१९९४
२१.	श्रीगणेशप्रसाद ओझा	श्रीनीलकण्ठभट्टविरचितस्य प्रायश्चितमयूखस्य समीक्षणम्	डॉ० रवीन्द्रनागरः	१९९४
२२.	श्रीकृष्णानन्द उपाध्यायः	अनुष्ठानप्रकाशस्य विषयाणां गृह्यसूत्राण्यनुसृत्य समीक्षणम्	डॉ० रवीन्द्रनागरः	१९९४
२३.	श्रीमद् अवधनारायणचतुर्वेदी	दशाफलस्य सन्दर्भे कालचक्र-दशायाः समालोचनात्मकमध्ययनम्	श्रीरामदेवझा	१९९४
२४.	श्रीमहेशचन्द्रः	रूपमालाप्रक्रियाकौमुद्योस्तुल-नात्मकमध्ययनम्	डॉ० बदरीनारायणपञ्चोली	१९९४
२५.	श्रीमुकेशभारद्वाजः	विवाहकर्मणि प्रादेशिकाः लोकाचाराः	डॉ० रवीन्द्रनागरः	१९९४
२६.	श्रीमती संघमित्रा वसु	वृहदारण्यकवार्तिकसारस्य प्रथमाध्यायस्य समीक्षात्मकमध्ययनम्	डॉ० रामवृक्षपाण्डेयः	१९९४

२७.	श्रीमद् उमाशंकरप्रसादः	श्रीमद्भागवतपुराणप्रतिपादितयोग-स्वरूपेण सह पातञ्जलयोगदर्शनस्य तुलनात्मकमध्ययनम्	डॉ॰ बदरीनारायणपञ्चोली	१९९४
२८.	श्रीनन्दलालशर्मा	भारतीयदर्शनेषु प्रतिपादितानां सृष्टिस्थितिलयानां तुलनात्मकं विवेचनम्	डॉ॰ बदरीनारायणपञ्चोली	१९९४
२९.	श्रीमद् अंगदसिंहः	योगासनानि तेषां रोगानुसारि वर्गीकरणं विश्लेषणञ्च	श्रीचन्द्रकान्तदवे	१९९४
३०.	श्रीमती वीणा	बृहत्कथामञ्जर्याः सांस्कृतिक-मध्ययनम्	डॉ॰ अमिता शर्मा	१९९४
३१.	कु॰ सविता	श्रीमद्देवीभागवतमहापुराणे सादृश्यमूलकालङ्काराः	डॉ॰ बदरीनारायणपञ्चोली	१९९४
३२.	श्रीमोतीलालशर्मा	अनर्घप्रसन्नराघवयोस्तुलनात्मक-मध्ययनम्	श्रीदेवीकान्तमिश्रः	१९९४

३३.	श्रीललनझा	युधिष्ठिरविजयमहाकाव्यस्य समीक्षात्मकमध्ययनम्	श्रीरमेशचतुर्वेदी	१९९४
३४.	श्रीमती मंजु शर्मा	संस्कृतवाङ्मये पर्यावरणशिक्षायाः स्वरूपम्	श्रीचन्द्रहासशर्मा	१९९४
३५.	श्रीरामसूरतसिंहयादवः	परम्परागताधुनिकापद्धतिभिर-धीतानां छात्राध्यापकानां व्यक्तित्वसंघटनानां तुलनात्मकमध्ययनम्	श्रीचन्द्रहासशर्मा	१९९४
३६.	श्रीलक्ष्मीनिवासपाण्डेयः	शिक्षकप्रशिक्षणार्थिनां योग्यता-अभिवृत्तिसैद्धान्तिक-प्रायोगिकप्राप्ताङ्कानां मध्ये सहसम्बन्धस्य अध्ययनम्	डॉ० श्रीधरवासिष्ठः	१९९४
३७.	श्रीसुदर्शनत्रिपाठी	वृत्ति-विमर्शः	श्रीमद् अश्विनीकुमारदासः	१९९४
३८.	कुमारी श्वेता	आधुनिकसंस्कृतरूपकाणां-भाषिकसंरचना	श्रीसूर्यनारायणझा	१९९४

३९.	श्रीमद् ईश्वरभट्टः	कृष्णीयस्य समालोचनात्मक-मध्ययनम्	डॉ॰ शुकदेवचतुर्वेदी	१९९४
४०.	श्रीराकेशकुमारशर्मा	पातञ्जलयोगदर्शनमनुसृत्ययम-नियमासनानामनुशीलनम्	डॉ॰ बदरीनारायणपञ्चोली	१९९४
४१.	कु॰ रंजिता	बोधायनापस्तम्बयोर्धर्मसूत्रयोः तुलनात्मकमध्ययनम्	डॉ॰ नीना डोगरा	१९९४
४२.	श्रीप्रदीपकुमारशर्मा	रत्नविज्ञानस्य सिद्धान्तानां विशिष्टं पर्यालोचनम्	श्रीशरदानिवासशास्त्री	१९९४
४३.	श्रीमनोजकुमारशर्मा	ताजिकशास्त्रस्य सिद्धान्तानां समालोचनात्मकमध्ययनम्	डॉ॰ शुकदेवचतुर्वेदी	१९९४
४४.	श्रीशिवप्रसादः	जातकसारदीपस्य समालोचनात्म-कमध्ययनम्	श्रीशारदानिवासशास्त्री	१९९४
४५.	श्रीश्यामनाथझा	ज्यौतिषशास्त्रस्य सिद्धान्तस्कन्धे आर्यभट्टस्यावदानसमीक्षा	पं॰ रामदेवझा	१९९४

४६.	श्रीमद् अजीतकुमाररथः	लिंगपुराणस्याख्यायिकानां सामाजिकदृष्ट्या परिशीलनम्	श्रीदेवीकान्तमिश्रः	१९९६
४७.	श्रीपुरुषोत्तमाचार्यः	तत्त्वमुक्ताकलापस्य नायकसरस्य समीक्षात्मकमध्ययनम्	डॉ॰ रामवृक्षपाण्डेयः	१९९६
४८.	श्रीविनोदानन्दझा	श्रीमद् भट्टोजिदीक्षितकृतायाः सिद्धान्तकौमुद्याः पञ्चसन्धिपर्यन्तयो- स्तत्त्वबोधिनीलक्ष्मीटीकयोः समीक्षात्मकमध्ययनम्	डॉ॰ भवेन्द्रझा	१९९६
४९.	श्रीज्ञानेन्द्रशर्मा	तृतीयाह्निकं यावन्महाभाष्यवि- मलोद्योतटीकयोस्तुलनात्मकमध्ययनम्	श्रीदेवीकान्तमिश्रः	१९९६
५०.	श्रीरामनारायणझा	सिद्धान्तकौमुदीतद्धितप्रकरणस्थ तत्त्वबोधिनीबालमनोरमाटीकयोस्तुलनात्मकमध्ययनम्	श्रीदेवीकान्तमिश्रः	१९९६
५१.	श्रीराजेन्द्रप्रसादमिश्रः	संस्कृतविषयकमाध्यमिककक्षा- छात्राणां व्यावसायिकरुचीनां तुलनात्मकमध्ययनम्	श्रीचन्द्रहासशर्मा	१९९६

५२.	श्रीरघुनाथझा	हलन्तलिङ्गत्रयस्य तत्त्वबोधिनीलघु-शब्देन्दुशेखरयोः तुलनात्मकमध्ययनम्	श्रीदेवीकान्तमिश्रः	१९९६
५३.	श्रीगीतारामत्रिपाठी	व्याकरणशास्त्रीयपद-पदार्थ-सम्बन्ध-विमर्शः	श्रीदेवीकान्तमिश्रः	१९९६
५७.	श्रीकमलचन्द्रयोगी	व्याडिकृतस्य परिभाषासूचनस्य समीक्षात्मकमध्ययनम्	डॉ॰ हर्षनाथमिश्रः	१९९६
५८.	श्रीदेवीप्रसादद्विवेदी	भारतीयशिक्षासन्दर्भे उपनिषत्का-लिकशिक्षायाः समीक्षात्मकमध्ययनम्	डॉ॰ मण्डनमिश्रः	१९९६
५९.	श्रीमोहनलालमिश्रः	महाभाष्यस्य प्रथमाध्यायस्य चतुर्था-ह्निकपर्यन्तयोः प्रदीपविमलाटीकयोः समीक्षात्मकमध्ययनम्	श्रीदेवीकान्तमिश्रः	१९९६
६०.	श्रीकृष्णानन्दझा	वेदान्तशास्त्रानुसार-अभावतत्त्व-मीमांसा	डॉ॰ रामवृक्षपाण्डेयः	१९९६

६१.	श्रीगोविन्दवल्लभजोशी	संस्कृतवाङ्मये कामशिक्षायाः मनोवैज्ञानिकमध्ययनम्	श्रीचन्द्रहासशर्मा	१९९६
६२.	श्रीदासलालः	योगदर्शने निरूपितानां विभूतीनां- योगिभिः साधनानि तदनुभवाश्च	श्रीचन्द्रकान्तदवे	१९९६
६३.	श्रीरामवकीलशर्मा	सारस्वतचन्द्रिकालघुसिद्धान्त- कौमुद्योस्तिङन्तकृदन्तरहितयोः तुलनात्मकमध्ययनम्	डॉ॰ कमलाभारद्वाज	१९९६
६४.	कु. रंजना गुप्ता	म॰म॰विद्यावाचस्पतिसमीक्षाचक्र- वर्तिवेदविद्यावारिधि- पं. मधुसूदन- ओझाविरचितस्य ब्रह्मसिद्धान्तस्य समीक्षात्मकमध्ययनम् "ब्रह्म-तत्त्वम्"	डॉ॰ लक्ष्मीश्वरझा	१९९६
६५.	श्रीराजधरमिश्रः	पुरुषोत्तमदेवकृतपरिभाषावृत्तिनागेश- भट्टकृतपरिभाषेन्दुशेखरयोः तुलनात्मकध्ययनम्	श्रीदेवीकान्तमिश्रः	१९९६
६६.	श्रीगणेशकुमारशुक्लः	परिभाषेन्दुशेखस्य भूतिविजयाटीकयोः कतिपयविशिष्टस्थलानां तुलनात्मकमध्ययनम्	डॉ. मण्डनमिश्रः	१९९६

६७.	श्रीविनोदप्रकाश उपाध्याय:	रावणप्रोक्तस्य "अर्कप्रकाशस्य" सम्पादनं समीक्षा च	श्रीचन्द्रहासशर्मा	१९९६
६८.	श्रीविनोदशंकरपाण्डेय:	विवाहे मूलाधाराणां समीक्षात्मक-मध्ययनम्	डॉ० रवीन्द्रनागर:	१९९६
६९.	श्रीशवीन्द्रकुमारडोगरा	फलितज्योतिषशास्त्रे सामुद्रिक-शास्त्रस्य योगदानम्	श्रीनागेन्द्रझा	१९९६
७०.	श्रीनरेन्द्रकुमार:	ज्ञापकसंग्रहस्य समीक्षात्मकमध्ययनम्	श्रीवासुदेवघुशे	१९९६
७१.	श्रीमती रमाचन्द्रा	बृहज्जातकस्य अपूर्वार्थप्रदर्शिका-टीकाया: परिशीलनम्	श्रीरामदेवझा	१९९६
७२.	श्रीदिनेशकुमारवशिष्ठ:	भारतीयज्योतिषशास्त्रदृष्ट्या जीविकाविचार:	स्व० शारदानिवासशास्त्री	१९९९
७३.	श्रीमती प्रणति भट्टाचार्य	वृहत्पाराशरहोराशास्त्रजैमिनिसूत्र-योस्तुलनात्मकध्ययनम्	श्रीरामदेवझा	१९९९

७४.	श्रीविश्वम्भरदयालुः	पाणिनिप्रोक्तसंज्ञाविषये भट्टोजि-दीक्षितनागेशभट्टयोः मतभेदविमर्शः	श्रीवासुदेवघुशे	१९९९
७५.	श्रीचिम्बरम् जोयिसः	ऐन्द्राकृग्विधानस्य सम्पादनं समीक्षात्मकमध्ययनम्	प्रो॰ लक्ष्मीश्वरझा	१९९९
७६.	श्रीराजीवकुमारपाठकः	नामार्थसुबर्थयोर्विषये कौण्डभट्ट-योर्मतभेदविमर्शः	डॉ॰ कमला भारद्वाज	१९९९
७७.	श्रीश्यामलालबादलः	दीक्षितनागेशयोर्मतेन स्फोटनामा-र्थस्तुलनात्मकमध्ययनम्	डॉ॰ भवेन्द्रझा	१९९९
७८.	श्रीनरेन्द्रसिंहयादवः	योगग्रन्थेषु प्राणायामस्य विवरणं विवेचनञ्च	प्रो॰ चन्द्रकान्तदवे	१९९९
७९.	श्रीकेशवकुमाररायः	व्याकरणमीमांसान्यायदर्शनाऽभि-मतसुबर्थानां सर्वेक्षणम्	प्रो॰ अश्विनीकुमारदासः	१९९९
८०.	श्रीभारद्वाजपाण्डेयः	अर्वाचीनसंस्कृतमहाकाव्येषु देशभक्तिविमर्शः	प्रो॰ रमेशचतुर्वेदी	१९९९

८१.	श्रीव्रजमोहनशर्मा	कविकर्णपूरविरचितानन्दवृन्दा-वनचम्पूकाव्यस्य परिशीलनम्	डॉ॰ अमिता शर्मा	१९९९
८२.	श्रीविरुपाक्षः वि. जड्डीपालः	मीमांसादर्शने काव्यशास्त्रे च प्रस्तुतस्य शब्दवृत्तिविमर्शस्य समीक्षणम्	प्रो॰ रमेशचतुर्वेदी	१९९९
८३.	श्रीयशवीरसिंहः	श्रीनीलकण्ठविरचितस्य व्यव-हारमूखस्य समीक्षात्मकध्ययनम्	डॉ॰ हरिकृष्णशर्मा	१९९९
८४.	श्रीमुक्तिपदचक्रवर्ती	कल्पसूत्रोक्त-काम्येष्टि-विमर्शः	पं॰ हरिहरत्रिवेदी	१९९९
८५.	श्रीनागेन्द्रकुमारझा	वैयाकरणभूषणसारे समागतानां विभिन्नदार्शनिकसिद्धान्तानां समीक्षात्मकमध्ययनम्	पं॰ देवीकान्तमिश्रः	१९९९
८६.	श्रीशिवकुमारशर्मा	महाभास्करीयस्य समालोचनात्म-कमध्ययनम्	प्रो॰ ओंकरनाथचतुर्वेदी	१९९९
८७.	श्रीपरमानंदमिश्रः	महाभाष्यवर्तिनवाह्निकपर्यन्त-दार्शनिकतत्त्वानां समीक्षणम्	पं॰ देवीकान्तमिश्रः	१९९९

८८.	श्रीमती: तृप्तिभट्टाचार्य	श्रीकल्किपुराणस्य समीक्षा आंग्लभाषानुवादश्च	डॉ॰ अमिता शर्मा	१९९९
८९.	झोपाख्यप्रमोदकुमारझा	मम्मटनागेशभट्टयोः शब्दशक्ति-विषयकं विवेचनात्मकमध्ययनम्	डॉ॰ भवेन्द्रझा	१९९९
९०.	श्रीमद् अशोककुमारशुक्लः	मैत्रेरक्षितविरचितस्य धातुप्रदीपस्य समीक्षात्मकमध्ययनम्	प्रो॰ वासुदेवघुशे	१९९९
९१.	श्रीमती प्रतिभा रस्तोगी	स्कन्दपुराणीयं-सांख्यदर्शनम्	प्रो॰ बदरीनारायणपञ्चोली	१९९९
९२.	श्रीदयानन्दमिश्रः	सुभाषितसुधानिधेः समीक्षात्मक-मध्ययनम्	डॉ॰ रमेशचन्द्रदाशः	१९९९
९३.	श्रीसत्यव्रतशर्मा	सामुद्रिकशास्त्रस्य प्राचीनार्वाचीन-सिद्धान्तानां समालोचनात्मक-मध्ययनम्	श्रीकल्याणदत्तशर्मा	१९९९

९४.	श्रीराजकुमारशर्मा	श्रीमत्कविराज इत्युपाधिनावि-भूषितकविवरक्षेमेन्द्ररचितायाः भरतमञ्जर्या आलोचनात्मकमध्ययनम्	डॉ॰ विश्वप्रकाशशास्त्री	१९९९
९५.	श्रीबाबूरामशर्मा	भारतीयसिद्धान्तज्योतिषदृष्ट्या 'हयत' ग्रन्थसमीक्षा	श्रीरामदेवझा	१९९९
९६.	श्रीपद्माकरपटवर्धनः	अङ्कगणितस्य विकासक्रमे लीला-वत्याः योगदानम्	डॉ॰ ओंकारनाथचतुर्वेदी	१९९९
९७.	श्रीमद् अनुजकुमारः	पातञ्जलयोगेन सह गरुडमहा-पुराणीययोगस्य तुलनात्मकमध्ययनम्	प्रो॰ बदरीनारायणपञ्चोली	१९९९
९८.	श्रीमद् अजयकुमारमिश्रः	न्यायसिद्धान्तमुक्तावल्यां तर्क-भाषायाञ्च निरूपितस्यानुमानस्य समीक्षणम्	डॉ॰ पीयूषकान्तदीक्षितः	२०००
९९.	कु॰ साधना रानी	महाभारतस्य अनुशासनपर्वणः समीक्षात्मकमध्ययनम्	डॉ॰ अमिता शर्मा	२०००

१००.	कु॰ साधना जैन	डॉ॰ हरिनारायणदीक्षितकृतभीष्म-चरितमहाकाव्यस्य समीक्षात्मकमध्ययनम्	प्रो॰ रमेशचतुर्वेदी	२०००
१०१.	श्रीभास्करानन्दबिडालिया	संस्कृतसुकविभिः काव्यशास्त्राचार्यैश्च प्रकाशिता कविशिक्षा	प्रो॰ रमेशचतुर्वेदी	२०००
१०२.	श्रीबिहारीलालशर्मा	ज्योतिष-धर्मशास्त्रयोः दृष्ट्या-व्रतपर्वोत्सवानां समीक्षणम्	प्रो॰ शुकदेवचतुर्वेदी	२०००
१०३.	श्रीराजकिशोरपण्डा	व्रतोद्यापनप्रकाशस्य समीक्षात्मकमध्ययनम्	डॉ॰ रवीन्द्रनागरः	२०००
१०४.	श्रीमती वीणा मिश्रा	शतपथब्राह्मणान्तर्गतानामाख्यायिकानां समीक्षात्मकमध्ययनम्	प्रो॰ लक्ष्मीश्वरझा	२०००
१०५.	श्रीवीरेन्द्रकुमारझा	वैयाकरणनये-वृत्तिविमर्शः	श्रीदेवीकान्तमिश्रः	२०००
१०६.	श्रीमती निर्मल गुप्ता	शब्द-शक्तितत्त्वविमर्शः	श्रीदेवीकान्तमिश्रः	२०००
१०७.	श्रीवृन्दावनदाशः	यजुर्विधानसूत्रस्य समीक्षात्मकमध्ययनम	डॉ॰ रमेशचन्द्रदाशशर्मा	२०००

१०८.	श्रीविनोदकुमारझा	तृतीयाध्यायस्थ सूत्राणां महाभाष्य-दृष्ट्या विवेचनम्	डॉ॰ भवेन्द्रझा	२०००
१०९.	श्रीगजभानमुकुटशर्मा	भक्तितत्त्वचिन्तने रूपगोस्वामि-करपात्रिणोस्तुलनात्मकमध्ययनम्	डॉ॰ विश्वप्रकाशशास्त्री	२००१
११०.	श्रीमतिः आभा झा	गुरुदक्षिणाविषयकाणां संस्कृत-काव्यानां पर्यालोचनं गुरुदक्षिणा-नाटकसमीक्षणम्	डॉ॰ अमिता शर्मा	२००१
१११.	श्रीजन्मेजयकुमारझा	राजशेखरकृतायाः काव्यमी-मांसायाः समीक्षात्मकमध्ययनम्	डॉ॰ विश्वप्रकाशशास्त्री	२००१
११२.	श्रीसुनीलकुमारझा	विंशशताब्द्याः कथासाहित्यस्य समीक्षात्मकमध्ययनम्	डॉ॰ अमिता शर्मा	२००१
११३.	श्रीभोलाझा	भाषावृत्तेः समीक्षात्मकमध्ययनम्	डॉ॰ भवेन्द्रझा	२००१
११४.	श्रीकौशलेन्द्रकुमारसिंहः	पाणिनीयसूत्रेषु नञर्थसमीक्षा	डॉ॰ भवेन्द्रझा	२००१

११५.	श्रीविश्वरंजनपतिः	जातकदर्पणस्य भावफलाध्यास्य-समीक्षात्मकमध्ययनम्	प्रो॰ शुकदेवचतुर्वेदी	२००१
११६.	श्रीविनोदकुमारशर्मा	भारतीयज्यौतिषे ग्रहाणां गति-सिद्धान्तविमर्शः	श्रीरामदेवझा	२००१
११७.	श्रीपरमानन्दभारद्वाजः	मुहूर्त्तगणपतेः विशिष्टं पर्यालो-चनम्	प्रो॰ शुकदेवचतुर्वेदी	२००१
११८.	श्रीदौलतरामशास्त्री	यागविधिसमीक्षणम्	डॉ॰ हरिहरत्रिवेदी	२००१
११९.	श्रीसुन्दरनारायणझा	पुरुषमेधयज्ञस्य समीक्षात्मक-मध्ययनम्	प्रो॰ लक्ष्मीश्वरझा	२००१
१२०.	श्रीमुकुलविकासमिश्रः	और्ध्वदेहिककर्मसमीक्षणम्	डॉ॰ रवीन्द्रनागरः	२००१
१२१.	श्रीमद् अश्विनीशास्त्री	अष्टाध्याय्यां तन्मूलकग्रन्थेषु च कर्मकाण्डविमर्शः	डॉ॰ रवीन्द्रनागरः	२००१

१२२.	श्रीमद् अवधकिशोर चौधरी	कर्मकाण्डप्रदीपस्य समीक्षात्मकम् अध्ययनम्	डॉ॰ रवीन्द्रनागरः	२००१
१२३.	श्रीविष्णुपदगोस्वामी	वायुनन्दनमिश्रकृतश्राद्धसंग्रह-ग्रन्थस्य समीक्षात्मकमध्ययनम्	डॉ॰ रवीन्द्रनागरः	२००१
१२४.	ब्रह्मचारिणी सरोजिनी आर्या	काशिकादृष्ट्या परिभाषासूत्राणां काशिकास्थपरिभाषाणाञ्च समीक्षात्मकमध्ययनम्	डॉ॰ भवेन्द्रझा	२००१
१२५.	श्रीशंकरकुमारमिश्रः	धर्मशास्त्रेषु स्मृतिग्रन्थेषु च संस्काराणां प्रासङ्गिता	प्रो॰ नीना डोगरा	२००१
१२६.	श्रीवैकुण्ठनाथशर्मा	धातुगतानामित्संज्ञकवर्णानां फलसमीक्षा	प्रो॰ अश्विनीकुमारदासः	२००१
१२७.	श्रीमतिः सरोजव्यास	ग्रामीणानां नगरीयाणाञ्च किशोरावस्थायाः विद्यार्थिनां व्यावसायिकरुचीनां तत्कारकाणां च बुद्धिलब्धेः सन्दर्भे समालोचनात्मकमध्ययनम्	प्रो॰ चन्द्रहासशर्मा	२००१

१२८.	श्रीज्ञानधरपाठकः	सीतारावणसंवादझरीत्रय्याः काव्य-शास्त्रीयमध्ययनम्	प्रो॰ रमेशचन्द्रचतुर्वेदी	२००२
१२९.	श्रीमतिः अञ्जुठाकुर	क्रोचे-अभिनवगुप्तयोः सिद्धा-न्तानां तुलनात्मकं समीक्षात्मकञ्च परिशीलनम्	डॉ॰ अमिताशर्मा	२००२
१३०.	श्रीचन्द्रकुमारझा	श्रीमतिनाथमिश्रमहाभागानां रचनानां समीक्षात्मकमध्ययनम्	डॉ॰ अमिताशर्मा	२००२
१३१.	श्रीगौरीकान्तझा	नैषधीयचरितमहाकाव्ये ध्वनि-विमर्शः	डॉ॰ अमिताशर्मा	२००२
१३२.	श्रीनरेन्द्रठाकुरः	वैदेहीचरितस्य समीक्षात्मक-मध्ययनम्	प्रो॰ सूर्यनारायणझा	२००२
१३३.	श्रीजगदीशवशैइकः	ज्योतिषशास्त्रे वृष्टिविज्ञानम्	प्रो॰ प्रेमकुमारशर्मा	२००२
१३४.	श्रीमती नीलम ठगेला	दैवज्ञवल्लभायाः समालोचनात्म-कमध्ययनम्	प्रो॰ ओंकारनाथचतुर्वेदी	२००२

१३५.	श्रीविनोदकुमारशर्मा	उत्तरकालामृतस्य समालोचनात्मक-मध्ययनम्	डॉ० प्रेमकुमारशर्मा	२००२
१३६.	श्री उमेशचन्द्रमिश्रः	काव्यशास्त्राध्ययने शब्दशास्त्रव्युत्पत्ते-रुपयोगस्य समीक्षात्मकमध्ययनम्	डॉ० जयकान्तसिंहः शर्मा	२००२
१३७.	श्रीमद् अजयकुमारशर्मा	सर्वार्थचिन्तामणेः समालोचना-त्मकमध्ययनम्	प्रो० शुकदेवचतुर्वेदी	२००२
१३८.	श्रीबलदेवानन्दसागरः	संस्कारेषु स्तुतीनां महत्त्वम्	प्रो० रवीन्द्रनागरः	२००२
१३९.	श्रीजयप्रकाशचौधरी	जातकादेशमार्गस्य समीक्षात्मक-मध्ययनम्	पं० कल्याणदत्तशर्मा	२००२
१४०.	श्रीधर्मचन्द्रशर्मा	चन्द्रशृङ्गोन्नतिसिद्धान्तसमीक्षा	डॉ० प्रेमकुमारशर्मा	२००२
१४१.	श्रीमद् अनिलकुमारः जायसवालः	गर्भाधानादिविवाहान्तसंस्काराणां वैज्ञानिकदृष्ट्या परिशीलनम्	डॉ० रमेशचन्द्रदाशशर्मा	२००२
१४२.	श्रीमद् उदयचन्द्रझा	कौण्डभट्टनागेशभट्टयोः सिद्धान्तानां तुलनात्मकमध्ययनम्	प्रो० वासुदेवघुशे	२००२

१४३.	श्रीमती कृष्णा	मिताक्षरावृत्तेः समीक्षात्मकमध्ययनम्	प्रो॰ वासुदेवघुशे	२००२
१४४.	श्रीखीमानन्द उप्रेती	बृहज्जातकस्य भट्टोत्पलटीकायाः समालोचनात्मकमध्ययनम्	डॉ॰ देवीप्रसादत्रिपाठी	२००२
१४५.	श्रीविष्णुकुमारनिर्मलः	आधुनिकजीवने भारतीयवास्तु-शास्त्रोपयोगिता	डॉ॰ देवीप्रसादत्रिपाठी	२००२
१४६.	श्रीनवलकिशोरचौधरी	शब्दार्थसम्बन्धमीमांसा	प्रो॰ चन्द्रशेखरशुक्लः	२००२
१४७.	श्रीमूलचन्द्रमिश्रः	श्रीमद्भागवतमहापुराणे विशिष्टा-द्वैतवेदान्तदर्शनानुशीलनम्	प्रो॰ बदरीनारायणपंचोली	२००२
१४८.	श्रीमती आभारानी	पाहुणदोहाग्रन्थस्य समालोच-नात्मकमध्ययम्	डॉ॰ सुदीपजैनः	२००२
१४९.	श्रीमद् अशोककुमारजैनः	आचार्यकुन्दकुन्दविरचितग्रन्थानां सांस्कृतिकमध्ययनम्	डॉ॰ सुदीपजैनः	२००२
१५०.	श्रीरामनिवासयादवः	मालतीमाधवप्रकरणस्य नाट्य-शास्त्रीयदृष्ट्या समीक्षात्मकमध्ययनम्	प्रो॰ रमेशकुमारपाण्डेयः	२००३

१५१.	श्रीमतिः सुमन पाण्डेय	दशरूपकनाट्यदर्पणयोस्तुला-त्मकमनुशीलनम्	प्रो॰ रमेशकुमारपाण्डेयः	२००३
१५२.	श्रीछोटूकुमारमिश्रः	मम्मटविश्वनाथयोः काव्यशास्त्र-विषयकवैशिष्ट्यसमीक्षणम्	प्रो॰ रमेशकुमारपाण्डेयः	२००३
१५३.	श्रीमतिः निर्मल मिश्र	कालिदासशूद्रकयोः जीवन-मूल्यानां तुलनात्मकमनुशीलनम्	प्रो॰ रमेशकुमारपाण्डेयः	२००३
१५४.	श्रीविमलकुमारबलोधी	प्रभुदत्तशास्त्रिविरचितस्य गणपति-सम्भवमहाकाव्यस्य समीक्षणं संस्कृत-वाङ्मयचर्चितगणपतितत्त्वपर्यालोचनञ्च	प्रो॰ रमेशचतुर्वेदी	२००३
१५५.	श्रीमतिः ललिता देवी	उत्तररामचरित-महावीरचरितयो-स्तुलनात्मकमध्ययनम्	डॉ॰ रश्मि मिश्र	२००३
१५६.	श्रीचन्द्रमौलिशुक्लः	आयुर्वेदशास्त्रस्य परिप्रेक्ष्ये सत्या-ग्रहनीतिकाव्यस्य अनुशीलनम्	प्रो॰ रमेशकुमारपाण्डेयः	२००३

१५७.	श्रीसुधांशुशेखरपण्डा	गीतगोविन्दस्य आलङ्कारिकमनुशीलनम्	प्रो॰ रमेशकुमारपाण्डेयः	२००३
१५८.	कु॰ सोमवती	चण्डीदासगोविन्दठक्कुरविरचितयोः काव्यप्रकाशटीकयोस्तुलनात्मक-मध्ययनम्	डॉ॰ अमिताशर्मा	२००३
१५९.	श्रीमतिः सविता तोमर	कण्ठसाहित्यस्य समालोचनात्म-कमध्ययनम्	डॉ॰ रश्मि मिश्र	२००३
१६०.	श्रीललितेश्वरठाकुरः	कालिदासीयकाव्येषु पर्यावरण-तत्त्वानुशीलनम्	प्रो॰ सूर्यनारायणझा	२००३
१६१.	श्रीमद् अरुणकुमारशर्मा	नारदपुराणे सिद्धान्तज्योतिषस्कन्ध-स्यानुशीलनम्	डॉ॰ प्रेमकुमारशर्मा	२००३
१६२.	श्रीमतिः सविता सौम्या	महाभाष्यकाशिकयोरिष्टीनां-तुलनात्मकमध्ययनम्	डॉ॰ कमला भारद्वाज	२००३
१६३.	श्रीपरमानन्दपुरी	पराशरोक्तदशाफलविमर्शः	प्रो॰ शुकदेवचतुर्वेदी	२००३

१६४.	श्रीसुशीलकुमारः	सुश्लोकशतकस्य समालोचना-त्मकध्ययनम्	डॉ॰ प्रेमकुमारशर्मा	२००३
१६५.	श्रीकैलाशचन्द्रबडोला	पंचाङ्गनिर्माणस्य प्राचीन-नवीन-विधीनां तुलनात्मकमध्ययनम्	पं॰ कल्याणदत्तशर्मा	२००३
१६६.	श्रीकृष्णानन्दमिश्रः	नैषधीयमहाकाव्ये प्रयुक्तानां तिङन्त-पदानामर्थाभिव्यंजकत्वस्य शब्द-शास्त्रीयं समीक्षात्मकमध्ययनम्	प्रो॰ अश्विनीकुमारदासः	२००३
१६७.	श्रीयाज्ञवल्क्यचतुर्वेदी	सिद्धान्तकौमुद्याः कृदन्तप्रकरणस्य टीकानां समीक्षात्मकमध्ययनम्	प्रो॰ वासुदेवघुशे	२००३
१६८.	श्रीप्रकाशचन्द्रशतपथी	शतपथब्राह्मणे सामाजिकव्यवस्थायाः परिशीलनम्	डॉ॰ रमेशचन्द्रदाशशर्मा	२००३
१६९.	श्रीसुशीलगौतमः	भावकुतूहलस्य समालोचनात्मक-मध्ययनम्	डॉ॰ प्रेमकुमारशर्मा	२००३

१७०.	श्रीरमानाथझा	सिद्धान्तकौमुदीस्थ फक्किकामुपक्रमोपसंहारपूर्वकं समीक्षात्मकमध्ययनम्	प्रो॰ अश्विनीकुमारदासः	२००३
१७१.	श्रीभूपेन्द्रमोहनशर्मा	नारदीयपुराणोक्तसंहितास्कन्धस्य विश्लेषणात्मकमध्ययनम्	प्रो॰ शुकदेवचतुर्वेदी	२००३
१७२.	श्रीवीरेन्द्रकुमारठाकुरः	वैयाकरणसिद्धान्तकौमुद्याः षड्लिङ्गभागस्य बालमनोरमातत्त्वबोधिन्योस्तुलनात्मकमध्ययनम्	प्रो॰ अश्विनीकुमारदासः	२००३
१७३.	श्रीनन्दनमिश्रः	भारतीयज्योतिषशास्त्रदृष्ट्या कालतत्त्वसमीक्षा	श्रीरामदेवझा	२००३
१७४.	श्रीनरेशचन्द्रः	शिष्यधीवृद्धिदतन्त्रस्य समालोचनात्मकमध्ययनम्	डॉ॰ प्रेमकुमारशर्मा	२००३
१७५.	श्रीसुनीलकुमारझा	दर्शपूर्णमासयोः तात्त्विकविमर्शः	प्रो॰ लक्ष्मीश्वरझा	२००३

१७६.	श्रीसुनीलकात्यायनः	श्रौतयज्ञेषु सोपपत्तिनिरूपणं विमर्शश्च	प्रो० लक्ष्मीश्वरझा	२००३
१७७.	श्रीकृष्णकान्तठाकुरः	अहिंसादिपंचमहाव्रतानां स्वरूपस्य विवेचनम्	डॉ० वीरसागरजैनः	२००३
१७८.	श्रीप्रेमकान्तठाकुरः	दिल्लीस्थविभिन्नमाध्यमिकविद्यालयेषु शिक्षणपद्धतेः समीक्षात्मकमध्ययनम्	डॉ० रमेशप्रसादपाठकः	२००३
१७९.	श्रीमद् ऋषिपालशास्त्री	संस्कृतसाहित्ये मानवाधिकार-संरक्षणार्थं विहितोपायानामनुशीलनम्	डॉ० चन्द्रहासशर्मा	२००३
१८०.	श्रीमद् इन्द्रदेवमेहता	स्वातन्त्र्योत्तरं प्राशासनिकसामाजिक-संस्थाभिश्च संस्कृतभाषायाः प्रचारोपायानां समीक्षणम्	प्रो० रामलालयादवः	२००३
१८१.	श्रीमहेन्द्र उपाध्यायः	संस्कृतव्याकरणशास्त्रनिर्दिष्ट-शिक्षणाधिगमप्रक्रियाणां शिक्षाशास्त्र-दृष्ट्या विवेचनम्	प्रो० चन्द्रहासशर्मा	२००३

१८२.	श्रीश्रुतिकान्तपाण्डेयः	गर्भाधानतः शैशवं यावत् बालानां संस्कारात्मकः शिक्षात्मकश्च विकासः	डॉ॰ नागेन्द्रझा	२००३
१८३.	श्रीमोहनचन्द्रः	भासनाटकचक्रे शिक्षामनोवैज्ञानिक-तत्त्वानामध्ययनम् आधुनिकशास्त्रे तेषामुपयोगः	प्रो॰ शालिग्रामत्रिपाठी	२००३
१८४.	श्रीरमणकुमारमिश्रः	दिल्लीप्रदेशस्य उच्चतरमाध्यमिक-विद्यालयानां व्यक्तित्त्वस्य तुलनात्मक-मध्ययनम्	प्रो॰ शशिप्रभाजैन	२००३
१८५.	श्रीमद् अरविन्दझा	सेवारतस्नातकोत्तरत्रिभाषाऽध्यापकानां शिक्षणाधिगमप्रक्रियायां पुनश्चर्यापाठ्य-क्रमप्रभावस्य तुलनात्मकं मूल्याङ्कनम्	प्रो॰ चन्द्रहासशर्मा	२००३
१८६.	बत्तीलालमीना	किरातार्जुनीयशिशुपालवधमहाकाव्ययोः वक्रोक्तिसिद्धान्तदृष्ट्या समीक्षात्मकमध्ययनम्	डॉ. देवदत्तचतुर्वेदी	२००४

१८७.	श्रीकमलेशकुमारमिश्रः	श्रीमद्भागवतोक्तरासपंचाध्यायां प्रयुक्तानां निपातानां समीक्षात्मकमध्ययनम्	डॉ॰ जयकान्तसिंहशर्मा	२००५
१८८.	श्रीमधुकरद्विवेदी	ज्योतिषार्णवग्रन्थस्य समालोचनात्मकमध्ययनम्	प्रो॰ शुकदेवचतुर्वेदी	२००५
१८९.	श्रीदिनेशचन्द्रसती	ज्योतिशास्त्रे व्यवसायविचारः	प्रो॰ प्रेमकुमारशर्मा	२००५
१९०.	श्रीबजेशकुमारः	शूलपाणेः विरचितश्राद्धविवेकस्य समालोचनात्मकमध्ययनम्	प्रो॰ नीनाडोगरा	२००५
१९१.	श्रीफणीन्द्रचौधरी	ज्योतिषशास्त्रदृष्ट्या भुवनकोशस्य समीक्षात्मकमध्ययनम्	पं॰ कल्याणदत्तशर्मा	२००५
१९२.	श्रीराजकुमारद्विवेदी	विवाहमेलापकविचारः	प्रो॰ शुकदेवचतुर्वेदी	२००५
१९३.	श्रीसुभाषचन्द्रमिश्रः	रोगनिदाने ज्योतिषशास्त्रस्य योगदानम्	डॉ॰ देवीप्रसादत्रिपाठी	२००५
१९४.	श्रीमद् अरविन्दमहापात्रः	समासान्ताधिकारस्य प्रदीपव्याख्यानां समीक्षात्मकमध्ययनम्	डॉ॰ जयकान्तसिंहशर्मा	२००५

१९५.	श्रीबालाजी शतपथी	पूर्तकमलाकरग्रन्थस्य समीक्षणात्मकमध्ययनम्	प्रो॰ रवीन्द्रनागरः	२००५
१९६.	श्रीप्रियव्रतशर्मा	श्रीनारदीयपुराणोक्तजातकशास्त्रस्य समालोचनात्मकमध्ययनम्	प्रो॰ शुकदेवचतुर्वेदी	२००५
१९७.	रश्मिचतुर्वेदी	भवननिर्माणप्रसङ्गे वास्तुशास्त्रस्य सिद्धान्तानां पर्यालोचनम्	प्रो॰ प्रेमकुमारशर्मा	२००५
१९८.	श्रीभूषणकुमारशर्मा	दैवज्ञवल्लभायाः प्रश्नमार्गेण सह तुलनात्मकमध्ययनम्	प्रो॰ शुकदेवचतुर्वेदी	२००५
१९९.	श्रीगौरीनाथरायः	श्रीमद्भागवतवर्णितश्रीकृष्णचरितस्य समाजशास्त्रीयमध्ययनम्	प्रो॰ रमेशचन्द्रचतुर्वेदी	२००५
२००.	श्रीसुमनझा	काव्यप्रकाशस्य माणिक्यचन्द्र-सोमेश्वरभट्टविरचितयोः टीकायोः तुलनात्मकं समीक्षात्मकञ्चाध्ययनम्	डॉ॰ अमिताशर्मा	२००५

२०१.	श्रीरमणकुमारझा	श्रीकृष्णविजयमहाकाव्यस्य अलंकारशास्त्रदृष्ट्या समीक्षात्मकमध्ययनम्	प्रो० रमेशकुमारपाण्डेयः	२००५
२०२.	श्रीसुरजीतसिंहः	जिनसेनकृतस्यादिपुराणस्य साहित्यिकानुशीलनम्	प्रो० सूर्यनारायणझा	२००५
२०३.	श्रीमद् अमरेन्द्रकुमारपाण्डेयः	काव्यालंकारसूत्रवृत्तेः समीक्षात्मकमध्ययनम्	प्रो० रमेशकुमारपाण्डेयः	२००५
२०४.	श्रीसुनीलकुमारमिश्रः	कंसवधमहाकाव्यस्य समीक्षात्मकम-ध्ययनम्	प्रो० सूर्यनारायणझा	२००५
२०५.	श्रीनरेन्द्रकुमारः	वरदाम्बिकापरिणयचम्पूकाव्यविमर्शः	डॉ० अमिता शर्मा	२००५
२०६.	श्रीपराशरम् उदयभास्कर-दीक्षितः	लक्ष्मीविशिष्टाद्वैतभाष्यश्रीभाष्य-योस्तुलनात्मकमध्ययनम्	डॉ० जयकान्तसिंहशर्मा	२००५
२०७.	श्रीशशिकान्तझा	अष्टांगयोगस्य मनोवैज्ञानिकमध्ययनम्	डॉ० चन्द्रकान्तदवे	२००५

२०८.	सुजाता रोटे	आचार्यकुन्दकुन्दग्रन्थोपरि जय-सेनप्रणीतवृत्तिग्रन्थानां समीक्षात्मकमध्ययनम्	डॉ॰ वीरसागरजैनः	२००५
२०९.	श्रीमतिः मीनाक्षी मिश्र	परम्परागताधुनिकछात्रयोः संज्ञानात्मक-वरीयतानामुपलब्धीनाञ्च तुलनात्मकमध्ययनम्	डॉ॰ भुवनेशकुमार उपाध्यायः	२००५
२१०.	श्रीसुधाकरदत्तशर्मा	वैदिकमनोविज्ञानशिक्षायाः आधुनिकशिक्षाशास्त्रदृष्ट्या समीक्षणम्	डॉ॰ रामलालयादवः	२००५
२११.	निर्मला पाणिग्राही	उत्कलप्रदेशे माध्यमिकस्तरीय-शिक्षकेभ्यः सेवाकालीनप्रशिक्षण-कार्यक्रमस्य विश्लेषणात्मकमध्ययनम्	डॉ॰ भुवनेशकुमार उपाध्यायः	२००५
२१२.	श्रीशुद्धात्मप्रकाशजैनः	मूल्यपरकशिक्षायाः विषये जीव-विज्ञानस्य भूमिका	प्रो॰ शालिग्रामत्रिपाठी	२००५
२१३.	रजनीमुदगल	मेघदूतखण्डकाव्ये समागतानां तिङन्तकृदन्तपदानां शब्दशास्त्रीयं समालोचनात्मकमध्ययनम्	डॉ॰ कमला भारद्वाज	२००६

२१४.	रीना तोमर	देवीपुराणस्य समीक्षात्मकमध्ययनम्	प्रो० रमेशचन्द्रचतुर्वेदी	२००६
२१५.	श्रीरत्नलालः	मानवजीवने गोचरग्रहाणां प्रभावः	प्रो० शुकदेवचतुर्वेदी	२००६
२१६.	श्रीविजेन्द्रकुमारशर्मा	आर्यभटीयस्य समीक्षात्मकमध्ययनम्	प्रो० ओंकारनाथचतुर्वेदी	२००७
२१७.	भारती कौशल	बुद्धिलिंगसामाजिकप्रतिक्रियाणां सन्दर्भे भाषाया उपलब्धे विभिन्नशिक्षणविधीनां प्रभावस्याध्ययनम्	डॉ० रचना वर्मा	२००७
२१८.	श्रीकेदारदत्तपुरोहितः	परमलघुमंजूषावैयाकरणभूषण-सारयोस्तुलनात्मकमध्ययनम्	प्रो० अश्विनीकुमारदासः	२००७
२१९.	श्रीराकेशकुमारजैनः	जैनदर्शनेऽर्थस्य द्रव्यगुणपर्याय-विवेचनम्	डॉ० वीरसागरजैनः	२००७
२२०.	श्रीचन्द्रकान्तपण्डा	प्रत्यक्षीकृताध्यापकप्रभावशालिता-त्मप्रत्ययसंस्कृतविद्या संस्कृतविषयो-पलब्धीनां सम्बन्धे छात्राणामधिगम-शैलीवरीयताध्ययनम्	डॉ० रचना वर्मा	२००७

२२१.	श्रीदिलीपकुमारझा	व्यक्तित्वात्मप्रत्ययपारिवारिक-वातावरणानां सम्बन्धे संस्कृतविद्यालय-छात्राणां नैतिकतार्किकतायाः अध्ययनम्	डॉ॰ रचना वर्मा	२००७
२२२.	श्रीमद् उमेशनाथझा	दिल्लीस्थविभिन्नेषु विद्यालयेषु माध्यमिकोच्चतरमाध्यमिकस्तरेषु अध्ययनरतानां बालक-बालिकानां व्यावसायिक-अभिवृत्तेः, आत्मविश्वासस्य, उपलब्धव्यावसायिकसुविधानाञ्च अध्ययनम्	डॉ॰ रमेशप्रसादपाठकः	२००७
२२३.	कु. मीनू सिंह	सांख्यसारस्य समीक्षणम्	डॉ॰ महेशप्रसादसिलोड़ी	२००७
२२४.	कु. प्रियंका श्रीवास्तव	रघुदेवभट्टाचार्यप्रणीतस्य आख्यातवादटिप्पणस्य सम्पादनं समीक्षात्मकमध्ययनम्	डॉ॰ हरेरामत्रिपाठी	२००७
२२५.	श्रीरामेन्द्रशर्मा	अध्यात्मरामायणस्थ-कृदन्त-तिङन्त-पादानां साधुत्वविमर्शः	प्रो॰ भवेन्द्रझा	२००७

२२६.	श्रीमद् अजय आर्यः	विभिन्नदार्शनिकसिद्धान्तानां परिप्रेक्ष्ये स्वामिश्रद्धानन्दस्य शिक्षादर्शनस्य मूल्यांकनम्	प्रो॰ भुवनेश कुमार उपाध्यायः	२००७
२२७.	श्रीकुलदीपकुमारः	आचार्यवसुनन्दिविरचितस्य 'उवासयज्झयण' (उपासकाध्ययन) ग्रन्थस्य समीक्षात्मकमध्ययनम्	डॉ॰ वीरसागरजैनः	२००७
२२८.	श्रीमद् अशोकथपलियालः	ग्रहलाघवकेतकी-ग्रहगणितदृष्ट्या पंचांगविमर्शः	प्रो॰ देवीप्रसादत्रिपाठी	२००७
२२९.	श्रीमद् अमितकुमारः	'पद्मिनी' गद्यकाव्यस्य समीक्षात्मकमध्ययनम्	प्रो॰ रमेशचतुर्वेदी	२००७
२३०.	श्रीसंजयशर्मा	तर्कभाषा-न्यायचन्द्रिका-तर्कचन्द्रिकाणां तुलनात्मकमध्ययनम्	डॉ॰ हरेरामत्रिपाठी	२००७
२३१.	श्रीप्रभातकुमारदासः	महाकवि-कोऊहल-विरचितस्य लीलावईकहाग्रन्थस्य सांस्कृतिकमनुशीलनम्	डॉ॰ सुदीपजैनः	२००७

२३२.	श्रीयशवन्तकुमारः	पञ्चसिद्धान्तिकायाः समीक्षात्मकमध्ययनम्	प्रो॰ प्रेमकुमारशर्मा	२००७
२३३.	श्रीमती मंजूषा सेठी	शिवार्यविरचितस्य 'भगवती-आराहण' (भगवती आराधना) ग्रन्थस्य सांस्कृतिकमध्ययनम्	डॉ॰ सुदीपजैनः	२००७
२३४.	श्रीमती रंजनाजैन	महाकवि हस्तमल्लविरचित-रूपकवाङ्मयस्य प्राकृतांशस्य भाषानुशीलनम्	प्रो॰ रमेशकुमारपाण्डेयः	२००७
२३५.	श्रीमद् आशुतोषकुमारझा	ज्योतिषशास्त्रे त्रिप्रश्नमीमांसा	प्रो॰ देवीप्रसादत्रिपाठी	२००८
२३६.	श्रीजोगेश्वरमहान्तः	माध्यमिकस्तरस्य हिन्दी-संस्कृताङ्ल-भाषाध्यापकानां शिक्षणकौशलसर्जनात्मकता-शिक्षणप्रभावशीलतानाञ्चाध्ययनम्	डॉ॰ रजनी जोशी	२००८
२३७.	श्रीब्रह्मानन्दमिश्रः	सिद्धान्तकौमुद्याः लक्ष्मीबालमनोरमा-टीकयोः कारकपर्यन्तं तुलनात्मकमध्ययनम्	प्रो॰ अश्विनीकुमारदासः	२००८

२३८.	श्रीपूरनचन्दपाण्डेयः	संस्कृतमहाकाव्यपंचके ज्योतिष-शास्त्रीयतत्त्वानां समीक्षणम्	प्रो॰ रमेशचतुर्वेदी	२००८
२३९.	श्रीराजेशकुमारझा	सिद्धान्तकौमुद्याः स्त्रीप्रत्ययकारक-प्रकरणयोः तत्त्वबोधिनीशेखर-योस्तुलनात्मकमध्ययनम्	प्रो॰ कमलाभारद्वाज	२००८
२४०.	गीता कुमारी	सांख्यकारिकायाः माठरवृत्तिजयमंगला-टीकयोस्तुलनात्मकमध्ययनम्	डॉ॰ हरेरामत्रिपाठी	२००८
२४१.	श्रीमनीषकुमारजोशी	पौराणिकसन्दर्भे वामनावतरण-महाकाव्यस्य समीक्षात्मकमध्ययनम्	डॉ॰ अमिता शर्मा	२००८
२४२.	श्रीजयरामझा	पाणिनीयव्याकरणे मूर्धन्यादेशा-नुशीलनम्	डॉ॰ रामसलाहीद्विवेदी	२००८
२४३.	श्रीरमेशशर्मा	ज्योतिर्विज्ञाने पर्यावरणसमीक्षणम्	प्रो॰ प्रेमकुमारशर्मा	२००८
२४४.	श्रीप्रवीणकुमारशर्मा	तर्कसंग्रहदीपिकायाः प्रभानीलकण्ठी-टीकायोः तुलनात्मकमध्ययनम्	डॉ॰ हरेरामत्रिपाठी	२००८

२४५.	श्रीदिनेशकुमारयादवः	सामविधानब्राह्मणस्य समीक्षात्मक-मध्ययनम्	प्रो॰ रमेशचन्द्रदाशशर्मा	२००८
२४६.	डॉ॰ सुरेन्द्रमहतो	मूल्यशिक्षासन्दर्भे परम्परागताधुनिक-च्छात्राध्यापकयोरभिवृत्तीनां तुलनात्मकमध्ययनम्	प्रो॰ भुवनेशकुमार उपाध्यायः	२००८
२४७.	श्रीगुणप्रकाशशर्मा	वैयाकरणसिद्धान्तकौद्यामुपन्यस्तानां वार्तिकानां महाभाष्यदृष्ट्या सन्दर्भ साम्यासाम्यविमर्शः	डॉ॰ रामसलाहीद्विवेदी	२००८
२४८.	श्रीविभूतिनाथझा	प्रक्रियाप्रकाशप्रौढमनोरमा-परिप्रेक्ष्ये कारकपर्यन्तोः प्रक्रियाकौमु-दीसिद्धान्तकौमुद्योस्तुलनात्मकमध्ययनम्	प्रो॰ कमला भारद्वाज	२००९
२४९.	श्रीदयाशंकरमिश्रः	पारम्परिकाधुनिकविद्यालयोः वरिष्ठमाध्यमिकच्छात्राणां सर्जनात्मक-तायाः, बुद्धेः, सामाजिकार्थिकस्तरयोश्च सम्बन्धानां समीक्षात्मकमध्ययनम्	डॉ॰ रमेशप्रसादपाठकः	२००९

२५०.	श्रीज्ञानेन्द्रकुमारः	राष्ट्रियराजधानीदिल्लीप्रदेशस्य ग्रामीणनगरीयवरिष्ठमाध्यमिकविद्यालयेषु बालिकानां जनसंख्याशिक्षां प्रति	डॉ॰ रमेशप्रसादपाठकः	२००९
२५१.	मनीषा तनेजा	दिल्लीस्थविद्यार्थिषु शैक्षिकव्यावसा-यिकनिर्देशनपरामर्शकार्यक्रमाणां प्रभाव-शीलताया अध्ययनम्	प्रो॰ उषा कपूर	२००९
२५२.	भारती बिन्दल	मूल्यशिक्षायाः प्रसारे संस्कृतशिक्षणस्य भूमिकायाः अध्ययनम्	डॉ॰ के. भारतभूषणः	२००९
२५३.	श्रीदातारामपाठकः	दिल्लीस्थविद्यालयेषु माध्यमिकस्तरे छात्राणा संस्कृतव्याकरणशिक्षणाधिगमस्तरस्य मूल्यांकनम्	प्रो० भास्करमिश्रः	२०१०
२५४.	श्रीगिरधारीलालः	श्रीरामचरिताब्धिरत्नाख्यमहाकाव्यस्य सांस्कृतिकमध्ययनम्	डॉ० भागीरथिनन्दः	२०१०
२५५.	श्रीमुकेशजैनः	जैनध्यानयोगस्य समीक्षात्मकध्ययनम् (आचार्यशुभचन्द्रप्रणीतज्ञानार्णवस्य परिप्रेक्ष्ये)	प्रो० अनेकान्तकुमारजैनः	२०१०

२५६.	अन्नपूर्णा	जैनग्रन्थेषु श्रावकाचारः (सावयधम्मदोहाग्रन्थस्य विशेषसन्दर्भे)	प्रो० वीरसागरजैनः	२०१०
२५७.	श्रीमती चन्द्रिका	शौनककारिकायाः समीक्षात्मकमधययनम्	डॉ० सुधांशुभूषणपण्डा	२०१०
२५८.	श्रीसंजीतकुमारझा	नागेशादारभ्य शब्दिकानामभिनवमतसमीक्षणम्	प्रो० भवेन्द्रझा	०२१०
२५९.	श्रीकुलदीपकुमारसहगलः	द्रव्यकिरणावल्याः विश्लेषणात्मकमधययनम्	डॉ० विष्णुपदमहापात्रः	२०१०
२६०.	श्रीदयालसिंहः	आचार्यहेमचन्द्रसूरिप्रणीतद्रव्याश्रयमहाकाव्यस्य भाषावैज्ञानिकमधययनम्	प्रो० वाचस्पति उपाध्यायः	२०१०
२६१.	श्रीमद् अनन्तरामः	न्यायसारपदपञ्चिकायाः समालोचनात्मकमधययनम्	डॉ० विष्णुपदमहापात्रः	२०१०
२६२.	श्रीदेशबन्धुशर्मा	देवप्रसादवास्तुसिद्धान्तानां पर्यालोचनम्	डॉ० बिहारीलालशर्मा	२०१०
२६३.	श्रीसुदर्शनन् एस्.	रामानन्ददर्शने रामानुजदर्शनस्य प्रभावः	प्रो० केदारप्रसादपरोहा	२०१०

२६४.	श्रीघनश्यामभट्टः	तत्त्वचिन्तामणिदीधितिप्रवेशस्य सम्पादनं समीक्षात्मकमध्ययनम् (अनुमितिप्रकरणादारभ्य सिद्धान्तलक्षणपर्यन्तस्य)	प्रो॰ हरेरामत्रिपाठी	२०१०
२६५.	श्रीचन्दनः	वाल्मीकीयरामायणस्य युद्धसुन्दरकाण्डयोः प्रोक्तानामपाणिनीयप्रयोगाणां (आर्षप्रयोगाणाम्) विमर्शः	डॉ॰ सुजातात्रिपाठी	२०१०
२६६.	श्रीकुन्दनकुमारः	गर्गसंहिताया रसदृष्ट्याऽध्ययनम्	डॉ॰ रश्मि मिश्र	२०१०
२६७.	श्रीशंकरःएम्.हेब्बारः	श्लोकवार्त्तिकदिशा औत्पत्तिकसूत्रे प्रतिपादितवादानां समीक्षात्मकध्ययनम्	डॉ॰ ए.एस्.आरावमुदन्	२०१०
२६८.	श्रीकमलेशशक्ता	वाक्यपदीयस्य ब्रह्मकाण्डस्य अम्बाकर्त्रीभावप्रदीपटीकयोः समीक्षणात्मकमध्ययनम्	प्रो॰ जयकान्तसिंहशर्मा	२०१०
२६९.	श्रीसतीशःके.एस्.	न्यायाद्वैतवेदान्तानुमताप्रमाणादितत्त्वान्वीक्षा	प्रो॰ शुद्धानन्दपाठकः	२०१०
२७०.	श्रीवरूणकुमारमिश्रः	पाणिनीयव्याकरणेऽङ्गाधिकारविमशः	प्रो॰ कमलाभारद्वाज	२०१०

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
नवदेहली